इत्थं पाञ्चरात्रे शंकराचार्यैः आपाद्यमानमप्रामाण्यं सोपपत्ति निराकृत्य पाञ्चरात्रं परमं प्रमाणमिति यामुनाचार्यपादाः प्रतिष्ठापयन्ति। यामुनाचार्याणां मतमेव श्रीरामानुजाचार्यैः अनूद्यते श्रीभाष्ये।

ततश्च नारायण एव जगतः निमित्तकारणमुपादानकारणं च इति पाञ्चरात्रे उक्तत्वात् तत्त्वविषये न तस्याप्रामाण्यम्। किं च, स्मृतीनां प्रक्रियायां मिथो विरोधसद्भावेऽपि अभिगमनादिपञ्चकालप्रक्रियायां पाञ्चरात्रस्य इतरस्मृत्युक्तप्रक्रियाविलक्षणत्वेऽपि वेदाविरोधादेव स्मृत्यन्तरवदस्यापि ग्राह्यत्वमुक्त्वा क्रियांशेऽपि प्रामाण्यं शंकराचार्याः स्थापयन्ति। इत्थं बह्वंशेषु पाञ्चरात्रस्य श्रुतेः संनिकृष्टत्वमधिकरणारम्भे प्रदर्शितवतां श्रीशंकरभगवत्पादानां पाशुपतादिवत् पाञ्चरात्रं नैव दूषणीयमिति हृदयम्।

पाञ्चरात्रस्य प्रामाण्यमुत्कर्षश्च भृशं प्राशंसि सूत्रकर्त्रा बादरायणेन महाभारते। तत्र च पाञ्चरात्रस्य प्रमाणतमत्वेन, वेदाविरुद्धत्वेन, मन्वादिस्मृतीनां मूलत्वेन, उपनिषत्तुल्यत्वेन, प्रसिद्धमहर्षिभिरधीतत्वेन, भागवतोत्तमैः उपरिचरवस्वादिभिरनुष्ठितत्वेन च भूयसी श्लाघा कृता। इत्थं महाभारतकर्त्रा पाञ्चरात्रप्रामाण्यमुपन्यस्तमिति शारीरके तेनैव कथं तत्प्रामाण्यं प्रत्याख्यायेत? अनेन सूत्रकारस्यापि पाञ्चरात्रप्रामाण्यमभिमतमेव। अत्र 'प्रत्यक्षितसमस्तवेदार्थतत्त्वस्थितिभिः पाराशर्यप्रभृतिभिः महाभारतादिषु भगवच्छास्त्रस्य सार्वभौमं प्रामाण्यं प्रत्यपादि' इति निगमान्तगुरुभिः श्रीपाञ्चरात्ररक्षायां निर्दिष्टं वचनमप्युपोद्बलकमास्ते।

पाञ्चरात्रस्य श्रुतिमूलत्वम्

'श्रुतिमूलमिदं शास्त्रं प्रमाणं कल्पसूत्रवत्' (विष्व. ८.६)
इत्यादिना पाञ्चरात्रं श्रुतिमूलमिति,

वेदार्थसारसर्वस्वं मम प्रीतिकरं शुभम् ।
पञ्चरात्राख्यममृतं कथयामि शृणुष्व मे ।। (विश्वा. १.७७)

इत्यादिना पाञ्चरात्रं वेदार्थोपबृंहकमिति च पाञ्चरात्रसंहिताः निर्दिशन्ति। श्रुतिमूलमित्यादिवचनं तु त्रय्यन्तमूलतया एकायनश्रुतिमूलतया च योज्यमिति न्यायपरिशुद्धौ श्रीवेदान्तदेशिका अभिप्रयन्ति। ऋगादिभेदेन वेदानां विभजनात् प्राक् विद्यमाना एकायनश्रुतिरेव मूलवेद इति स एव पाञ्चरात्रस्य मूलमिति पाञ्चरात्रसंहितासु निर्दिश्यते। मूलस्य जगन्मूलस्य भगवतो वासुदेवस्य वेदः मूलवेद इति, एकायनम् एको मार्गः मोक्षस्य एकायनम् इति च मूलवेद-एकायनपदयोरर्थः पाञ्चरात्रसंहितासूपपाद्यते।

ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेद-
मथर्वणं चतुर्थम्, इतिहासपुराणं
पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवं
निधिं वाकोवाक्यम् एकायनम्...... (६. १-२; ६. १-४)

इत्यस्मिन् छान्दोग्यवाक्ये श्रूयमाणमेकायनपदं श्रीशंकराचार्याः नीतिशास्त्रमिति व्याख्यान्ति। एकायनं नीतिशास्त्रमित्येतत् प्रसिद्धिविरुद्धमित्याहुः सुदर्शनाचार्याः। छान्दोग्यवाक्ये ऋग्वेदादेः पृथक्तया पठितमेकायनपदं ब्राह्मण-परिव्राजकन्यायेन श्रेष्ठतां द्योतयतीति श्रुतप्रकाशिकायां प्रतिपाद्यते। एकायनस्य श्रुतित्वे युक्तिं श्रीसुदर्शनाचार्याः श्रुतप्रकाशिकायामित्थं प्रदर्शयन्ति—

'इतिहासपुराणेषु श्रुतिवचनान्येव
उपबृंह्यन्ते। इतिहासपुराणेषु
उपबृंहितानाम् एकायनशाखावचनानां
च श्रुतित्वं दुर्वारम्'

इति।

काश्मीरागमप्रामाण्ये एकायनवेदस्यापौरुषेयत्वं प्रमाणितमिति यामुनाचार्यैरागमप्रामाण्ये प्रत्यपादि। उत्पलाचार्यैः स्पन्दप्रदीपिकायाम्—

पाञ्चरात्रश्रुतावपि–यद्वत् सोपानेन
प्रासादमारुहेत् प्लवेन वा नदीं तरेत्
तद्वच्छास्त्रेण हि भगवान् शास्तावगन्तव्यः

इति,

पाञ्चरात्रोपनिषदि च–ज्ञाता च ज्ञेयं च
वक्ता च वाच्यं च भोक्ता च भोज्यं च

इति च पाञ्चरात्रश्रुतिवचनं पाञ्चरात्रोपनिषद्वचनं च उदाह्रियते। उत्पलाचार्यैः निर्दिष्टानि पाञ्चरात्रश्रुतिवचनानि पाञ्चरात्रोपनिषद्वचनानि च एकायनाख्यं वेदं निर्दिशन्तीति विमर्शका अभिप्रयन्ति। तैरुदाहृतानि पाञ्चरात्रश्रुतिपाञ्चरात्रोपनिषद्वचनानि अधुना उपलभ्यमानासु जयाख्यादिपाञ्चरात्रसंहितासु नोपलभ्यन्ते। क्रिस्तोः दशमशताब्द्यां स्थितस्य उत्पलाचार्यस्य कालेऽपि पञ्चरात्रागमः श्रुतिरूपेण प्राप्तप्रचारः समभवदिति एष एव एकायनत्वेन प्राक्तनैः निर्दिश्यत इति च आधुनिकै विमर्शकैः संभाव्यते।

पाञ्चरात्रशब्दनिर्वचनम्

भागवत - सात्वत - एकायन - भगवच्छास्त्रशब्दैः व्यवह्रियमाणस्य पाञ्चरात्रस्य नैकविधानि निर्वचनानि दृश्यन्ते। 'पञ्चविधानि रात्राणि ज्ञानानि यस्मिंस्तत् पाञ्चरात्रम्' इति नारदपाञ्चरात्रे पाञ्चरात्रशब्दस्य व्युत्पत्तिरुपदृश्यते। 'वेद - आरण्यक - साङ्ख्य - योगाख्यानि चत्वारि शास्त्राणि परस्पराङ्गतया यस्मिन् शास्त्रे प्रवर्तन्ते तच्छास्त्रं पञ्चविधज्ञानसमाहारात् पञ्चरात्रम्' इति महाभारतं विवृणोति। 'वेद - वेदान्त - पुराण - साङ्ख्य - योगसंज्ञकानि पञ्च शास्त्राणि यत्र रात्रीयन्ते तत् पाञ्चरात्रम्' इति पौष्करसंहिता पाञ्चरात्रशब्दार्थं निर्वक्ति। 'साङ्ख्य - योग - वैशेषिक - न्याय - मीमांसाख्यानि पञ्च शास्त्रान्तराणि यत्र रात्रीयन्ते तत् पाञ्चरात्रम्' इति

पाद्म-अनिरुद्ध-विश्वामित्रसंहिताः वदन्ति। 'रात्रिशब्दः अज्ञानार्थकः तन्नाशवाचकः पञ्चशब्दः। तस्मात् अज्ञाननाशकं शास्त्रं पाञ्चरात्रम्' इति श्रीप्रश्नसंहिता निर्दिशति। 'ब्रह्मणा सार्धकोटिप्रमाणेन पञ्चसु रात्रिषु केशवाच्छ्रुतं शास्त्रं पाञ्चरात्रम्' इति मार्कण्डेयसंहिता कथयति। पञ्चायुधानाम् अंशत्वेन परिगण्यमानेभ्यः पञ्चभ्यः शाण्डिल्यौपगायनमौञ्जायनकौशिकभारद्वाजेभ्यः मुनिश्रेष्ठेभ्यः पञ्चभिरहोरात्रैः जगत्प्रभुणा प्रोक्तं शास्त्रं पाञ्चरात्रम्' इति ईश्वरसंहिता उपपादयति। 'इन्द्रियाणि, विषयाः, भूतानि, तद्गुणाः पञ्चशब्देन कीर्त्यन्ते। राधातुरादानार्थकः। विषयेन्द्रियभूतानामादातारः पञ्चराः (मनुष्याः) तेषां त्रातृ शास्त्रं पञ्चरात्रम्' इति विश्वामित्रसंहिता विलक्षणतया पञ्चरात्रशब्दं निर्वक्ति।

एतेषु मतेषु परिशीलितेषु इदमेव वक्तव्यं भवति, यत् पाञ्चरात्रसंप्रदायस्य कालमहिम्ना विच्छेदे सति कुशलमतिभिः पाञ्चरात्रशब्दस्य विभिन्ना व्युत्पत्तयः संहितासु प्रकाशिताः स्युरिति।

पाञ्चरात्रस्य चातुर्विध्यम्

प्रतिबुद्धविषयभगवदनन्यभजनोपदेशप्रवृत्तं पाञ्चरात्रम् आगमसिद्धान्त-मन्त्रसिद्धान्त-तन्त्रसिद्धान्त-तन्त्रान्तरसिद्धान्तभेदेन चतुर्विधं भवति। एते सिद्धान्ताः 'सिद्धान्त' पदेन, 'पञ्चरात्र' संज्ञया च प्रथन्ते। मीमांसादिषु शास्त्रेषु सिद्धार्थैर्मनीषिभिः अन्ते पाञ्चरात्रं सेव्यत इत्यतः पाञ्चरात्रस्य सिद्धान्तसंज्ञा प्रचलतीति पाद्मसंहिता सिद्धान्तपदं निर्वक्ति।

पाञ्चरात्रप्रभेदानाम् आगमसिद्धान्तादीनां चतुर्णां लक्षणानि परिशीलयतां विमर्शकानां वासुदेव-संकर्षण-प्रद्युम्न-अनिरुद्धानां समस्तानां व्यस्तानां वा केशवादिमूर्त्यन्तराणां वा श्रियादिभिः परिवृतानां विरहितानां वा आराधनक्रमोपदेशकं शास्त्रं पाञ्चरात्रमित्यतिरोहितमेव भवति।

पाञ्चरात्रग्रन्थाः

सिद्धान्तचतुष्टयोपेते पाञ्चरात्रे ग्रन्थाः बहवी वर्तन्ते। शर्मण्यविदुषा श्रेडर्महाशयेन आङ्ग्लभाषायां विरचिते पाञ्चरात्राहिर्बुध्न्यसंहितोपोद्घाताख्ये (Introduction to the Pancaratra and Ahirbudhnya Samhita) विमर्शग्रन्थे दशाधिकद्विशतसंख्याकाः पाञ्चरात्रसंहिताः परिगणिताः। विद्वद्वरैः वि. कृष्णमाचार्यमहाशयैः लक्ष्मीतन्त्रप्रस्तावनायां पञ्चविंशत्यधिकशतद्वयपरिमिताः पञ्चरात्रग्रन्थाः निर्दिश्यन्ते। पाञ्चरात्रसंहितानां सङ्ख्यानिर्णयः क्लेशसाध्य इति कथयन्तो डा. उ. शंकरभट्टमहोदयाः 'विश्वामित्रसंहितायाः तुलनात्मकमध्ययनम्' इति स्वकीये शोधप्रबन्धे अष्टचत्वारिंशदधिकद्विशतसङ्ख्याकाः पाञ्चरात्रसंहिता इति समुल्लिखन्ति। इत्थमनेकासु पाञ्चरात्रसंहितासु स्थितास्वपि कतिचन एव संहिताः अद्यावधि मुद्रापिताः। बह्व्यः परं तालपत्रगताः हस्तलिखिताश्च वर्तन्ते।

पाञ्चरात्रशोधनपरैः DANIAL SMITH महाभागैः अद्यावधि मुद्रापिताः पञ्चरात्रसंहिताः अधोनिर्दिष्टाः परिगण्यन्ते—

1. अगस्त्यसंहिता	11. परमपुरुषसंहिता	21. **विश्वामित्रसंहिता**
2. अनिरुद्धसंहिता	12. पराशरसंहिता	22. विष्णुतिलकसंहिता
3. **अहिर्बुध्न्यसंहिता**	13. **पाद्मसंहिता**	23. **विष्णुसंहिता**
4. ईश्वरसंहिता	14. पारमेश्वरसंहिता	24. **विष्वक्सेनसंहिता**
5. कपिञ्जलसंहिता	15. पुरुषोत्तमसंहिता	25. शाण्डिल्यसंहिता
6. काश्यपसंहिता	16. पौष्करसंहिता	26. शेषसंहिता
7. **जयाख्यसंहिता**	17. बृहद्ब्रह्मसंहिता	27. **श्रीप्रश्नसंहिता**
8. ज्ञानामृतसारसंहिता	18. भारद्वाजसंहिता	28. **सनत्कुमारसंहिता**
9. **नारदीयसंहिता**	19. मार्कण्डेयसंहिता	29. **सात्वतसंहिता**
10. **परमसंहिता**	20. **लक्ष्मीतन्त्रम्**	30. **हयशीर्षसंहिता**

उपरिनिर्दिष्टासु पाञ्चरात्रसंहितासु बृहदक्षरैः मुद्रिताः त्रयोदशसंहिताः शोधपद्धत्यनुरोधेन संशोध्य प्रकाशिताः सन्ति। एतदतिरिक्ततया डा. राघवप्रसादचौधरीमहाभागैः 'भार्गवतन्त्रम्' इत्यभिख्या पंचरात्रसंहिता विमर्शपद्धतिमनुसृत्य संशोध्य प्रकाशिता। अन्यासां मुद्रितानां संहितानां शोधपद्धत्यनुरोधेन संस्कृत्य मुद्रापणमपेक्षणीयमास्ते। पाञ्चरात्रसंहितानां प्रकाशनेन प्राचां भारतीयानामास्तिक्यबुद्धिरिदानींतनैः सर्वैः सुस्पष्टमवगन्तुं शक्येत।

पाञ्चरात्रसंहिताविभागः

पाञ्चरात्रसंहितान्तर्गता विषयाः ज्ञानपादः - योगपादः - क्रियापादः - चर्यापादश्चेति चतुर्धा विभक्ता वर्तन्ते। तत्र ज्ञानपादे परब्रह्मणः लक्षणम्, जीवस्वरूपम्, जगत्सृष्ट्यादिविवेचनं, मोक्षप्रभृतयः प्रस्तूयन्ते। योगपादे यमनियमादीनां योगाङ्गानां विचारः क्रियते। क्रियापादे आलयनिर्माणप्रकारः, भगवद्बिम्बनिर्माण-तत्प्रतिष्ठाप्रकारादयः उपवर्ण्यन्ते। चर्यापादे भगवदाराधन-उत्सव - मण्डलयाग - स्नपन - प्रायश्चित्तप्रभृतीनां संबन्धिनो विषया वर्ण्यन्ते।

पाञ्चरात्रे ज्ञानपादः

पाञ्चरात्रागमे परब्रह्मणः स्वरूपं निर्गुणसगुणोभयरूपतयोपवर्ण्यते। आदिमध्यान्तरहितं, वृद्धिक्षयरहितम्, अच्युतं, निरुपमं, ज्योतिः, नित्यतृप्तं, अव्ययम्, अमूर्तम् सच्चिदानन्दात्मकम् इत्यादिभिः निर्गुणतया, शुद्धस्फटिकसंकाशः, सर्वव्यापकः, ओंकारः, चिन्त्यः, दीप्तिमान्, वासुदेवाह्वयः, द्विहस्तः, एकवक्त्रः, मायारूपः इत्यादिभिः सगुणतया च परं ब्रह्म निर्दिश्यते।

पाद्मसंहितायाम्-

आदिमध्यान्तरहितमवृद्धिक्षयमव्ययम्।
सर्वाकारं निराकारं तमसः परमव्ययम्॥

इत्युक्त्वा 'तस्मादाविरासीत् सनातनात्' 'स वासुदेवो विज्ञेयः' इति वासुदेवस्य उत्पत्तिः कथिता। सा च 'सदा पश्यन्ति सूरयः' इति सार्वकालिक-

नित्यसूर्यनुभवविषयस्य परस्य उत्पत्यसंभवेन न समीचीना। अतः नित्याना-मपि वस्तूनां नित्येच्छासिद्धत्वम् इति संप्रदायमवलम्ब्य इयमुत्पत्तिः निर्वोढव्या।

ननु निर्गुणम्, निष्कलम् इत्यादिश्रुत्या शंकरसंमतं निर्गुणब्रह्मैव पाञ्चरात्रेऽपि प्रतिपादितमिति तदेव उपास्यमिति चेन्न। तत्र निर्गुणशब्दस्य सत्त्वरजस्तमोरूपहेयगुणरहिततया निष्कलमित्यस्य अवयवरहिततया च अर्थ-वर्णनेन कल्याणगुणाकरविष्णोरेव उपास्यत्वाभ्युपगमात्। न च 'सदेव सौम्येदमग्र आसीत्', 'एकमेवाद्वितीयम्' इत्यादि कारणवाक्येषु सजातीय-विजातीयस्वगतभेदरहितस्य ब्रह्मण एव निर्देशोऽस्तीति निर्विशेषपरब्रह्मण एव कारणत्वम् अत एव 'कारणं तु ध्येयः' इत्यनेन तस्यैव उपास्यत्वं प्रतीयत इति वाच्यम्। तत्र अभिन्ननिमित्तोपादानसकलकल्याणगुणविशिष्टब्रह्मैव 'सदेव' इतिवाक्यप्रतिपाद्यम् इत्यर्थाभिधानात् न दोषः। किं च स्थूलतया परिदृश्यमानं चेतनाचेतनात्मकं जगत् प्रलयकाले सूक्ष्मचिदचिच्छरीरकं ब्रह्म आसीदिति अस्माद्वाक्यात्प्रतीतेः कथं निर्विशेषवादस्यात्रावकाशः?

पाञ्चरात्रागमः परव्यूहविभवहार्दार्चाप्रतिपादकः। परब्रह्मणः परं रूपमेकमेव परव्यूहविभवान्तर्याम्यर्चारूपैः पञ्चभिः प्रकारैरवतिष्ठत इति पाञ्चरात्रागमो विबोधयति। तत्र षाड्गुण्यपरिपूर्णा अनन्तगरुडविष्वक्सेना-दिभिः परिसेविता श्रीमति वैकुण्ठे विराजमाना मूर्तिः परशब्देन कीर्त्यते।

भगवता जगत्सृष्ट्याद्यर्थं वासुदेव - संकर्षण - प्रद्युम्न - अनिरुद्धरूपेण चतुर्धा विभज्य स्वीकृता मूर्तयो व्यूहपदेनाभिधीयन्ते। पारमेश्वरेषु वासुदेवादि-चतुर्षु रूपेषु षाड्गुण्यं क्वचिदभिव्यक्तं क्वचिदनभिव्यक्तं क्वचिदुज्ज्वलं च भवति। ज्ञानादिषण्णां गुणानां साम्यरूपो वासुदेवः, ज्ञानबलयोर्विशेषेण भास्वरः संकर्षणः, ऐश्वर्यवीर्याभ्यां विशेषेण भास्वरः प्रद्युम्नः, शक्तितेजः प्रचुरः अनिरुद्धः। एभ्यो वासुदेवादिव्यूहेभ्यः प्रत्येकं त्रयस्त्रयः केशवादयो द्वादश देवा अवतीर्णाः। ते च व्यूहान्तरपदेनाभिधीयन्ते।

पद्मनाभादयोऽष्टात्रिंशद्देवाः विभवपदेनोच्यन्ते। इमे साधुपरित्राण-नार्थं समयविशेषेषु इह लोके अवतीर्णाः।

उपासकानां हृदयेष्वङ्गुष्ठप्रमितदृश्यतया अवतिष्ठमानः अन्तर्यामी कथ्यते।

शिलादिप्राकृतबिम्बेषु विशिष्टप्रतिष्ठानन्तरं परब्रह्माद्यप्राकृतविग्रह-बिशिष्टवेषेणानुप्रविश्य भक्तैः समर्च्यमाना प्रतिमा अर्चा इत्युच्यते।

इत्थं परव्यूहादयः पञ्चरात्रसंहितासूपवर्णिताः।

भगवतः नारायणस्येव लक्ष्म्या अपि नियमेन अवतारः लक्ष्मीतन्त्रा-दिषु सम्यक् न्यरूपि। षड्विधः श्रीशब्दार्थः लक्ष्मीतन्त्रादिष्वेव विशदीकृतः।

नित्यविभूतिः मुक्तिस्थानभूता, शुद्धसत्त्वमयी, प्रकृतिविलक्षणा इति पाञ्चरात्रागमे दृश्यते। भगवतः दिव्यमङ्गलविग्रहोऽपि तन्मय एव। किं च ज्ञानानन्दस्वरूपत्वमपि तस्य प्रतिपादितम्। ज्ञानशब्दः सविषयः लोके व्यव-ह्रियते। तस्मिन्नर्थे एव ज्ञानशब्दस्य मुख्यत्वम्। आत्मनि ज्ञानशब्दप्रयोगः यथा औपचारिकः तथा नित्यविभूतेरपि ज्ञानात्मकत्वम् औपचारिकम्।

जगत्सृष्टौ भगवान्नारायणः उपादानकारणमिति पञ्चरात्रसंहितासु निर्दिश्यते। भगवता बादरायणेनापि 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपराधात्' इति सूत्रे ब्रह्मण उपादानत्वं सम्यङ्निरूप्यते।

प्रकृतेर्महदादीनि तत्त्वानि जायन्ते। एतेभ्यः तत्त्वेभ्यः अण्डस्यो-त्पत्तिः, अण्डात् प्रजापतेः, तस्माच्चराचरजगतः सृष्टिरिति पाञ्चरात्रसंहितासु प्रतिपाद्यते।

ननु सृष्टिक्रमे अहंकारादेव सर्वतन्मात्रोत्पत्तिः कुत्रचिदुच्यते क्वचित्तु केषांचित् व्यवधानेन, तत्कथं संगच्छत इति चेन्न। नानाश्रुतिविमर्शकाले सर्वश्रुतिवाक्यानां ऐककण्ठ्यसंपादनवदत्रापि एकतात्पर्यवर्णनेनादोषात्। इम-मर्थं श्रुतप्रकाशिकाचार्याः श्रीमन्निगमान्तदेशिकाश्च स्वस्वग्रन्थेषु सुविस्तरमुप-पादयन्ति। लक्ष्मीतन्त्रे प्रकृतेरेव अव्यक्त–अक्षराद्यवस्थास्तिस्रः कण्ठरवेणोक्ताः। अस्याः प्रक्रियायाः सुबालोपनिषदेव मूलम्। तत्र हि 'अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयते, तमः परे देव एकीभवति' इति वाक्यं प्रमाणतया गृहीतम्।

ननु 'अहमेव भवन्त्येते न भेदस्तत्र कश्चन' इति पाद्मवचनवलम्ब्य मुक्तब्रह्मणोरैक्यं केचिद्वदन्ति। तथा सति कथं मुक्तब्रह्मणोः भेदः? तथा च अद्वैतमतप्रवेशः स्यादिति चेन्न। अनादिभेदवतोः मुक्तब्रह्मणोरैक्यासंभवात्। अत एव तच्छ्लोकस्य उत्तरार्धं 'यथाहं विहराम्येवं तथा मुक्ताश्च देहिनः' इति, 'स एकधा भवति, त्रिधा भवति, कामान्नी कामरूपो अनुसंचरन्' इत्यादयः श्रुतयश्च संगच्छन्ते।

अपि च, पाद्मे प्राकृतलोकनिरूपणानन्तरं अनिरुद्धप्रद्युम्नसंकर्षण-व्यूहवासुदेवानां पृथक् पृथक् उपर्युपरि लोकान् उक्त्वा परस्य वासुदेवस्य श्रीभूसमेतस्य सेनेशादिपरिवृतस्य शेषभोगे आसीनस्य लोकः उच्यते। तत्प्राप्ति-रेव परममुक्तिः इति च। अनेन अप्राकृता अनेके लोकाः सन्तीति विज्ञायते।

सर्वेषां जीवानां परमप्राप्यः मोक्षः, स च योगेन साध्यः। स च योगः ज्ञानयोग-कर्मयोगभेदेन द्विधा। परं तु कर्माङ्गकयोगसाध्यो मोक्ष इति विशिष्टाद्वैतिनः।

'अहं ब्रह्मास्मि' इति वाक्ये जीवब्रह्मणोरैक्यानुसंधानमेव मुक्त्युपायः, तयोरैक्यमेव मोक्ष इति अद्वैतिनो वदन्ति। तत्र एवं समाधेयम्—श्रीभाष्योक्त-रीत्या इदमनुसंधानं शरीरात्मभावगर्भितम्। 'यस्यात्मा शरीरम्' इत्यादयः श्रुतयोऽपि इममेव शरीरशरीरिभावमुपोद्बलयन्ति। ननु 'देवो भूत्वा देवं यजेत' इति पाञ्चरात्रे जीवब्रह्मणोरैक्यस्य प्रतिपादनमस्तीति अद्वैतमतमेव युक्तमिति चेन्न। तत्रापि शरीरात्मभावप्रतिपादन एव तात्पर्यात्। भूतशुद्धि-प्रकरणे पृथिव्यादि प्रकृतिपर्यन्ततत्त्वं विलाप्य जीवं भगवत्पादारविन्दे संयोज्य पूर्वस्थितदेहात् विलक्षणदेहमुत्पाद्य भगवत्पादपद्मनिःसृततीर्थेन तं स्नापयित्वा भगवद्दासभूतं स्वं भावयन् देवो भूत्वा देवो यजेत' इत्यस्य तात्पर्यवर्णनेन शरीरशरीरिभावरूपार्थस्य लाभात् शरीरशरीरिभावो निश्चीयते। न ह्यत्र भगवतः जीवस्य च ऐक्यमस्माद्वाक्यात्प्रतीयते।

अत्रेदमवधेयम्—लोके प्रमाणानि चक्षुरादीनि वस्तु यत्प्रकारकं वर्तते तत्तथैव दर्शयन्ति। अयं प्रमाणानां स्वभावः। आधाराधेययोः द्वयोर्ग्रहणमेव संपूर्णग्रहणमिति लोके व्यवहारो दृश्यते। लोके कश्चन चक्षुषा शुक्लं विप्र

पश्यति, तदा विप्रत्वशुक्लत्वादिजातिगुणादीनि तस्मिन् विप्रे प्रकारतया भासन्ते। अतः तद्विप्राख्यं द्रव्यं जातिगुणादिविशिष्टमेव चक्षुर्गृह्णातीति प्रतीयते। एवं विप्रादिशब्दोऽपि जात्यादिविशिष्टधर्मिवाचकः इत्यवगम्यते। यथा तत्र जातिव्यक्त्योः गुणगुणिनोः आधाराधेयभावः तथा शरीरात्मनोरपि सः अवश्यमास्थेयः। यथा लोके देवो युवा जातः इत्यादिषु देवत्वादयः शरीरधर्मादयः स च देवशब्दः तद्विशिष्टं जीवात्मानं बोधयति तथैव 'अहं ब्रह्मास्मि' इत्यत्रापि अहंशब्दवाच्यजीवस्य परं ब्रह्म आत्मा इत्येव प्रतीतेः जीवब्रह्मणोः शरीरात्मभावः सिध्यति। इदं विशिष्टग्रहणम् ऐन्द्रियकप्रत्यक्षा-योग्यमपि योगजप्रत्यक्षेण जायते।

पाञ्चरात्रे योगपादः

पाञ्चरात्रागमे योगस्य प्राधान्यमुक्तम्। स च योगः शिरस्त्वेन च निर्दिष्टः। कलेबरत्यागदशायां वागादिषु इन्द्रियेषु उपरतेषु यं भावं मनसा स्मरति तमेव प्राप्नोतीति गीतायामप्युक्तम्। तादृशयोगः ज्ञानरूप एव। तस्य च कर्माणि अङ्गभूतानि। ननु—

अशक्तमपि च स्मर्तुमन्ते पूर्वकृतं स्मरन्।
स्वयमेव परं धाम स्वयं नयति माधवः॥

इति श्लोकोक्तरीत्या भगवानेव अस्मान् नयतीति उक्तत्वात् कथं वा ज्ञानरूपस्य योगस्य मोक्षसाधनत्वमिति चेन्न। तस्य योगासमर्थप्रपन्नविषय-त्वात्। यो योगानुष्ठाने शक्तः सः तदनुष्ठानेनैव मुक्तिं प्राप्नोतीत्येव निर्गलि-तार्थः। न च वैखानसाः भगवदाराधनरूपकर्मणैव भगवन्तं प्राप्नुवन्तीति तदागमवचनेन प्रतीयते। तथा सति कथं वा योगस्य मोक्षसाधनत्वमिति वाच्यम्। तत्रापि तद्वचनानां योगाशक्तविषयत्वेन अर्थवर्णनात् न दोषलेशोऽपि। अत एव मरीचिरपि सर्ववैदिकाचारा इत्यादि वैखानससूत्रमाश्रित्य यो विष्णो-राराधनं करोति तेन सर्वमनुष्ठितं भवतीत्युक्त्वा अष्टाङ्गयोगमपि उपदिदेश। अनेन योगमन्तरा मुक्तिर्न लभ्यत इति प्रतीयते।

विग्रहाराधनम्

भगवतः पर-व्यूह-विभव-अन्तर्यामि-अर्चासंज्ञकेषु पञ्चसु रूपेषु सर्वसुलभं भक्तानां क्षिप्रसिद्धिप्रदम् अर्चारूपमेवेति वेदान्तदेशिका अभिप्रयन्ति। शिलादिभिः निर्मितासु प्रतिमासु आगमशास्त्रज्ञः अनुष्ठानबलेन प्राणं प्रतिष्ठापयति। शास्त्रसंमतैः क्रियाकलापैः प्रतिष्ठितास्ता मूर्तयो देवालये समाराध्यमानाः भक्तानाम् अभीप्सितार्थमुपकल्पयन्तीति आगमपारदृश्वानः आमनन्ति। शिलादिभिः निर्मितासु प्रतिमासु भगवत्सांनिध्यं कथं भवतीति केचन शङ्कन्ते। अत्र आगमग्रन्थाः—'सर्वगतोऽपि वायुः यथा व्यजनेन व्यक्तो भवति तथा आवाहनविधानेनाहूतः सर्वगतोऽपि भगवान् बिम्बाकारेण बिम्बे समागत्य व्यक्तो भवति' इति समादधति।

आगमोक्तक्रमेण निर्मितासु प्रतिष्ठापितासु च प्रतिमासु परब्रह्मणोऽर्चनं श्रुतिसंमतमिति आगमिकाः कथयन्ति।

'प्रवः पान्तमन्धसो धियायते
महे शूराय विष्णवे चार्चत।'

इति ऋग्वेदवाक्यं समूर्तार्चनं विधत्ते इति स्वीकृत्य प्रतिमासु भगवदर्चनं वेदसंमतमिति आगमिकाः प्रतिपादयन्ति।

अनादिसंप्रदायसिद्धं विग्रहार्चनं पाञ्चरात्रसंहितासु विस्तरेणोपवर्ण्यते।

पाञ्चरात्रे क्रियापादः

भगवदालयं निर्माय तत्र लक्षणयुक्ताया विष्णोः प्रतिमायाः प्रतिष्ठाक्रमः क्रियापादस्य प्रतिपाद्यः। पञ्चकालपरायणस्य पावनचरितस्य भागवतादिपदाभिधेयस्य आलयार्चामूर्त्यादिप्रतिष्ठापनयोग्यस्य चाचार्यस्य वरणं, देवालयनिर्माणयोग्याया भूमेः परीक्षणं, भूकर्षणं, गर्भन्यासः, प्रासादनिर्माणं, बिम्बनिर्माणं, प्रतिष्ठाविधिः—इत्येते विषयाः पञ्चरात्रसंहितासु क्रियापादे वर्ण्यन्ते। प्रतिमायां हरेः प्रकर्षेण संनिधानमेव प्रतिष्ठाशब्दस्यार्थः। अत्र प्रकर्षश्च

दिव्यमङ्गलविग्रहसंबन्धः, अङ्गप्रत्यङ्गपूर्तिः इत्यादिः। ईदृशबिम्ब एव अभिषेचन-अलंकरण-नानाविधभूमिकापरिष्करणादिकं च कर्तव्यमिति संहितासु विशिष्य उच्यते।

पाञ्चरात्रे चर्यापादः

आलयार्चनपरे चर्यापादे उत्सव-स्नपन-प्रायश्चित्तसंबन्धिनो विषयाः विवेच्यन्ते। वैष्णवदीक्षा - पञ्चकालकृत्य - नित्योत्सव - अग्निकार्य - मण्डलयाग - नैमित्तिकार्चन – जीर्णोद्धारादयोऽप्यत्रैव पादेऽन्तर्भवन्ति। बिम्बपूजाविषये दीक्षारहितेन पूजा नैवानुष्ठातव्या। बहुविधमण्डलानां सत्त्वेऽपि चक्राब्ज-मण्डलं निर्माय तदाराधनपूर्वकं दीक्षाग्रहणं प्रतिपाद्यते। पौष्करप्रभृतिषु ग्रन्थेषु वेदाध्ययनरतैर्द्विजैर्दीक्षितैरेव आलयेषु भगवदाराधनं कर्तव्यमिति च सम्यगभिधीयते। चक्राब्जमण्डलदीक्षायां पञ्चसंस्कारविधयो बहवः विस्तरेणोपवर्ण्यन्ते। अभिगमन - उपादान - इज्या - स्वाध्याय - योगाख्यानि पञ्चसु कालेष्वनुष्ठेयानि सुविशदं निरूप्यन्ते। मानसयाग - बाह्ययागभेदेन द्विविधं भगवदाराधनं चर्यापादेऽस्मिन् संलक्ष्यते। पाञ्चरात्रे कुम्भ - मण्डल - वह्नि - बिम्बेषु चतुर्षु स्थानेषु क्रियमाणं भगवतः पूजनं, विष्णवालयेषु प्रतिवर्षं कस्मिंश्चिन्नियते काले क्रियमाणो महोत्सवः, चन्द्रोपरागादिनिमित्तेषु विधीयमानं भगवतः स्नपनं, भगवत्प्रासादनाशादिदोषविशेषेभ्यः संभाव्यमानानां दोषाणां दूरीकरणाय क्रियमाणाः प्रायश्चित्तविशेषाश्चात्र चर्यापादे सविस्तरं प्रस्तूयन्ते।

तदेवं तत्त्वशास्त्र - योगाभ्यास - आलयनिर्माण - बिम्बकल्पन - बिम्बप्रतिष्ठा - भगवदाराधन - महोत्सवाचरणविषयकं पञ्चरात्रमिति वक्तुं पार्यते।

परब्रह्मस्वरूपादिनिरूपकस्य विष्णवाराधनपरस्य मोक्षैकफललक्षणस्य च पाञ्चरात्रस्य महिमानमधिकृत्य विद्वद्वरैः उत्तमूरु वीरराघवाचार्यैः सविमर्शं संप्रणीते श्रीपञ्चरात्रपारम्याख्येऽस्मिन् ग्रन्थे पाञ्चरात्रस्य अप्रामाण्यशङ्का-निरसनपूर्वकं प्रामाण्यस्थापनम्, पाञ्चरात्रस्य श्रुतिमूलत्वम्, पाञ्चरात्रशब्दार्थः, आगमसिद्धान्तादिभेदेन पाञ्चरात्रस्य चातुर्विध्यम्, तत्तत्सिद्धान्तानुरोधेन

संहिताविभागः, त्रयोपाञ्चरात्रयोर्वैलक्षण्यम्, पाञ्चरात्राध्यात्मविमर्शः, पाञ्चरात्रे योगः, प्रपत्तेरुपायत्वम्, विग्रहाराधनम्, पञ्चकालप्रक्रिया इत्यादयो विषयाः निपुणं निरूपिताः।

ग्रन्थेऽस्मिन् भूरिशः उदाहृतेषु प्रमाणवचनेषु उपलब्धानां बहूनां वचनानामाकरग्रन्थाः टिप्पण्यां संसूचिताः। परिमितसङ्ख्यकानामाकरग्रन्थाः नैवोपलब्धाः। ते च 'आकरो मृग्यः' इत्यनेन सूचिताः।

ग्रन्थकर्तृपरिचयः

प्रकृतग्रन्थकर्तृणाम् अभिनवदेशिकेत्यादिबिरुदभाजां श्रीमतां वीरराघवाचार्याणां संक्षिप्तं जीवनवृत्तं प्रकटयितुमभिलषामः —

अस्ति अद्यतनतमिलुनाडुराज्ये चेङ्गलपट्मण्डले प्रथितः उत्तमूरग्रहारः। तत्र चिरस्य खलु कालस्य निवसति श्रीवत्स-तिरुमलै-नल्लान्-चक्रवर्तिकुलम्। कुलेऽस्मिन् किंगृहेशाधीशकृपया श्रीनिवासराघवचक्रवर्तिस्वामिनामात्मजत्वेन दुर्मुखिसंवत्सरे मकरमासे स्वातीनक्षत्रे (26-1-1897) वीरराघवाचार्याः जनिमलभन्त। निजतातपादेभ्यः श्रव्यकाव्यानि, श्रीनिवासदेशिकेभ्यः चम्पूनाटकप्रभृतीनि, श्रीस्वच्छन्नस्वामिभ्यः न्यायविद्याम्, श्रीचिन्नस्वामिशास्त्रिभ्यः पूर्वमीमांसाशास्त्रं, श्रीकोलियालं स्वामिभ्यः उत्तरमीमांसाशास्त्रं चाधीत्य तत्तच्छास्त्रेषु परं प्रावीण्यं चाधिजग्मुः। अध्ययनकाले एव तिरुचानूरुदिव्यक्षेत्रप्रभृतिषु प्रचालितासु विद्वत्परिषत्सु भागं गृहीत्वा सुश्लाघं पाण्डित्यं प्रकटय्य अखिलविद्वज्जनबहुमतिपात्रं बभूवुः। न्याय-मीमांसा-वेदान्तादिशास्त्राणि प्रसिद्धेभ्यः पण्डितधौरेयेभ्यः अधीत्य सर्वश्लाघनीयं सर्वाभिलषणीयं च बुद्धिवैशद्यं संपाद्य तिरुवैयारुकलाशालायाम् अध्यापकत्वेन वीरराघवाचार्याः नियुक्ताः। वैशेषिकदर्शनविमर्शरूपं ग्रन्थं मीमांसासुधास्वादसंज्ञकं च ग्रन्थं तत्रैव ते प्रणिन्युः। कलकत्ताविश्वविद्यालयेऽध्यापकस्थानमलंकर्तुं भृशं प्रार्थिता अपि आचारवैकल्यभिया तत्र वासं निराचक्रुः। तथापि राजस्थानदेशीयैः पुष्करक्षेत्रवासिभिः वणिग्वरैः असकृत् संप्रार्थितास्ते तत्र प्रवचनादिकर्म कर्तुमङ्गीचकार्षुः। परं तत्र स्फोटकविषज्वरादिभिः असकृद्बाध्यमानास्ते

स्वग्रामं प्रतिनिवृत्ताः। कलकत्ता–मैसूरुप्रभृतिषु प्रचालितासु विद्वद्गोष्ठीषु वीरराघवाचार्याणां सर्वतोमुखं वैदग्ध्यं साक्षात्कृत्य विदुषां वदनकमलेभ्यः साधुवादाः निर्गच्छन्ति स्म। विद्वदग्रेसराणां तेषां महीयसीं कीर्तिं श्रुत्वा तिरुपतिश्रीवेंकटेश्वरप्राच्यकलाशालाधिकारिणः तेभ्योऽध्यक्षपदवीं प्रदित्सवः तानभ्यर्थयन्त। श्रीवेंकटेश्वरकलाशालाध्यक्षपदवीमारूढामामाचार्याणामनितर-साधारणीं निर्वहणचातुरीं दृष्ट्वा अधिकारिणः सर्वेऽपि व्यस्मयन्त। सर्व-शास्त्रेषु उद्ग्रन्थान् स्वयमध्यापयन्तः तदितरसमय एवाध्यक्षकार्याणि कुर्वाणाः सर्वैरपि श्लाघ्यमानं निर्वाहकर्म अकुर्वन्। परं लौकिकेषु कार्येषु वहुषु काल-यापनमसहमानाः सदाचारनिधयः इमे विद्वन्मणयः कलाशालाध्यक्षपदवीं स्वय-मेव परित्यज्य तत्रैव कलाशालायां प्राध्यापका भूत्वा शतशः छात्रान् अध्याप-यामासुः। तत्र तेऽसाधारणवैदुष्येण तलस्पर्शिपाण्डित्येन च न केवलं छात्राणा-मपि प्राध्यापकानामपि प्राध्यापका इति सादरं सबहुमानं च सममन्यत। विद्वद्वराणां वीरराघवाचार्याणां छात्रेषु Dr. N. S. रामानुजताताचार्याः (तिरुपतिराष्ट्रियसंस्कृतविद्यापीटस्य कुलपतयः) पं. K. शठगोपाचार्याः, पं. विल्लिवलं नारायणाचार्याः, पं. V. श्रीवत्साङ्काचार्याः, पं. T.A. कृष्णमा-चार्याः, पं. श्रीधराचार्याः, पं. अनिरुद्धाचार्याः प्रधानाः।

तिरुपतिश्रीवेंकटेश्वरप्राच्यकलाशालातः निवृत्तास्ते पण्डितवर्याः मद्र-पुरवास्तव्यानां प्रार्थनामङ्गीकृत्य तत्र प्रवचनादिकं प्राक्रमन्त।

विद्वत्तल्लजानाममीषां महीयसो छात्रसंपत्तिरिव विविधशास्त्रग्रन्थ-संपदपि प्रमोदयति सचेतसां विदुषां चेतांसि। न्याये, वैशेषिके, साङ्ख्ये, योगे, मीमांसायाम्, वेदान्ते, काव्ये, स्तोत्रे, द्राविडवेदान्ते वैखानसागमे पाञ्चरात्रागम-प्रभृतिषु च वीरराघवाचार्यैः संस्कृतभाषायां विरचितानि अष्टोत्तरशतं ग्रन्थ-रत्नानि मुद्रितानि विराजन्ते। तेषु ग्रन्थेषु केचन विमर्शात्मकाः, केचन व्याख्यारूपाः, केचन स्वतन्त्ररूपाश्च भवन्ति। तत्र कतिचन उल्लिख्यन्ते—

1. मीमांसासुधास्वादः (न्यायप्रकाशव्याख्या)
2. वैशेषिकविमर्शः
3. प्राच्यप्रतीच्यदर्शनविमर्शः

4. न्यासाधिकारसर्वस्वम्
5. न्यासतत्त्वम्
6. वैशेषिकरसायनम् (वैशेषिकदर्शनव्याख्या)
7. सुखप्रवेशिनी (तर्कसंग्रहव्याख्या)
8. कुसुमाञ्जलिविस्तरः (न्यायकुसुमाञ्जलिव्याख्या)
9. परमार्थप्रकाशिका (अद्वैतामोदविमर्शः)
10. सारार्थरत्नप्रभा (अधिकरणसारावलीव्याख्या)
11. अलभ्यलाभः (सर्वार्थसिद्धिव्याख्या)
12. सर्वसाक्षात्कारः (संकल्पसूर्योदयव्याख्या)
13. नानार्थदर्शिनी (सुभाषितनीवीव्याख्या)
14. यादवाभ्युदयटिप्पणी
15. पादुकासहस्रटीका - पादुकापरिचर्या
16. हंससंदेशसंजीवनम्
17. सूक्ष्मार्थटीका (सेश्वरमीमांसाव्याख्या)
18. सत्पथसंचारः (मीमांसापादुकाव्याख्या)
19. मीमांसाप्रमेयसंग्रहः
20. गूढार्थप्रकाशिका (सिद्धित्रयव्याख्या)
21. वैखानसविजयः
22. माध्वप्रमेयपरिशीलनम्
23. तत्त्वटीकाटिप्पणी
24. शतदूषणीटिप्पणी
25. गीताभाष्यतात्पर्यचन्द्रिकाटिप्पणी
26. गीतापाठविमर्शः
27. न्यायसिद्धाञ्जनटिप्पणी
28. प्रपन्नपारिजातव्याख्या
29. भाष्यार्थदर्पणः (श्रीभाष्यव्याख्या)
30. श्रीवेंकटेशकल्याणचरितकाव्यम्
31. दयाशतकव्याख्या
32. पूर्णत्वविचारः

33. परमार्थभूषणम् (अद्वैतशतभूषणीविमर्शः)
34. श्रीपञ्चरात्रपारम्यम्
35. रहस्यत्रयसारसंग्रहः
36. दशोपनिषद्भाष्यव्याख्या इत्यादयः ।

तमिल्भाषयाम् एतैः विद्वन्मणिभिः विरचिताः 52 ग्रन्थाः मुद्रिताः उपलभ्यन्ते ।

श्रीवीरराघवाचार्याणां सर्वतोमुखं पाण्डित्यमभिलक्ष्य तदानींतन-भारतराष्ट्रपतिभिः डा. राजेन्द्रप्रसादमहाभागैः पारितोषिकवितरणेन अमी विद्वत्तल्लजाः सभाजिताः । भारतराष्ट्रपतिसंमानस्य प्रथमभाजनं श्रीमन्तः वीरराघवाचार्या एव ।

सर्वतन्त्रस्वतन्त्राणां श्रीवीरराघवाचार्याणां विविधशास्त्रवैदुष्यं, प्रत्युत्पन्नमतित्वं, विशदतरप्रतिपादनवैदग्ध्यं, नैकशास्त्रप्रबन्धरत्नप्रणयनं चावलोक्य कोलियालं जगद्गुरुचरणैः 'उभयमीमांसावल्लभ' इति, श्रीदेशिक-सभास्तारैः 'पूर्वोत्तरमीमांसावल्लभ' इति, श्रीपरकालमठाधीशैः 'पण्डित-मार्तण्ड' इति, काञ्चीश्रीरामानुजदयापात्रमहोत्सवसदस्यैः 'देशिकदर्शनधुरंधर' इति, तिरुपतिश्रीवेदान्तदेशिकसंप्रदायसुधास्वादिनीसभासदस्यैः 'अभिनव-देशिक' इति, अयोध्यागतसंस्कृतपरिषदा 'तर्कार्णव' इति, उत्तरप्रदेशस्थ-संस्कृतपरिषदा 'पण्डितरत्नम्' इति, मन्त्रालयराघवेन्द्रमठाधीशैः 'पण्डित-भूषणम्' इति च बिरुदवितरणेन पण्डितप्रवरा इमे संमानिताः ।

निखिलेष्वपि शास्त्रेषु ग्रन्थरत्नान्यनुगृहीतवन्तो वाग्देव्या अवताराः वीरराघवाचार्याः 1984 तमे क्रिस्तुवत्सरे कीर्तिशेषं गताः ।

कृतज्ञतानिवेदनम्

उभयवेदान्तप्रवर्तकैः श्रीमद्भिः उत्तमूरुवीरराघवाचार्यैः प्रणीतस्य श्रीपञ्चरात्रपारम्यसंज्ञकस्य प्रबन्धरत्नस्य संपादने मां नियोज्य तिरुपतिकेन्द्रीय-संस्कृतविद्यापीठस्य प्रकाशनमालायां मुद्राप्य प्रकाशयितुम् अनुमतिं दत्तवद्भ्यः

भूतपूर्व-एतद्विद्यापीठप्राचार्येभ्यः सांप्रतं तिरुपतिराष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिपदमलंकुर्वद्भ्यः डा. एन्. एस्. रामानुजताताचार्येभ्यः, तिरुपति-केन्द्रीयसंस्कृतविद्यापीठस्य प्राचार्येभ्यः डा. आर्. महादेवन्महोदयेभ्यः, एतद्-ग्रन्थमुद्रणमनुमत्य उपकृतवद्भ्यः देहलीराष्ट्रियसंस्कृतसंस्थानाधिकारिभ्यश्च सकार्तज्ञ्यं धन्यवादान् प्रकाशयामः।

ग्रन्थस्यास्यामुखमाङ्ग्लभाषायां विलिख्य अनुगृहीतवद्भ्यः आगमशास्त्रे कृतभूरिपरिश्रमेभ्यः प्राच्यप्रतीच्यविद्यासंपन्नेभ्यः न्यायवेदान्तादिशास्त्रेषु नानाग्रन्थकर्तृभ्यः पाण्डिचेरीस्थफ्रेञ्च्शोधसंस्थायां प्रोफेसर्पदमधितिष्ठद्भ्यः डा. वि. वरदाचार्यमहोदयेभ्यः भूयांसि नमांसि तनवामहै।

आकरग्रन्थान्वेषणकर्मणि साहाय्यमाचरितवद्भ्यः पं. वी. आर्. वेंकटदीक्षितमहोदयेभ्यः, सुहृद्वरेभ्यः विद्वान् एम्. एल्. नरसिंहमूर्तिमहाशयेभ्यश्च हार्दान् धन्यवादान् प्रकटयामः।

ग्रन्थस्यास्य सुष्ठु मुद्रणं कृतवद्भ्यः मैसूरुनगरस्थउदयरविमुद्रणालय-निर्वाहकेभ्यः, उपोद्घातभागं (संस्कृत-आङ्ग्ल) समीचीनया रीत्या मुद्रणं कृतवद्भ्यः तिरुपतिकीर्तिमुद्रणालयाध्यक्षेभ्यः हार्दं धन्यवादं वितरामः। ग्रन्थ-स्यास्य प्रूफ्शोधनं कृतवद्भ्यः मैसूरुप्राच्यपरिशोधनसंस्थानिवृत्तप्राध्यापकेभ्यः पं. एन्. एस्. वेंकटनाथाचार्यमहाशयेभ्यः नमोवाकं प्रयुञ्ज्मः।

भगवतो श्रीनिवासस्यानुग्रहेण श्रीपञ्चरात्रपारम्याभिख्योऽयं प्रबन्धः आगमतत्त्वजिज्ञासूनां प्रमोदाय कल्पतामित्याशास्महे।

केन्द्रीयसंस्कृतविद्यापीठम्
तिरुपतिः
3–8–1990

—लक्ष्मीनरसिंहभट्टः

विषयसूचिका

———

सङ्केताक्षराणां विवरणसूची

अ.	....	अमरकोशः ।
अहि.	....	अहिर्बुध्न्यसंहिता ।
आ. प्रा.	....	आगमप्रामाण्यम् ।
ईशा.	....	ईशावास्योपनिषत् ।
ई.	....	ईश्वरसंहिता ।
ऋ.	....	ऋग्वेदः ।
ऐत.	....	ऐतरेयोपनिषत् ।
क.	....	कठोपनिषत् ।
कू.	....	कूर्मपुराणम् ।
खि. अ.	....	खिलाधिकारः ।
ग. श. भा.	....	गद्यत्रयम् – शरणागतिगद्यभाष्यम् ।
गर्भो.	....	गर्भोपनिषत् ।
छा.	....	छान्दोग्योपनिषत् ।
ज. (अ. पा.)	....	जयाख्यसंहिता (अधिकपाठः) ।
तै. आ.	....	तैत्तिरीयारण्यकम् ।
तै.	....	तैत्तिरीयोपनिषत् ।
ना. प. ज्ञा. प्र.	....	नारदपञ्चरात्रम् – ज्ञानामृतसारः – प्रथमरात्रम् ।
नार.	....	नारदीयसंहिता ।
न्या. कु.	....	न्यायकुसुमाञ्जलिः ।
न्या. द.	....	न्यायदर्शनम् ।
न्या. प.	....	न्यायपरिशुद्धिः ।
न्या. सि.	....	न्यायसिद्धाञ्जनम् ।

प. भ.	....	परमतभङ्गः ।
प.	....	परमसंहिता ।
पा. र.	....	पाञ्चरात्ररक्षा ।
पा. र. भू.	....	पाञ्चरात्ररक्षाभूमिका ।
पा. क्रि.	....	पाद्मसंहिता – क्रियापादः ।
पा. च.	....	पाद्मसंहिता – चर्यापादः ।
पा. यो.	....	पाद्मसंहिता – योगपादः ।
पार.	....	पारमेश्वरसंहिता ।
पौ.	....	पौष्करसंहिता ।
प्रश्न.	....	प्रश्नोपनिषत् ।
बृ.	..	बृहदारण्यकोपनिषत् ।
ब्र. सू.	....	ब्रह्मसूत्रम् ।
ब्र सू. शां. भा.	....	ब्रह्मसूत्रशांकरभाष्यम् ।
भ. गी.	....	भगवद्गीता ।
भ. गी. ता. च.	...	भगवद्गीतातात्पर्यचन्द्रिका ।
भा.	....	भागवतम् ।
भा. सं.	....	भारद्वाजसंहिता ।
म. स्मृ.	....	मनुस्मृतिः ।
मन्त्रि.	....	मन्त्रिकोपनिषत् ।
महाना.	....	महानारायणोपनिषत् ।
म. भा.	....	महाभारतम् ।
मा.	...	माण्डूक्योपनिषत् ।
मी. श्लो.	....	मीमांसाश्लोकवार्तिकम् ।
मु.	....	मुण्डकोपनिषत् ।
रा.	....	रामायणम् ।

रा. सु.	....	रामायणम् – सुन्दरकाण्डः।
ल. त.	....	लक्ष्मीतन्त्रम्।
ल. त. उ.	....	लक्ष्मीतन्त्रम् – उपोद्घातः।
वि. क. प.	....	विमानार्चनाकल्पः – पटलः।
विश्वा.	....	विश्वामित्रसंहिता।
वि. त.	....	विष्णुतन्त्रम्।
वि. ति.	....	विष्णुतिलकम्।
वि. ध.	....	विष्णुधर्मः (शौनकीयः)।
वि. पु.	....	विष्णुपुराणम्।
वि. स.	....	विष्णुसहस्रनामस्तोत्रम्।
वि. स. शां. भा.	....	विष्णुसहस्रनामस्तोत्रशांकरभाष्यम्।
वै. वि.	....	वैखानसविजयः।
श. ब्रा.	....	शतपथब्राह्मणम्।
शा. स्मृ.	....	शाण्डिल्यस्मृतिः।
श्री. प्र.	....	श्रीप्रश्नसंहिता।
श्रीभा.	....	श्रीभाष्यम्।
श्वे.	....	श्वेताश्वतरोपनिषत्।
स.	....	समूर्तार्चनाधिकरणम्।
सा.	....	सात्वतसंहिता।
सु.	....	सुबालोपनिषत्।

———

॥ श्रीः ॥

श्रीपद्मावतीसमेतश्रीनिवासपरब्रह्मणे नमः ।

श्रीपञ्चरात्रपारम्यम्

पञ्चरात्रकृतश्रौतपरमार्थप्रपञ्चनम् ।
प्रपञ्चहेतुं सेतुं च श्रीशं पञ्चात्मकं भजे ॥ १ ॥

सर्वज्ञः सर्वशक्तो निरवधिकदयः सर्वरक्षैकदीक्षः
स्रष्ट्वा धातारमध्यापितनिगमगणः स्वीकृताश्वास्यरूपः ।
तत्सारं पञ्चरात्रैः सनकमुखमुनिप्रीणनोऽभूत् साक्षा-
द्योऽसौ वैखानसार्च्यो जयति वृषगिरौ पञ्चरात्रार्च्यपद्मः ॥ २ ॥

नानावैष्णवसंप्रदायरुचिभिर्यो ह्युत्तरैर्दक्षिणैः
सर्वाङ्गीकृतदेवसद्मसु गृहेष्वप्यादृतार्थस्थितिः ।
श्रीमद्यामुनयोगिलक्ष्मणमुनिश्रुत्यन्तगुर्वादिभिः
सोऽयं स्थापितवैभवो विजयते श्रीपञ्चरात्रागमः ॥ ३ ॥

श्रीपाञ्चरात्रस्य प्रवाहानादिता

अत्र पञ्चरात्रसामान्याधिकारोऽस्माकं प्रकृतः । वेदा इव पञ्चरात्राण्यद्यत्वे अनन्तानि

शब्दतोऽर्थतश्चाशेषेणाधिगन्तुमशक्यानि च परिगण्यन्त इति निश्चप्रचम् । प्राचीनकाल इव साम्प्रतं तदप्रामाण्यवादकोलाहलाः नातीव लक्ष्यन्ते ।

ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ।
यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् ॥[1]

इति सर्वदेवसेव्यस्य विष्णोर्नामसंकीर्तनमात्रस्यापि कलौ विशिष्टकार्यकरत्वेऽपि महाफलप्राप्तये सर्वलोकहिताय स्वार्चाप्रचारविधित्सया प्रतिचतुर्युगं कलिद्वापरसन्धौ श्रीपञ्चरात्रं प्रणयति भगवानिति व्यक्तमाह वेदव्यासः । तदिदं भगवदर्चनं कृतयुगधर्म इति चेह व्यक्तीकरिष्यते । प्रतिमासु देवानामर्चनं च धर्मशास्त्रेषु श्रीमद्रामायणादिषु चेतिहासपुराणेषु प्रसिद्धम् । प्रतिमाप्रतिष्ठापनपद्धतयः तदर्चनप्रकाराश्च तत्र तत्र न प्रपञ्च्यन्त इति तदधिगमने प्रवृत्तं पञ्चरात्रं किंकर्तव्यतामूढानामकूपारपतितानां कर्णधार इव पारप्रापणाय कल्पत इति तत्र विद्वेषो नोत्तितीर्षूणां भवितुमर्हति ।

अर्वाचीनमीमांसकवाक्यस्यानादरणीयता

पूर्वमीमांसायां श्रुतिविरुद्धानां स्मृतीनामप्रमाणतया परिगणनावसरे कुमारिलः अप्रमाणस्मृतिष्वन्यतमत्वेन पञ्चरात्रं गणयाञ्चकारेति गतानुगतिकोऽयमप्रामाण्यप्रचारो न सेश्वरमीमांसकानामादरणीयो भवेत् । अग्निवाय्विन्द्रादीनां विग्रहादिकं विशिष्य वेदेषु घुष्यमाणमेव यो न संमन्यते,

विग्रहो हविरादानं युगपत्कर्मसंनिधिः ।
प्रीतिः फलप्रदानं च देवतानां न विद्यते ॥[2]

इति च मुक्तकण्ठमाह, तस्य मिथो विरुद्धनानार्थवादतत्त्वार्थाविरोधनिर्वाहपरिश्रमभीतस्य प्राथमिकं देवतारूपमेवापलपतः प्रतिमारूपेषु कथमास्थापदं दधीत? वस्तुतो विग्रहादिकमिच्छताऽपि तेन मीमांसकमतं नास्तित्वमिति मन्यमानेन अकामेनाप्यप्रमाणत्वमेव पञ्चरात्राणामवश्यं वक्तव्यमासीत् । तस्यान्तरं हृदयं तु स एव वेद ।

---

1. वि. पु. 6.2.17
2. तत्त्वमुक्ताकलापे नायकसरे 'देहादिर्दैवतानाम्' (श्लो. 68) इत्यादिश्लोकस्य व्याख्यायाम् श्री उत्तमूरु वीरराघवाचार्यैः अयं श्लोकः उध्दृतः ।

देवताविग्रहादौ व्यासादिसंमतिः

एवं स्थिते तस्य गतिमविज्ञाय तदापातोक्तिविस्रम्भेण देवविग्रहतदर्चनादिपरपाञ्चरात्राप्रामाण्यवादिनः शारीरकदेवताधिकरणे देवताविग्रहादिस्थापकवेदव्यासविरोधपरिहाराय तं वादं त्यक्तुमर्हन्ति । अतो देवताविग्रहाद्यनङ्गीकारिनिरीश्वरमीमांसकमते स्थित्वा पाञ्चरात्रपाशुपताद्यप्रामाण्यवर्णनमस्थाने । अत एवाह न्यायकुसुमाञ्जलावुदयनः - 'मीमांसकस्तु तोषयितव्यो भीषयितव्यश्च'[3] इति । स्मृतीतिहासपुराणादिषु च तत्र तत्र देवतानां गायत्रीगजाननकुमारदिक्पालग्रहनक्षत्रादीनां विग्रहवर्णभूषणायुधादि विवेचितं द्रष्टव्यम् । तत्र त्रिमूर्त्यन्तर्गतयोर्विष्णुशिवयोः प्राधान्यात् तद्भजनविस्तरभूतं पाञ्चरात्रं पाशुपतं च प्रवृत्तमिति न सर्वथा तदप्रामाण्यप्रसक्तिः । किंच मीमांसायां पाशुपतादेरप्रामाण्यं वर्णयितुमिष्टं चेत् वेदविरोधं प्रदर्श्यैव तद्वर्णनीयम् । तदसंभवे मन्वादिस्मृतिवत् प्रामाण्यमेव भवेत् । न हि केनापि मीमांसकेन कुत्राप्यंशे वेदविरोधः पाञ्चरात्रे प्रदर्शितोऽस्ति ।

पाञ्चरात्रप्रामाण्यं व्याससंमतम्

ननु किमनेन पूर्वमीमांसाव्याख्यातृवाक्यकदम्बविचारेण? साक्षाद् वेदव्यास एव बादरायणो द्वितीयद्वितीये पाशुपतं पाञ्चरात्रं चाप्रमाणमातिष्ठतेति चेत्–अत्रेदं वक्तव्यम् । पूर्वमीमांसायां प्रामाण्याप्रामाण्यविचारः तत्तत्प्रतिपाद्यक्रियाविषयमधिकृत्य, शारीरके तु तत्त्वविषयम् : तत्र तर्कपादे साङ्ख्यादिमतमारभ्य सर्वत्र तत्त्वविषय एवासामञ्जस्यमुपपादयामास । बौद्धादिमते सत्यपि क्रियाकलापे वैदिकाद्भेदे, तदंशानौचित्यं स्थितमपि नोद्घाटयामास । किं च तत्र पादे तत्तन्निरूपितप्रक्रियायाः वेदविरोधादनादरणीयत्वं नोच्यते । तर्कमूलकप्रक्रियासु तर्कविरोधनिराकरणस्यैव चिकीर्षितत्वात् । न ह्यनुष्ठेयांशानां फलाधायकत्वानाधायकत्वान्यतरनिर्णयस्तर्कतो भवितुमर्हति । तत्तदिष्टशास्त्रप्रामाण्यतदभावान्यतराधीनत्वात् तन्निर्णयस्य । तदप्रामाण्यं च विविधदोषास्पदपुरुषनिर्मिते बौद्धादिग्रन्थे वेदविरुद्धक्रियाकलापवर्णनं पूर्वमीमांसयैव चिकीर्षितं मन्तव्यम् । एवं पाशुपतेऽपि पशुपतेर्निमित्तकारणत्वमात्रं तदिष्टं वेदविरोधादयुक्तमिति अभिप्रेतमपि

3. न्या. कु. 3. 6

कण्ठतो नोक्तम् । किं त्वनुमानत एव तैः पशुपतेर्निमित्तकारणतया स्वीकारात् आनुमानिकेश्वर-कल्पनायामनुपपत्तय एवाऽविष्कृताः । बौद्धादिमतेष्विव पाशुपते क्रियाकलापे स्थितो विरोधः पूर्व-मीमांसादर्शित एवेति तत्रोदास्त, तदपि क्रोडीकृत्य भाष्यादिषु दूषणवर्णनमित्यन्यदेतत् ।

शाङ्करस्यानुकूलता

अत एव (शाङ्कर) सूत्रभाष्ये पशुपत्यधिकरणपर्यन्तं सर्वथैवाप्रामाण्यमाशङ्क्य पाञ्चरात्राधि-करणे तदप्रामाण्यस्थापनं चिकीर्षुः पूर्वनिरूपितपाशुपतान्तमतापेक्षया पाञ्चरात्रस्य वैलक्षण्यात् तत्त्वविषये च दुर्धर्षतां स्वेष्टामाविर्भाव्य स्वल्पांशाप्रामाण्यविषयकतया तदधिकरणं निरवहत् । वेदाविरुद्धस्य वेदवत् नारायणस्यैव निमित्तत्वमुपादानत्वं च वर्णयतः पाञ्चरात्रस्य न तत्त्वविषये भवत्यप्रामाण्यम् । अभिगमनादिपाञ्चकालिकप्रक्रियया भगवदाराधनस्य च स्मृत्यन्तरोक्तप्रक्रिया-विलक्षणत्वेऽपि सर्वासामेव स्मृतीनां मिथो विरुद्धप्रक्रियाप्रदर्शकत्वदर्शनात् तद्वदेव वेदाविरोधादेव ग्राह्यत्वं विचाल्‍मिति न क्रियांशेऽप्यप्रामाण्यम् इति चाभाषिष्ट । तेन पाशुपतान्तमतग्रन्थेष्विव पाञ्चरात्रे यदि कश्चिन्मीमांसकः क्रियाकलापेष्वप्रामाण्यं वर्णयितुं प्रयतेत; मोघ एव तस्योद्योग इति शाङ्करभाष्यतो विशदम् ।

शाङ्करकृताप्रामाण्यवर्णनरीतिः

तर्हि कस्मिन्नंशे स्यादप्रामाण्यमिति चेत्-ज्ञान-योग-प्रतिष्ठा-पूजनरूपार्थचतुष्टयप्रपञ्चनपरे पञ्चरात्रे उत्तरत्रिकपरेषु भागेषु न कस्यचिदयथार्थता । यदि प्रतिष्ठां विनैव पूजनमन्वमंस्यत, तर्हि तदंशाप्रामाण्यमस्थास्यत । प्रतिमादौ देवताबुद्धिराहार्यज्ञानम्, न तु तत्र वस्तुतो देवतेति वादो लौकिकानाम्, न तु शास्त्रेष्वधीतिनाम् । न्यायकुसुमाञ्जलावुदयनाचार्यश्च देवतासंनि-धानपक्षमादर्शयत् । पञ्चरात्रव्यतिरिक्तेषु भागवत- धर्मशास्त्र-वैखानस-विष्णुधर्मादिग्रन्थेषु अप्र-तिष्ठितपूजननिषेधेन प्रतिष्ठां प्रतिष्ठापयत्सु तत्प्रतिवादो न भवितुमर्हतीति तत्प्रपञ्चकस्य

पञ्चरात्रस्य न तदंशे प्रामाण्यसंदेहः। तद्विषये पञ्चरात्रप्रतिपादितानामंशानामतीवोचितत्वं हृद्यत्वं चोपरि विषयनिरूपणावसरे व्यक्तीभविष्यति। अतः शाङ्करभाष्ये सर्वमन्यत् परित्यज्य जीवस्योत्पत्तिः जीवान्मनस उत्पत्तिश्च युक्तिविरुद्धा तत्रोच्यत इति तर्कविरोधात् तदंश एवाप्रामाण्यं सूत्रदिदर्शयिषितमिति आदावदर्शयत्। अथ जीवाद्युत्पत्तिप्रतिपादकत्वाभिमतवाक्यजातस्यार्थान्तरपरत्वमाशङ्क्य तत्पक्षेऽपि दोषं तृतीयसूत्रेणोद्घाट्य, चतुर्थसूत्रेण गुणगुण्यभेदादिकमपि पञ्चरात्रे उच्यमानं युक्तिविरुद्धमिति दर्शितमित्याह।

शाङ्करव्याख्यायाः अत्यन्तानुकूलत्वम्

एवं पाञ्चरात्रग्रन्थेषु प्रमाणभूतांशा एवाधिकाः, अल्पांश एवाप्रामाण्यमिति इतरतन्त्रवैलक्षण्यं शाङ्करेष्टम्। तद्भाष्यव्याख्यायाः भामत्याः व्याख्यायां कल्पतरौ तु सर्वेश्वरवचसामप्रामाण्यायोगादर्थान्तरं वर्णनीयमिति तदंशेऽपि प्रामाण्यमेव बादरायणाभिमतमित्याविष्कृतम्।

यथा-सिद्धान्तस्तु—

बुद्धिपूर्वकृतिः पञ्चरात्रं निःश्वसितं श्रुतिः।
तेन जीवजनिस्तत्र सिद्धा गौणी नियम्यते॥

अतः प्रमाणापहृतविषये गौणं तद्वाक्यं (तद्वचनं ?) न तु भ्रान्तं पूर्वपक्षयुक्तेः[4] इति। विष्णुस्मृतिपञ्चरात्रयोर्मध्ये विष्णुस्मृतेः स्मृतित्वेन निर्देशात् वेदमूलकतया प्रामाण्यं वक्तव्यम्। पञ्चरात्रस्य भगवदीयप्रत्यक्षमूलकतया वेदानुपजीवनेनैव प्रामाण्येऽपि भगवतस्ता दृशसर्वविषयप्रत्यक्षवत्तायाः वेदादेवावगन्तव्यतया वेदमूलकमेव प्रामाण्यावधारणमिति सर्वथा वेदाविरोधेन गौणार्थस्वीकारेण जीवादिजनिवाक्यनिर्वाहः, न त्वप्रामाण्यमिति कल्पतरोरर्थः परिमले विशदः।

कल्पतरुवाक्यार्थः

'न तु भ्रान्तं पूर्वपक्षयुक्तेः'[5] – इति कल्पतरुवाक्यस्य अधिकरणपूर्वपक्षाभिमतयुक्त्यनुसारेण

4. ब्र. सू. 2. 2. 42 कल्पतरुः
5. Ibid

जीवोत्पत्त्यादिविषयकज्ञानरूपभ्रमजनकं पाञ्चरात्रवचनं न भवतीत्यर्थः। पूर्वपक्षी हि तमर्थमादाय तेन वचनेन वेदं विरोद्धुं यतते; तर्कपादेऽत्र तथैव सर्वत्र पूर्वपक्ष्युद्यमात्। सिद्धान्ती पूर्वपक्ष्यभिमतार्थस्य युक्तिविरुद्धत्वोपपादनेन तद्वाक्यस्य वेदविरोधकत्वायोगमाह। तत्राप्रमाणत्वात् साङ्ख्यादेरिवाविरोधित्वं प्राप्तम्; भाष्योक्तं च। कल्पतरुकारस्तु यमर्थं वाक्यस्यावधार्य विरोधो दिदर्शयिषितः, तस्यार्थस्य युक्तिविरुद्धत्वादसंभवात् तदर्थस्वीकारे सर्वेश्वरस्य भ्रान्तत्वादिदोषापत्तेर्गौणार्थस्यैव स्वीकार्यतया न विरोधित्वप्रसक्तिः। एवं च पाञ्चरात्रस्य विरोधकत्वपूर्वपक्षः युक्तिविरोधात् दुर्बलत्वादविरोधित्वसिद्धान्तश्च जीवोत्पत्तिरूपयथाश्रुतार्थकत्वं वाक्यस्य कृत्वाचिन्तयेत्युक्तं भवति। इदमित्थमभिप्रेत्यैव श्रीमद्यामुनमुनिभिरागमप्रामाण्ये पाञ्चरात्रे विरुद्धांशाप्रामाण्याभिधानं भाष्ये कथमित्याशङ्क्य 'विरोधः कृत्वाचिन्तया परिहृतः'[6] इत्युक्तम्। पाञ्चरात्रे वेदविरोधकत्वं यमर्थमादाय पूर्वपक्ष्युक्तम्, तदर्थकत्वकृत्वाचिन्तया अप्रामाण्यस्वीकारेण परिहारः कृतः। कृत्वाचिन्तोद्घाटने तु नाप्रामाण्यप्रसक्तिरिति। वस्तुतः कृत्वाचिन्तां विनैवाधिकरणार्थवर्णनं संभवतीति च विस्तरेण तत्रैवागमप्रामाण्ये प्रादर्शि।

पाञ्चरात्रप्रामाण्येऽपि पादार्थसंगतिः

एवं तर्हि पाञ्चरात्रप्रामाण्यस्थापनस्याधिकरणकृत्यत्वे पादसंगतिर्न भवेत्। वेदान्तातिरिक्ततन्त्राप्रामाण्यस्थापनस्यैव पादार्थत्वादिति चेत्, तन्न। तन्त्रान्तराणां वेदान्तविरोधकत्वाभावस्थापनस्यैव पादार्थत्वात्। विरोधकत्वाभावश्च साङ्ख्यादीनां युक्तिविरुद्धार्थकत्वात् पाञ्चरात्रस्याविरुद्धार्थकत्वादिति परं विशेषः। गौणार्थवर्णककल्पतर्वाशयोऽप्येवमेवेति वक्तुं शक्यते। तत्सिद्धं शाङ्करभाष्य-तद्व्याख्यानयोः साङ्ख्यादिवत् पाञ्चरात्राप्रामाण्यं न संमतमिति।

शाङ्करयुक्तीनां बल्बजत्वम्

अपि च शाङ्करभाष्यादृता पाञ्चरात्रनिराकरणनिरूपणसरणिरतीव बल्वजप्राया वाचकानां मनसि नूनमिदं दूषणमहृदयमित्याविष्करोति। तथा हि – संकर्षणादीनां जीवत्व–

6. आ. प्रा. p. 62

मनस्त्वादिकमनङ्गीकृत्य, ईश्वरा वासुदेवा एवैते सर्वे ज्ञानैश्वर्यादिधर्मान्विता इत्यभ्युपगमे दूषणमुच्यते, सर्वेषामीश्वरत्वाविशेषे कुत एकस्मादन्यस्योत्पत्तिः ? कार्यकारणभावो हि कारणात् कार्ये कस्मिंश्चिद्विशेषे सत्येव घटते। सर्वेषां ज्ञानादौ तारतम्याभावादयुक्तः कार्यकारणभावः। किं च ब्रह्मादिस्तम्बपर्यन्तस्य सर्वस्यैव जगतस्तद्व्यूहत्वात्, किमिति तेषामेव व्यूहत्वमिति ? एवं हि दूषयन्तो रामकृष्णादीनामवतारत्वं कथमिच्छन्ति ? न च तदपि नेष्यत इति कश्चिदास्तिकोऽद्वैती व्याहर्तुमीहेत। विलक्षणविग्रहपरिग्रहादवतारत्वमिति चेत् तत् संकर्षणादिष्वप्यक्षतम्। संकर्षणादीनां ज्ञानादिगुणेषु कतिपयाविष्कारानाविष्काररूपभेदे सृष्टिस्थितिसंहाररूपव्यापारभेदे च पञ्चरात्रस्पष्टदर्शिते सति कथं तत्र कारणात् कार्ये वैषम्याभावोऽपि। ब्रह्मादिस्तम्बपर्यन्तजीवजातात् ईश्वरावतारेषु विशेषाभावं वदतां 'चतुरात्मा चतुर्व्यूहः'[7] इति सहस्रनामभाष्ये संकर्षणादिव्यूहपरतया किमिति व्याख्यातम् ? तत्र तदुत्पत्तिप्रयोजकोऽतिशयो न स्वीकृतश्चेत् तदर्थवर्णनं न युज्यते। स्वीकृतश्चेत् सूत्रभाष्ये वर्णनं न युज्यते।

भेदाभेददूषणविमर्शः

अथ 'विप्रतिषेधाच्चे'[8]ति सूत्रे ज्ञानैश्वर्यादयो गुणा इति, आत्मान एवैते भगवन्तो वासुदेवा इति गुणगुणित्वकल्पनारूपं व्याहतभाषणमित्युक्तम्। कस्तावदिह दूषणाशयः किं गुणगुणिनोस्तादात्म्यात् गुणत्वव्यवहारो न युक्त इति ? उत भेदस्य तात्त्विकत्वात् आत्मान एवैते इति तादात्म्यकथनमयुक्तमिति ? नाद्यः, गुणगुण्यभेदस्यैवेष्टत्वे गुण्युक्त्यैव गुणानां सिद्धत्वे च, 'विवक्षितगुणोपपत्तेश्च'[9], 'अदृश्यत्वादिगुणको धर्मोक्तेः' इत्यादिभिः[10] सूत्रैः किमुपदेष्टव्यमस्ति ? गुणोपसंहारपादो वा पृथक् कथम् ? सर्वत्र ब्रह्मणि धर्माणां साधनं तत्साधकधर्मान्तरवचनं च कथम् ? अथ भेद एवेष्टः तादात्म्यकथनमयुक्तमिति पक्षः, तर्हि 'अपरिग्रहाच्चात्यन्तमनपेक्षा'[11] इति सूत्रभाष्यावसाने विस्तरेण तार्किकमतनिरसने

7. वि. स. 95
8. ब्र. सू. 2. 2. 45
9. ब्र. सू. 1. 2. 2.
10. Ibid. 1. 2. 21
11. Ibid. 2. 2. 17

बद्धपरिकरैः गुणगुणितादात्म्यप्रपञ्चनेन द्रव्यगुणकर्मसामान्यविशेषसमवायेति द्रव्याद्भेदेन गुणादिनिरूपणं तार्किककृतमयुक्तमिति दूषणं कथं घटते ? व्याख्यातारश्च तत्र 'पटः शुक्लः' इत्यभेदेनैव व्यवहारः, ननु पटस्य शुक्ल इति, पटस्य शुक्लत्वमिति तु भवत्येवेति वदन्ति । कथमेतत् ?

'गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति'[12] इति शुक्लशब्दार्थद्वये कोशरूढे कथं पटस्य शुक्ल इति व्यवहारदूषणम् ? अङ्गीकृतश्चारुणाधिकरणे पटस्य शुक्लरूपमितिवत् पटस्य शुक्ल इति व्यवहारोऽपि मीमांसकैः । यदि धर्मधर्मिणोरभेदात् स व्यवहारोऽनुपपन्नः, पटस्य शुक्लत्वमित्यनुपपन्नमेव; पटाभिन्नशुक्लाभिन्नस्य शुक्लत्वस्य पटभिन्नतया षष्ठ्यनुपपत्तेः । कथं च सत्त्वं चित्त्वमानन्दत्वमित्यादयो धर्माः वस्तुतो ब्रह्मणोऽभिन्ना एव सन्तोऽपि पृथगिवावभासन्त इति भेदकल्पना भवन्मते ? तद्वत् ज्ञानादिगुणानां गुण्यात्मनामेव भेदकल्पना पञ्चरात्रकृतेति स्वपक्षरीत्यैव व्याख्याय संतोष्टव्यमत्रभवद्भिः । भवदुपवर्णितेयं युक्तिर्न सर्वहृदयसमावर्जिकेत्यपि चिन्त्यताम् । ये हि भेदाभेदवादिनो मीमांसकाः भास्कराद्वैतिनश्च ते गुण्यभेदस्य भेदस्य च गुणेषु स्वागतभाषिणः अनया युक्त्या पञ्चरात्रदूषणं न संमन्येरन् ।

अभेदारोपश्रुतिशैली

वेदवाक्येष्वत्यर्थमवगाढमनसामीदृशि वाक्यानि प्रदर्श्य दूषणवर्णनं सर्वथा न युज्यते । यत्र द्विविधव्यवहारदर्शनात् भेदाभेदप्रसक्तिरस्ति जातिगुणादौ, तत्रैव व्यवहारः स्यान्नाम । अभेदप्रसक्तिसंभावनागन्धविधुरानप्यर्थान् गृहीत्वा अभेदकल्पनयैव व्यवहारः श्रुतिशैलीति पश्यत । यथा 'अन्नं वै प्राणाः'[13] 'अकारो वै सर्वा वाक्'[14], 'ओंकार एवेदं सर्वम्'[15] 'गायत्री वा इदं सर्वम्'[16] 'इन्द्रस्त्वं प्राण ! तेजसा रुद्रोऽसि

---

12. अ. I. 5. 18
13. आकरो मृग्यः ।
14. ऐत. 3. 6. 7.
15. छा. 2. 24. 4
16. Ibid. 3. 12. 1.

परिरक्षिता'[17] 'त्वमन्तरिक्षे चरसि सूर्यस्त्वं ज्योतिषां पतिः'[18] इत्यादि । 'प्राणस्येदं वशे सर्वम्'[19] इति रीत्या कमपि संबन्धमादायात्यन्तभिन्नेष्वत्यभेदव्यवहारभूयस्तामाम्नायेषु सर्वत्र पश्यन्तस्तार्किकाः द्वैतिनश्च 'तत्त्वमसि' 'सर्वं खल्विदं ब्रह्म' इत्यादीन्यद्वैतपराणि वाक्यानि विलोक्य न चित्रायमाणचेतसो भवन्ति ; रूपण-गौणार्थव्यवहरणपरिपाट्याः श्रुतौ सहजत्वादिति । एवं स्थिते भेदाभेदस्य यत्र दोलायमानता, तत्र गुणगुणिस्थले पञ्चरात्रं द्विविधव्यवहारं करोतीत्येतावता तदप्रामाण्यं न कश्चिदुत्प्रेक्षेत । गुणगुणिभेद एव तदिष्ट इति तत्त्वं त्वन्यत्र द्रष्टव्यम् ।

ईश्वरत्वमेव च संकर्षणादीनां तदिष्टम् । जीवमनोऽहंकारशब्दैः संकर्षणप्रद्युम्नानिरुद्ध व्यवहारस्तु 'तं पृथिव्यब्रवीत्' इत्यादिवत् तत्तदभिमानित्वप्रयुक्तः । न तु जीवस्योत्पत्तिर्वा जीवान्मनस उत्पत्तिर्वा तत्रोक्ता । किं तु जीवाभिमानी संकर्षणो वासुदेवात्; मनोभिमानी च प्रद्युम्नः संकर्षणात् । अत्र सूत्रकारेण, 'मनसोऽहंकारोत्पत्तिः पञ्चरात्रोक्ता न युज्यते' इत्यंशः पूर्वपक्षे न स्पष्टमुक्तः 'न च कर्तुः करणम्'[20] इति मन उत्पत्तिमात्रायोगोक्तेः । श्रुतिप्रतिपादितरीत्या अहंकारतत्त्वादेवेन्द्रियान्तरवदेव मनसोऽप्युत्पत्त्या मनसोऽहंकारोत्पत्तिवचनस्यायुक्तत्वेऽपि अत्र तर्कपादे तर्कमूलकस्य विरोधस्यैवोद्भावनीयत्वात् । अहंकारमनसोर्हेतुहेतुमद्भावस्य तर्कमूलकत्वायोगात् । युक्त्या तु मनस्तोऽहंकारस्योत्पत्तिर्युज्यत एव । अहंकारशब्दस्य गर्व एव लोकप्रसिद्धेः । गर्वो मनोजन्य इत्यस्य निर्विवादत्वादित्यन्यदेतत् ॥ लक्ष्मीतन्त्रे च संकर्षणादिव्यूहविषये प्रयुक्तानां जीवमनोहंकारशब्दानां भाव एवं वर्णितः-

संकर्षणादयो देवास्त्रय एते पुरातनाः ॥
जीवो बुद्धिरहंकार इति नाम्ना प्रकीर्तितः ।
नैवेते प्राकृता देवाः किं तु शुद्धचिदात्मकाः ॥
आदिव्यूहस्य देवस्य वासुदेवस्य दीव्यतः ।
तत्तत्कार्यकरत्वेन तत्तन्नाम्ना निरूपिताः ॥[21] इति ।

---

17. प्रश्न 2.9
18. Idib
19. प्रश्न 2.13
20. ब्र. सू 2.2.43
21. ल. त. 6.12-4

जीव-मन-आदिशब्दानामभिमानिपरदेवतापरत्वमभिप्रेत्यैव महाभारतेऽपि शान्तिपर्वणि वासुदेव मूर्तिः संकर्षणस्य जन्म कथयित्वा,

स हि संकर्षणः प्रोक्तः प्रद्युम्नं सोऽप्यजीजनत् ॥
प्रद्युम्नादनिरुद्धोऽहं सर्गो मम पुनः पुनः । [22]

इति भगवदवतारत्वेनैते दर्शिताः । दर्शितमिदमस्माभिः परमार्थभूषणे । अहिर्बुध्न्यसंहिता च शुद्धसृष्टिनिरूपणावसरे

निर्दोषा निरनिष्टाश्च निरवद्याः सनातनाः ॥[23]

इति व्यूहानामीश्वरत्वमेव प्रदर्शयन्ती ,

सर्वशक्तिमयो देवो वासुदेवः सिसृक्षया ॥
विभजत्यात्मनाऽऽत्मानं.......................... ॥[24]

इत्यारभ्य तद्गुणकार्यवैलक्षण्यं प्रदर्श्य, संकर्षणप्रद्युम्नानिरुद्धानां

शास्त्रशास्त्रार्थतत्साध्यफलनिर्वाहका इमे ॥ [25]

इति ज्ञापनानुष्ठापनकालप्रमाणरूपकार्यभेदमपि संगृह्य व्यूहानां, व्यूहान्तरभूतानां केशवादीनां द्वादशानां विभवानां च नवत्रिंशतः पद्मनाभादीनां निर्देशं विधाय, एतद्विस्तरः साक्षाद्भगवदुक्तायां सात्वतसंहितायां द्रष्टव्य इति स्पष्टमाह—

यतश्चैषां समुत्पत्तिर्यो व्यापारो यदायुधम् ॥
या मूर्तिर्यादृशी चैव यत्र चैते व्यवस्थिताः ।
सात्त्वते शासने सर्वं तत्तदुक्तं महामुने ॥ [26] इति ।

प्रत्यहं सन्ध्योपासने केशवादींस्तर्पयामः के ते केशवादय इत्यत्र यदि तत् पञ्चरात्रं विशदयति कथं तदस्माकं सर्वेषामुपजीव्यं न भवेत् ? तथा च, परवासुदेवात् व्यूहवासुदेवस्य गुणसाम्येऽपि

---

22. म. भा. 12. 326. 68, 9
23. अहि. 5. 41
24 Ibid 5. 29, 30
25. Ibid 5.24
26, Ibid 5.57-8.9

विग्रहविशेषपरिग्रहजगद्व्यापारौन्मुख्यादिना अतिशयः संकर्षणप्रद्युम्नानिरुद्धानां गुणविशेषानाविष्कारक्रियाभेदादितोऽपि व्यूहचतुष्टयेऽपि चातुर्विध्यं प्रदर्श्य जाग्रत्स्वप्नसुषुप्ततुरीयावस्थारूपजीवसाम्येन तत्रापि भूषणायुधपरिस्थितिवैषम्यतोऽप्यतिशयः इत्येवंकारणात् कार्येऽतिशयं पञ्चरात्रग्रन्थेषु घोषयत्सु उत्प्रेक्षामात्रेण विकल्प्य दूषणं नूनं यथावद् दूषणमशक्यमित्यावेदनाय पर्याप्तमिति निश्चिनुमः । अतोऽवतारत्वायोगगुणगुणिविवेकादिदूषणमतिस्थूलम् ।

अथापरं दूषणं,पञ्चरात्रेण वेदनिन्दनात् तस्याप्रमाणतेति । तदुपपादनं चैवम्-' चतुर्षु वेदेषु परं श्रेयोऽलब्ध्वा शाण्डिल्य इदं शास्त्रमधिगतवान् '[27] इति इत्युक्तमिति । अत्र वक्तव्यं सर्वमागप्रामाण्य एव श्री भगवद्यामुनमुनिभिरुक्तम्, अनूदितं च श्रीभाष्ये । 'परं श्रेयोऽलब्ध्वेति शङ्करोक्तं, ' पुरुषार्थमलभमान' इति आगमप्रामाण्ये [28] 'साङ्गेषु वेदेषु निष्ठामलभमान': [29] इति श्रीभाष्ये च । निष्ठापदं च विष्णुतिलके प्रयुक्तमस्ति—

अधीताः सकला वेदाः सप्रतीका न संशयः ॥
निष्ठामलभ्भमानास्ते त्वामेव शरणं गताः । [30]

इति । श्रेयआदिपदप्रयोगेऽपि तदलाभो नाम तदनिर्धारणमेव । तथा चोदाहृतं श्रीभाष्ये —

अधीता भगवान् वेदाः साङ्गोपाङ्गाः सविस्तराः ।
श्रुतानि च मयाऽङ्गानि वाकोवाक्ययुतानि च ॥
न चैतेषु समस्तेषु संशयेन विना क्वचित् ।
श्रेयोमार्गं प्रपश्यामि येन सिद्धिर्भविष्यति ॥ [31]

इति । न ह्यत्र वेदबाह्यैरेव वेदतदङ्गानामुपेक्षितत्वमुपेक्षणीयत्वं वोच्यते । किं तु सश्रद्धमधीतादधीयमानाच्चापि तद्वर्गात् निःसंशयनिष्कृष्टनिखिलार्थज्ञानलाभराहित्यमेव । यदि कश्चि_

---

27. ब्र. सू. शा. भा. 2.2. 45.
28. आ.प्रा. P 47
29. श्रीभा. 2.2. 42
30. वि.ति 1.10,1
31. श्रीभा. 2.2. 42

देवं ब्रूयात्—अधीत्यैव सम्यगुपनिषदः, अधीत्य च ब्रह्मसूत्राणि, तथा नाद्वैततत्त्वं निष्कष्टुं पार्यते, यथा शाङ्करभाष्यादिति, तावता न वेदानांशारीरकबाह्यता स्यात्। अधीत-शाङ्करभाष्यतद्व्याख्याभ्योरपि भामतीप्रस्थानात् प्राक्तनार्थनिष्कर्ष आसीदिति यदि कश्चिद् वाच स्पतिं स्तौति, नासौ शङ्करबाह्यो भवेत्। बहु चात्रोदाहृतमागमप्रामाण्ये 'यथा ऐतरेयब्राह्मणे 'प्रातः प्रातरनृतं ते वदन्ति' इत्यनुदितहोमनिन्दा उदितहोमप्रशंसार्थेति गम्यते, यथा च मानवे-

ऋग्वेदो देवदैवत्यो यजुर्वेदस्तु मानुषः।
सामवेदस्तु पित्र्यः स्यात् तस्मात् तस्याशुचिर्ध्वनिः॥

इति सामवेदनिन्दा तदितरवेदप्रशंसार्था, यथा वा भारते-

चत्वार एकतो वेदाः भारतं चैकमेकतः।
समागतैः सुरर्षिभिस्तुलयाऽऽरोपितः पुरा॥

इति सर्ववेदनिन्दा च-

महत्त्वे च गुरुत्वे च ध्रियमाणं यतोऽधिकम्।
महत्त्वाच्च गुरुत्वाच्च महाभारतमुच्यते॥

इति महाभारतप्रशंसार्थेति गृह्यते न वेदनिन्देति एवं पाञ्चरात्रप्रशंसेति गम्यते"[32] इति। पदे पदे चतुरोऽपि वेदान् प्रशंसन्ति वेदवेदान्तपारगानेव पुरस्कुर्वन्ति वेदार्थभूतकर्मब्रह्मयथा-वस्थितस्वरूपग्रहणार्थमेव प्रवृत्तानि पञ्चरात्राणि 'तन्निन्दनानी'ति कश्चिद् विवेकी विदुषांसंनिधौ कथं व्याहरेत्?

एवमन्यन्तफल्गुद्वित्रदोषारोपणमुखेन दूषणोद्भावनं विहाय, मुक्तकण्ठं पाञ्चरात्रस्य-वेदान्तवेद्यजगन्निमित्तोपादानभूतनारायणरूपतत्त्वैकपरत्वात्, तदाराधनभूताबाधिताभिगमनादिपाञ्च कालिकक्रियाकलापप्रतिपादकत्वाच्च न पाशुपतादिवत् दूषणीयत्वमस्तीति शाङ्करभाष्यं घुष्यतीति, तद्व्याख्याकोटिस्थः कल्पतरुश्च कार्त्स्न्येन प्रामाण्यं पाञ्चरात्रे प्रतिष्ठापयतीति च स्थिते, पश्चा त्तैः शैवमतप्रविष्टैराग्रहयालुभिरयथायथानेकप्रक्षेपप्रगल्भजनप्रीणनानि सहृदयविसंवादीनि उच्चा-

32. आ.प्रा. P 48

वचानि वचांसि व्याहृतानि न प्राज्ञैः प्राचीनाद्वैतसरणिमनुसरद्भिरास्तिकैर्हरिभक्तैरादरणीयानि स्युः ।

दर्शितं शाङ्कराद्वैतिहृदयम् , यावदप्रकाशाख्यस्य जगत्सत्यत्वपरस्याद्वैतिनो महोपनिषदादि प्रामाण्येन नारायणपारम्याभिसन्धिमिव, पाञ्चरात्रे प्रकृष्टमभिमानं च श्रीमद्वेदान्तदेशिकाविरचितात् तात्पर्यचन्द्रिकाग्रन्थात् निश्चिनुमः । तत्र हि (गी-11.53.4) एवमलेखि-

एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ।[33]

इत्यस्य व्याख्याने यादवप्रकाशैश्चोक्तम्–इदमल्पीयसीं योगसिद्धिं गतस्य मृतस्य फलम् । यदि प्रथमां योगसिद्धिं गतो म्रियते. त्यजति वा योगम्, श्वेतद्वीपे जायते, भगवत्सालोक्यं वा याति । यदि ततोऽप्यधिकां योगसिद्धिं गतो म्रियते विष्णुपार्षदो भवति । यदि ततोऽप्यधिकां पार्षदेश्वरो भवति । यदि ततोऽप्यधिकां द्वारपालो भवति । यदि ततोऽप्यधिकां भगवतोऽङ्गसंवाहको भवति । यदि ततोऽप्यधिकां मन्त्रिस्थानीयः पृथगैश्वर्ययुक्तो भवति, यदि पूर्णां योगसिद्धिं गतो म्रियते, भगवत्सायुज्यं गतो मुक्तः परमैश्वर्ययुक्तो भवति– इति वैष्णवेषु योगशास्त्रेषु मर्यादा इति '[34] इति । 'भास्कराद्वैतिनस्तु त्रिदण्डिनो वैष्णवा '[35] इति मनुस्मृति-व्याख्यानात् कुल्लूकभट्टीयादितोऽवगम्यते । अथवा किमनेनाप्रसिद्धमतप्रस्तावेन । द्वैतिनः सुदर्शनपाञ्चजन्यमात्रधारणमुपेक्ष्य ततपञ्चायुधीधारणप्रतिष्ठापकाः पाञ्चरात्रे प्रामाण्यातिशयं वदन्तीति प्रत्यक्षमेतत् । तदेवं मतत्रयाभिमते प्रामाण्ये किमत्र विचारणीयमस्ति ? औत्तरेषु मतान्तरेष्वप्येवं द्रष्टव्यम् ।

अस्तु कामं प्रमाणं पञ्चरात्रम् । तदधिकारिणोऽन्ये । अस्माकं तु न ततः किंचिदिति केचित् प्रत्यवतिष्ठेरन् । तत्रोच्यते वक्तव्यं भारतं प्रदश्य । एवमप्रकम्प्यस्य पाञ्चरात्रप्रामाण्यस्य प्रथमग्राहकं हि प्रथते महाभारतम् । अत एव भगवान् बादरायणस्तदप्रामाण्यं नैव स्थापयेदिति निश्चित्य तत्प्रामाण्यस्थापनपरतयैव उत्पत्त्यसंभवाधिकरणं योजितं विशिष्टाद्वैतिभिः द्वैतिभिश्च शाक्तमताप्रामाण्यपरतया । तत्र आदिपर्वणि उपरिचरवसुं प्रस्तुत्य ।—

33- भ. गी. 6. 42
34. भ. गी. 11–53,4 ता.च.
35 भाकरो सूर्यः ।

राजा उपरिचरो नाम वसुः पौरवनन्दनो धर्मनित्यो मृगयाशीलो यदा न्यस्तशस्त्रस्तपश्चचार तदा देवैः सहेन्द्रैः, इन्द्रत्वार्हो राजाऽयं तपसेत्यनुचिन्त्य सान्त्वेन तं निवारयन्, तस्मै देवोपभोग्यं स्फाटिकमाकाशगं विमानं संग्रामे संरक्षितां वैजयन्तीमिन्द्रमालां शिष्टपरिपालिनीं वैष्णवीं यष्टिं च प्रदाय उर्वरादिशालिचेदिराज्यरक्षणव्यापृतं चकार। राजा ततः प्रभृति उपरिचर इति ख्यातः प्रतिवत्सरमिन्द्रतृप्तये इन्द्रध्वजमहोत्सवमपि कुर्वन् आस। तस्य भार्यायां गिरिकायाम् ऋतुस्नातायां प्रतीक्षमाणायामपि पितॄणां नियोगात् मृगयार्थे वनं गतः तत्र तामभिरूपां चिन्तयन्नेव स्कन्नरेताः स्वप्रभावबलात् श्येनद्वारा तद्रेतो भार्यायै अमोघत्वाय प्रेषयामास। मध्येपथं पाथसि पतितं रेतो मत्स्यया कयाचित् गृहीतं तत् पुत्रस्य दुहितुश्च हेतुर्बभूव। अद्भुते शिशुद्वये प्रजाभिर्वसवे राज्ञे अर्पिते सति स पुरुषशिशुं प्रतिग्रह्य स्त्रीशिशुं दाशायैव ददौ। सा मत्स्यगन्धा सत्यवती पराशरपरमर्षिपरिग्रहीता कृष्णद्वैपायनं जनयामासेति इतिवृत्तम्।

एवं स्वमातामहपदस्थितं माननीयमुपरिचरवसुमेवाधिकृत्य तत्र पर्वान्तरे व्यासो बभाण– "पिष्टपशुयजनपराणां विप्राणां पशुमांसलोलुपानां च दिवौकसां विवादे मध्यस्थीकृतो वसुः देवपक्षः क इति तन्मुखेन विज्ञाय तदनुकूलं कथयामास। शास्त्रविरुद्धवादितया पतेति विप्रर्षिभिरुक्तः।

उपरिचरस्थाद् भ्रष्टः पातालं प्रविष्टः क्रमेण भगवदनुग्रहात् लब्धोच्छ्राय इति। तदिदं सर्वं वसोः पौरवनन्दनस्य त्रयीधर्मनिरतत्वं सर्वदेवभक्तत्वं स्पष्टमावेदयति। अयमेव क्रमेण पञ्चकालपरायणो भूतः—

पञ्चकालविदो विप्रास्तस्य गेहे महात्मनः।
प्रापणं भगवद्भक्त भुञ्जते चाग्रभोजनम्॥[36]

इति पञ्चरात्रोक्तपञ्चकालप्रक्रियापरः प्रत्यक्षितभगवद्रूपपिष्टपशुयगानुष्ठितवान् बृहस्पतिं पुरोहितं पुरस्कृत्य भगवते हविरर्पयामास, तदा भगवता प्रत्यक्षीभूय हविर्ग्राहि। परं तु बृहस्पतिः–

---

36 म॰ भा॰ 12. 335. 25

कथमयं विष्णुर्न मे प्रत्यक्षः ?

त्वया पशुर्वारितश्च कृतः पिष्टमयः पशुः ।[37]

त्वं देवं पश्यसे नित्यं न पश्येयमहं कथम् ।[38]

इति चुक्रोध । वसुश्च,

पशुहिंसा वारिता च यजुर्वेदादिमन्त्रतः ।

अहं न वारये हिंसां द्रक्ष्याम्यैकान्तिको हरिम् ॥[39]

इति प्रतिवदन् सान्त्वयामास ।

अत्र च सदस्यैः एकतद्वितत्रितादिभिरुक्तम्-वयं हि ब्राह्मणाः पुत्रा मानसाः तप्त्वा वर्षसहस्राणि काष्ठभूताः मेरोरुत्तरभागे क्षीरोदस्यानुकूलतः, तदुत्तरतः श्वेतद्वीपे सन्ति महान्तः गच्छतेति अशरीरवाक्प्रेरिताः, मानसजपपरान् कृताञ्जलिपुटान् 'जितं ते पुण्डरीकाक्ष '[40] इत्यादि वदतः पञ्चकालज्ञान् परमैकान्तिनः श्वेतान् अनन्यान् अद्राक्ष्म । तत्र शब्द आसीत्- 'यथा गतं निवर्तध्वं , नात्र भवद्भिर्द्रष्टुं शक्यो भगवान् । प्राप्ते त्रेतायुगे वैवस्वतेऽन्तरे सहाया भविष्यथ ' इति । एवं सुतपसा हव्यकव्यैश्च देवोऽस्माभिर्न दृष्टः सः कथं त्वं द्रष्टुमर्हसि ' इति ।

अनेन च वस्वादेः पञ्चकालिकश्वेतद्वीपवासिसाम्यम् , त्रयीधर्मनिष्ठबृहस्पतिप्रभृतिभिरपि पाञ्चकालिकप्रक्रियाया आदरणीयत्वं पञ्चकालपरायणैरपि वैदिकयज्ञादियथावदनुष्ठानपरत्वं च सिद्धम् । इमे एकतादयश्च पश्चात् पञ्चरात्रप्रवर्तकाः ।

आश्वमेधिके च वैष्णवधर्मशास्त्रपर्वणि त्रयीनिष्ठधर्मप्रतिपादके युधिष्ठिरेण भगवान्-कथं त्वमर्चनीयोऽसि मूर्तयः कीदृशास्तु ते । वैखानसाः कथं ब्रूयुः कथं वा पाञ्चरात्रिकाः ।[41]

37 Ibid 12. 806 5pr
38 Ibid 12. 806 6pr
39 Ibid 12. 806 7pr
40 Ibid 12. 336. 44
41 Ibid 14. App. 4. 1652 pr

इति पृष्टः अष्टाक्षरद्वादशाक्षरादिवैदिकमन्त्रैः वैखानसोक्तपुरुषसत्याच्युतानिरुद्धसंज्ञाभिर्वा पाञ्चरात्रिकोक्तवासुदेवसंकर्षणप्रद्युम्नानिरुद्धसंज्ञाभिर्वा आराधयेत् । संज्ञाभेदमात्रं न मूर्तिभेद इत्युपवर्ण्य—

> अनन्यदेवताभक्ता ये मद्भक्तजनप्रियाः ।
> मामेव शरणं प्राप्तास्ते मद्भक्ताः प्रकीर्तिताः ॥[42]

इत्यादिना यथार्थभक्तलक्षणानुष्ठानादिकमप्यदर्शि ।

> वेदैश्चतुर्भिः समितं कृते मेरौ महागिरौ ॥
> आस्यैः सप्तभिरुद्गीर्णं लोकधर्ममनुत्तमम् ।[43]
> इदं महोपनिषदं चतुर्वेदसमन्वितम् ।
> साङ्ख्ययोगकृतान्तेन पञ्चरात्रानुशब्दितम् ॥
> नारायणमुखोद्गीतं नारदोऽश्रावयत् पुनः ।
> ब्रह्मणः सदने तात यथादृष्टं यथाश्रुतम् ॥[44]
> अत्र धर्मार्थकामा हि मोक्षः पश्चाच्च कीर्तितः ।[45]
> अस्मात् प्रवक्ष्यते धर्मान् मनुः स्वायम्भुवः स्वयम् ॥
> उशना बृहस्पतिश्चैव यदोत्पन्नौ भविष्यतः
> तदा प्रवक्ष्यतः शास्त्रं — — — — — —[46]

इति पद्येषु एकैकं पदमप्यवधानमर्हति । देश--काल–प्रवर्तक--वक्तृ–श्रोतृ–प्रबन्ध–तदुक्तधर्म–तदनुष्ठातृ--तत्फल-- तत्प्रदायिदेवतादिवैलक्षण्यं विविच्य महाभारतं पञ्चरात्रप्रामाण्यं परमादरेण प्रतिष्ठापयतीति स्थापितं श्रुतप्रकाशिकायाम् । भारते एव शान्तिपर्वणि [336] अध्याये—

---

42 Ibid 14. App. 4. 1668 pr
43 Ibid 12. 335. 28cd, 9ab
44 Ibid 12. 326. 100, 1
45 Ibid. 335. 33ab
46 Ibid 12. 335. 44cd. 5abc

अहो ह्येकान्तिनः सर्वान् प्रीणाति भगवान् हरिः ।

विधिप्रयुक्तां पूजां च गृह्णाति शिरसा स्वयम् [47]

इत्यारम्य चतुर्मुखस्य मानसे जन्मनि ततः फेनपद्वारा वैखानसैः, चाक्षुषे जन्मनि च ततः सोमरुद्द्वारा वालिखिल्यैः वाचिके च जन्मनि सुपर्णर्षिप्रभृतिभिः एकान्तिधर्मः प्राप्तः । पुनः श्रौत्रे जन्मनि नारायणः— धर्मं च मत्तो गृह्णीष्व सात्वतं नाम नामतः ।

तेन सृष्टं कृतयुगं स्थापयस्व यथाविधि ॥[48]

इत्युक्त्वा उपदिदेश ।

ततो हि सात्वतो धर्मो व्याप्य लोकानवस्थितः ॥[49]

स्वारोचिषमनुसनत्कुमारादिभिरधीतः । एष एव धर्मः अण्डजे तस्मिन्बर्हिषतद्वारा प्राप्तप्रचारः । अस्मिंश्च पश्चात् जन्मनि पितामह - दक्ष - तद्दौहित्र - विवस्वत् - मनु - इक्ष्वाकुप्रभृतिभिरधीत इति सात्त्वतधर्मः सर्वसाधरणत्वेन दर्शितः । अष्टमश्लोके अर्जुने विमनस्के च 'गीता भगवता स्वयम्' इति अस्य च गीतार्थस्य चैक्यमुक्तम् । एवं,

ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च कृतलक्षणैः ।

अर्चनीयश्च सेव्यश्च नित्ययुक्तैः स्वकर्मसु ॥[50]

द्वापरस्य युगस्यान्ते आदौ कलियुगस्य च ।

सात्त्वतं विधिमास्थाय गीतं संकर्षणेन यः ॥,[51]

गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः ।

य इच्छेत् सिद्धिमास्थातुं देवतां कां यजेत सः ॥ [52]

इत्यादिना सर्ववर्णसर्वाश्रमसाधारण्यं स्वस्वशाखासूत्रादिनियतधर्माचरणपरायणैरेव सर्वैरविशेषेण पाञ्चरात्रिकभगवदाराधनप्रक्रियायां पाञ्चकालिकपद्धतिभासुरायाः परिग्राह्यत्वं च दर्शितमेव ।

---

47 Ibid 12. 336. 1
48 Ibid. 12. 336. 27
49 Ibid. 12. 336. 31cd
50 Ibid. 6. 62. 38
51 Ibid. 6. 62. 39
52 श्र भा. 2. 2. 42

एवं वैखानसमार्गस्य परमैकान्तिधर्मस्य वैदिकत्वाविशेषेऽपि विखनःसूत्रानुसारिमहाजनव्यतिरिक्त वैष्णवानुष्ठेयतायां विस्पष्टगमकादर्शनात् अस्यैव ' लोकधर्ममनुत्तमम् '[53] इति अत्युत्कृष्टलोक धर्मत्वकीर्तनात् व्यासादिभिस्तस्य सर्वानुष्ठेयत्वेनाप्रदर्शितत्वाच्च अवैखानसाः तां पद्धतिं पुरस्कुर्वन्तोऽपि न स्वयमनुतिष्ठन्ति ।

पाञ्चरात्रग्रन्थेष्वपि च पाञ्चरात्रिकत्वेन ये केचित् प्रसिद्धाः तदन्यैरपि तत्प्राक्रियायाः अनुष्ठेयत्वमधिगम्यते । यथा पाद्मे—

आद्यमेकायनं वेदं सद्ब्रह्मप्रतिपादकम् ॥
तेनैव संस्कृता विप्रा मुख्यकल्पाधिकारिणः ।
अन्येषां ब्राह्मणादीनां वर्णानां दीक्षया क्रमात् ॥"[54]

इति सर्वेषां पाञ्चरात्रसंबन्धः प्रत्यपादि । अस्यायमर्थः- एकायनशाखाख्यवेदमूलकपाञ्चरात्र सिद्धान्तेषु चतुर्षु स्थिताः तद्रीत्यैव निषेकादिसंस्कारभाजः आलयेषु भगवन्तमर्चितुमर्हन्ति । ये त्वन्ये वेदवृक्षोपरितननानाशाखाध्यायिनः तत्तत्सूत्रोक्तरीत्या निषेकादिसंस्कारभाजः, तेऽपि पाञ्चरात्रोक्तां दीक्षां प्राप्य तदर्चने अधिक्रियन्त इति । अन्येषां पाञ्चरात्रसंबन्धस्यानुचितत्वे एवमालयेष्वनुमतिर्नैव स्यात् । श्रीविष्णुतिलके च -

सर्वास्वपि च दीक्षासु पञ्चसंस्कारसंज्ञिता ।
दीक्षा श्रेष्ठतरा प्रोक्ता सैव प्रीतिकरी हरेः ॥
तापः पुण्ड्रस्तथा नाम मन्त्रो यागश्च पञ्चमः ।
पञ्चसंस्कारदीक्षैषा देवदेवप्रियंकरी ॥
अनया दीक्षितो यस्तु स सर्वत्राचरेत् क्रियाम् ॥"[55]

इति अगस्त्यायोपदिष्टं चतुर्मुखेन । प्रायः श्रीविष्णुतिलकाख्यः पाञ्चरात्रग्रन्थः सांप्रतिक श्रीवैष्णवसर्वसमयाचारमूलमित्यपि सुवचम् ।

---

53 म. भा. 12.804. 2 post
54 पा. च. 1. 5. 6
55 वि. ति. 1. 164-6ab

याज्ञवल्क्यादृतत्वम्

अत्रिग्रन्थे च वैखानसे ,

> आपत्काले च संप्राप्तं याज्ञवल्क्यादिभिः क्रमात् ।
> एकायनगतैर्मन्त्रैः संमिश्र तान्त्रिकं स्मृतम् ॥[56]

इति पाञ्चरात्रस्य नियतपाञ्चरात्रचतुर्वेदाधिकारिभिन्नैर्याज्ञवल्क्यादिभिरादृतमिति प्रशंसनात् अन्येषामपि पाञ्चरात्राधिकारो वैखानसैरप्यभिमत इ: ज्ञायते ।अत्र याज्ञवल्क्यप्रस्तावादिदमपि वक्तव्यं भवति ।अधुना पाञ्चरात्रालयेषु पाम्पर्येणाधिकृतास्तवत् शुक्लयजुर्वेदशाखामधीयानाः कात्यायनसूत्रनिष्ठाः । तच्छाखाप्रवर्तकश्च भगवान् याज्ञवल्क्यः । अडैयारमुद्रितलक्ष्मीतन्त्र ग्रन्थोपोद्घाते काण्वशाखामहिमसंग्रहाख्यात् नागेशनिर्मितात् ग्रन्थादिमे श्लोका उदहृियन्त—

> इयं शुक्लयजुःशाखा प्रथमेत्यभिधीयते ।
> मूलशाखेति चाप्युक्ता तथाचैकायनीति च ॥
> अयातयामयजुषा तथा मोक्षैकसाधिका ।
> इत्याद्यनेकनामानि सन्त्यस्यास्तत्र तत्र वै ॥
> तत्तन्नामनिमित्तानि युक्तियुक्तानि भूरिशः ।
> कथितानि च माहात्म्ये तत्तदाख्यासु शोभते ॥ "[57] इति ।

विष्णुपुराणादिषु योगयाज्ञवल्क्यचरितं प्रसिद्धम् । वैशम्पायनाद् वेदमधीतवान् याज्ञवल्क्यो गुरावत्यन्तभक्तोऽपि गुर्वानुकूल्यपरोऽपि सब्रह्मचारिजनावधीरणभावनया गुरुणा ' अधीतं विसृज्य गच्छ ' इत्याज्ञप्तःयोगबलात् मांसरूपेण मुखान्निष्कास्य आदित्यमुपास्य गुर्वज्ञातं वेद भागं दातुमभ्यर्थ्य अयातयामां शुक्लयजुःशाखां लेभे ' इति । तद्वान्तमांसरूपं च वेदं सहाध्यायिनः तित्तिरिपक्षिणो भूत्वा जगृहुरित्युक्तं तत्र । तेन तैत्तिरीयाध्येता याज्ञवल्क्यः आदित्या

56 स. 78. 4,
57 क. स. उ. p. 6

दन्यां यजुःशाखां लेभे इति स्थिते विचार्यमिदं कथं शाखान्तरमुपदिष्टमादित्येनेति ? नूनं तस्याः शाखायाः एकायनैकदेशत्वात् एकायने च मूलभूते सर्वेषामधिकारात् तदुपदेशो नायुक्तः अनुवर्ततां चायं कात्यायनसूत्रमेव इत्यादित्यो मेने। अयातयामत्वविशेषणं च एकायनान्तर्भाव मवगमयति। एकायनस्यैव भगवदेकान्तधर्मत्वात् नानाजन्मकालविलम्बेनापि सर्वग्राह्यत्वाद-यातयामत्वम्। देवतान्तराराधनपरभागरूपश्च वेदः कदाचिद्ग्राह्यः अन्यदोपेक्ष्यश्चेति यात यामः। अस्ति च कश्चित् शुक्लयजुर्वेदस्य विशेषः, यद् ईशावास्योपनिषत् तदीया कर्मकाण्डे संहिताभाग एव जागर्ति। एवं परब्रह्मपरोपनिषद्भागस्य वेदान्तरे कर्मकाण्डेऽनुपलम्भात् शुक्लयजुष एकायनान्तर्गतत्वस्योपष्टम्भकमिदम्। कर्मणां परब्रह्माराधनरूपत्वेनैवोपदेशो ह्येकायने। तदर्थमेव चेयमुपनिषदिति। ततश्चाविशेषात् याज्ञवल्क्यादिवत् सर्वे पाञ्चरात्रविहित भगवदाराधनाधिकारिण इति सिध्यति। तैत्तिरीयाद्यनुसारिणो वैखानसस्यपि मूलभूततदन्यवेदानुरोधादेव भगवत्परत्वमिति तद्व्यक्तम एव दर्शितं वैखानसविजये॥

श्रीभागवतादपि साधारण्यसिद्धिः

श्री भागवते चैकादशे उद्धवेन पृष्टः श्रीकृष्णः वैखानसपाञ्चरात्रप्रक्रियाः प्रब्रुवन् वैदिकस्तान्त्रिको मिश्रः [58] इति त्रेधा विभज्य प्रतिष्ठितप्रतिमाद्यर्चनपद्धतिं प्रपञ्चयन्,

'उभाभ्यां वेदतन्त्राभ्यां मह्यं तूभयसिद्धये' [59]

इति वैदिकानामेवापेक्षितांशादरणं तन्त्रतः समुचितमित्यावेदयति।

वैखानसैरप्युपजीव्यत्वम्

किं बहुना, वैखानसैरपि पाञ्चरात्रमुपजीव्यं मन्त्रकल्पादाविति श्रीदेशिकैरदर्शि। अष्टाक्षरादयो भगवन्मन्त्रा अन्ये च वैदिकाः वैखानसादृताः ये, तेषां सिद्धिप्रकारः मन्त्रोद्धारप्रकारः

---

58 भा. 11. 27. 7
59 Ibid. 11. 27. 26

इत्यादिकं पाञ्चरात्र एव बहुषु ग्रन्थेषु विशदम् । तत्तन्मन्त्राणां स्थूलपरसूक्ष्मरूपेणार्थभेदाः अहिर्बुध्न्यसंहितादौ वर्ण्यन्ते । यथा च याज्ञवल्क्यादिषु प्रतिमार्चनप्रणमनादिविधायकेषु स्मृतिग्रन्थेषु जागरूकेष्वपि प्रतिमानिर्माणप्रकारः, प्रतिष्ठापनप्रकारः, पूजनपद्धतिविस्तरः इत्यादि विषये सर्वैर्वैखानसं पाञ्चरात्रे चोपजीव्यम्, अन्यत्र सर्वस्यासमग्रत्वात् , सिद्धवत् कथनप्रायत्वाच्च तेषाम्-तथा मन्त्रविषयन्यासजपसाधनादिविषये वैखानसेनापि पाञ्चरात्रमुपजीव्यं भवति ।

बहुभ्यश्च महद्भ्यश्च शास्त्रेभ्यो मतिमान् नरः ।
सर्वतः सारमादद्यात् पुष्पेभ्य इव षट्पदः ॥[60]

इति न्यायात् सर्वतः सर्वापेक्षितग्रहणं युज्यते ।यद्यपि वैखानसाः पाञ्चरात्रोक्तां पञ्चसंस्कार-दीक्षां प्रायः स्वयं नाद्रियन्ते । श्रीकृष्णेन द्वारकायां,

नामुद्रिताः प्रवेष्टव्याः यावदागमनं मम । [61]

इति शङ्खचक्रलाञ्छनरहितजनप्रवेशनिषेधात् वैखानसावैखानसवैदिकतान्त्रिकसर्ववर्णसाधारण्य मेवेति ज्ञायते । अथापि वैखानसैस्तत्तशङ्खचक्रधरणाभावेऽपि लाञ्छनस्यान्यादृशस्य संमत्या तावदेवालमिति तेषामाशयः । नारदीयसंहितायां-—

निषेकादींश्च संस्कारान् स्वस्वसूत्रविधानतः ।
पाञ्चरात्राध्वना वाऽपि ये स्ववंश्यैरनुष्ठिताः ॥[62]

यथापूर्वमाचरन् भगवन्तमाराधयेदिति सर्वसाधारण्यमेव स्पष्टमदर्शि । परमेश्वरादौ सर्वत्र-संहिताग्रन्थे सन्ध्योपासनाद्याह्निककृत्यानां तत्तत्सूत्रोक्तप्रक्रियया अनुष्ठानं प्रतिबोध्य भगवदाराधन विधानात् सर्वं पाञ्चरात्रं सर्वार्थमिति निर्विवादम् । किं बहुना, आगमसिद्धान्ताभिहितशुद्ध-यजनदौष्कर्यचिन्तया त्रय्यध्यायिशाण्डिल्यादिसर्वव्यामिश्राधिकारिविषयतयैव भगवतैव रत्नत्रयमुप दिष्टमिति स्पष्टं पारमेश्वरे (१. ८१-९)प्रत्यपादीति कथं साधारण्यविषये संदेहः ? अत एव वैखानसा अपि सर्वसाधारणपाञ्चरात्रप्रक्रियावलम्बनेनापि यदि भगवन्तमारिराधयिषन्ति स्वेच्छया वा पाञ्चरात्रप्रतिष्ठापितालयेषु प्रजाप्रार्थनया वा, तदा पञ्चसंस्कारदीक्षाकरणं सुतरां

---

60 रहस्यत्रयसारे सारनिष्कर्षाधिकारे उद्धृतम् p. 27.
61 सच्चरित्ररक्षायां प्रथमे अधिकारे उद्धृतम् p. 172
62 नार. 11. 81

तेषां युक्तम् । नैतावता वैखानसपथेन स्वगृहादौ समाराधनस्य कश्चिद्भङ्गोऽस्ति । अदीक्षितवैखानसक्रियमाणं वैखानसाध्वना समाराधनमेव पाञ्चरात्रिकालयेषु प्रतिषिद्धं भवितुमर्हति ।

अस्तु तावदिदं यथाकथमपि । एवमपि मन्त्रादिविषये तेषां पाञ्चरात्रापेक्षा लक्ष्यते । पाञ्चरात्रवत् वैखानसग्रन्थानामपि प्रागनन्तत्वेपि उपदिष्टानामद्य स्थितानां चाल्पत्वात् ततः सर्व मन्त्रविषयावधारणं दुष्करम् । तथा वैखानसैरपि प्रपत्त्यनुष्ठानमिष्टमिति तदीयविरचितवेदान्त ग्रन्थादितो विज्ञायत एव । प्रपत्तिः शरणागतिरिति पदं तावत् प्रसिद्धं सर्वत्र , तथापि पञ्चरात्रत एव विशेषनिश्चयः । न हि

इद पुण्यमिदं पापमित्येतस्मिन् पदद्वये ।
आचण्डालं मनुष्याणामल्पं शास्त्रप्रयोजनम् ॥[63]

इति शास्त्रविचार उपेक्ष्यते । पुण्यपापद्वयसद्भावज्ञानेऽपि तत्तलक्षणस्य किं किं पुण्यं किं किं पापमिति विशेषाणां च विना शास्त्रमनवगमात् । तथा सामान्यतः शरणागतौ अवगतायामपि,

अनन्यसाध्ये स्वाभीष्टे महाविश्वासपूर्वकम् ।
तदेकोपायता याच्छा प्रपत्तिः शरणागतिः "[64]

इति भरतमुनिवाक्यादेव तदर्थाधिगमेऽपि साङ्गतदनुष्ठानप्रकारः पञ्चरात्रं विना दुरधिगम एव । अतः सर्वोपजीव्यमेव यथायथं पञ्चरात्रामिति ।

पाशुपतादिवैलक्षण्यम्

नन्वेवं पाशुपतमिति पशुपत्याराधनजिज्ञासुभिरादर्तव्यं स्यादति चेत् , स्यादेव । कस्तत्र द्वेषः ? अत एवोक्त न्यायपरिशुद्धौ श्रीदेशिकचरणैः साङ्ख्यादीनां चतुर्दशविद्यास्थानान्तर्भावं प्रस्तुत्य "यानि पुनः साङ्ख्ययोगपाशुपतपञ्चरात्राणि तान्यपि धर्मशास्त्रभेदा एव । परिशुद्धात्मचिन्तनरूपज्ञानयोगप्रदर्शनाधिकृतं शास्त्रं साङ्ख्यम् । समाधिपर्यन्तकर्मयोगनिष्ठं शास्त्रं योगः । प्रतिबुद्धेतरविषयपशुपतिभजनप्रतिपादकं पाशुपतम् । प्रतिबुद्धविषयभगवदनन्य–

63 भी. श्लो. 1. 1. 5. 32
64 ग. श्र. भा. p. 20

भजनोपदेशप्रवृत्तं तु शास्त्रं पञ्चरात्रम् । एतानि च क्वचित्क्वचिदंशे परस्परोपजीवीनि । परस्परविरोधे तु वेदानुसारेण बलाबलव्यवस्था । वेदविरुद्धे त्वंशे बाधः ॥[65] '

इत्यादि । तर्हि कथं भगवता बादरायणेन ब्रह्मसूत्रे साङ्ख्यादिनिरास इति चेत्, तत् वेदविरोधेन तर्कबलसाधितांशविषयमिति प्रागेव प्रत्यपादि । पाञ्चरात्रे तु, पाशुपते ईश्वरस्यानुमानेन साधनवत् तर्कबलेन कस्यचिदर्थस्य साधनाभावात् वेदार्थव्यक्तीकरणनैर्भर्यदर्शनात् अज्ञानप्रमादाशक्तिवैदेशिकभगवन्मुखोद्गतत्वस्योक्तस्यासंभवशङ्कास्पदादर्शनाच्च कार्त्स्न्येन प्रामाण्यमिति विशेषः ।

उभयथा प्रामाण्यम्

एवं च पर्यालोचने पञ्चरात्रस्योभयथा प्रामाण्यं भवति ।स्वतः सर्वज्ञभगवदनुकम्पामूलकत्वात् वेदानुरोधित्वाच्च । आद्यमंशं वेदव्यास एव भारते विशदमदर्शयत् ।

साङ्ख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा ।
किमेतान्येकनिष्ठानि पृथङ्निष्ठानि वा ॥[66]

इति विचारं प्राप्य साङ्ख्ययोगपाशुपतानां कपिलहिरण्यपशुपतिकृतत्वात्, अपान्तरतपआख्यस्य भगवदंशस्य महर्षेरेव वेदाचार्यत्वात् वेदस्यापौरुषेयत्वात् प्रवक्तुश्च भ्रमप्रमादादिसंभावनारहितमहर्षित्वात्, वेदानुपूर्वीस्वरादिषु केषामपि पुंसां विवादाभावात्, पाञ्चरात्रस्य कृत्स्नस्य तु नारायणस्यैव स्वयं स्वमुखेन कर्तृत्वात् वक्तृप्रवक्तृवैलक्षण्यविवेकेनैवैतन्निर्धारणीयमिति दर्शितम् । अपान्तरतपसः कथं वेदाधिगम इति चेत्,

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ।
तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ।

इति स्वोत्पादकभगवत्प्रोक्तसर्ववेदग्राहिचतुर्मुखकृतादनुग्रहाद्वा भगवत एवापान्तरतपस्त्वे साक्षाद्वा प्रवचनप्रावीण्यमिति वक्तव्यम् ।

---

65 पा. प. 287, 8
66 म. भा. 12. 337. 1cd, 2cd

श्वेताश्वतरश्रुतितात्पर्यम्

प्रसङ्गादिदं किंचिदुच्यते—' यो ब्रह्माण '[67] मिति मन्त्रोऽयं श्वेताश्वतरोपनिषद्गतः । तेनेदं ज्ञाप्यते, भगवता ब्रह्माणमारभ्य क्रियमाणा सृष्टिर्वेदप्रचाराय । स च प्रचारः आत्म-विषयकबुद्धिप्रकाशाय । तत्फलं च मुमुक्षुत्वं मोक्षार्थोपायानुष्ठानं च । उपायश्च शरणागतिः प्रपत्तिरिति । एवं च भूमौ शरणागतसस्यसंवर्धनार्थप्रवृत्तोऽयं परमपुरुषाख्यः कृषीवल इति शरणागतिस्वरूपाङ्गोपाङ्गादिविस्तरभूतपञ्चरात्रप्रवर्तनमपि तत्कृतमभिप्रेतमत्र मन्त्रे इति । तदेवं वेदो निर्बाधं प्रमाणम् , तत्प्रवचनपरपरमपुरुषप्रणीतत्वात् पञ्चरात्रमपि तदविशेषं प्रमाणम् । साङ्ख्यादीनां तु ईदृशोत्कृष्टकर्तृकत्वाभावादेतद्विरुद्धं तत्रोच्यमानं न ग्राह्यम्,

मन्वर्थविपरीता तु या स्मृतिः सा न शस्यते [68]

इति मनुविरोधे महर्षीणामन्येषामविश्वसनीयत्वमिति स्थिते सर्वज्ञसर्वेश्वरवचनविरोधे साङ्ख्यपाशुपतादीनाम् अग्राह्यत्वमित्यत्र कः संदेहः ? वेदानुक्ता अप्यंशाः सन्ति पञ्चरात्रे इति चेत्, अत्र समाधिर्नास्माभिः कर्तव्यः ।शाङ्करभाष्योक्तस्मरणे स्वयमेव समाधिसंभवात् । तत्र हि शास्त्रयोनित्वाधिकरणे प्रथमवर्णके भगवतः सर्वज्ञत्वोपपादनायोक्तमेवम्– ' लोके ये प्रबन्धारः सन्ति, तेषां तत्प्रबन्धमूलं यावद्ज्ञानमनुमीयते, ततोऽधिकज्ञानशालिन एव ते भवन्ति । केनापि स्वज्ञातस्य सर्वस्य स्वप्रबन्धे कथयितुं शक्यत्वात् । अतः प्रबन्धलम्भितज्ञानाधिकज्ञानः प्रबन्धेति न्यायेन सर्ववेदप्रवक्तुः सर्वेश्वरस्य सर्ववेदानवगमितानेकार्थज्ञानमप्यस्तीत्यवसातव्य मिति एवं । शाङ्करोक्तरीत्या वेदानुक्तानामपि स्वप्रत्यक्षसिद्धानां सर्वलोकहिताय स्वयं समयानु गुणमालोचितानां चानेकेषामर्थानां सर्वनियन्ता स्वयमेव कृपया पञ्चरात्रमुखेन प्रकाशनं करोति इति सिद्धमेव सर्वस्य प्रामाणिकत्वम् । अत एव सत्यपि विरोधे श्रुत्योरिव मिथः श्रुतिपञ्चरात्र योः क्रियाविकल्पः एव । न तु वेदेन पञ्चरात्रबाध इत्यपि वदन्ति । वस्तुतो विरोध एव न लक्ष्यते । तत् सिद्धं सर्वज्ञमूलकत्वात् प्रामाण्यम् ।

---

67 66 श्वे. 6. 18

68 आकरो मृग्यः

विप्रलम्भकत्वशङ्का

ननु सर्वज्ञत्वात् भ्रमप्रमादाशक्तिरूपदोषाणामप्रसक्तावपि विप्रलम्भरूपो दोष: स्यात् न च लोके ज्ञानिनां परवञ्चकत्वसंभवेऽपि सर्वेश्वरे तन्न भवतीति शक्यम् , बुद्धादिरूपेणावतीर्य अनेकान् मोहयतीत्यस्य शास्त्रसंप्रपतिपन्नत्वात् ।

त्वं हि रुद्र महाबाहो मोहशास्त्राणि कारय ।

....

अहं मोहं करिष्यामि यो जनं मोहयिष्यति ।[69]

इति परद्वारापि लोकमोहनव्यापृतस्य स्वयं मोहकत्वे क: संदेह:? अतो रुद्रद्वारा शैवागमकरण-प्रचारणवत् स्वयं पाञ्चरात्रागमकरनप्रचारणे मोहनार्थे एव ।

तथा च कौर्मे—

कापि(पा)लं पाञ्चरात्रं च यामलं वाममार्हतम् ।
एवंविधानि चान्यानि मोहनार्थानि तानि तु ॥[70]

इत्युक्तम् । किं च कौर्मे-

निर्मितं हि मया पूर्वं मतं पाशुपतं शुभम् ।
गुह्याद्गुह्यतमं सूक्ष्मं वेदसारं विमुक्तये ॥[71]

....

एष पाशुपतो योग: सेवनीयो मुमुक्षुभि: ।
भस्मच्छन्नैर्हि सततं निष्कामैरिति हि श्रुति: ॥[72]

---

69. न्यायपरिशुद्धौ शब्दाध्याये उद्धृतम्, p. 288.
70. कू पु. 1. 11. 273
71. Ibid 2. 37. 141
72. Ibid 2. 37. 143

इति प्रमाणभूतं पाशुपतमेकं, तत्रैव-

वामं पाशुपतं सोमं लागुडं चैव भैरवम् ।
न सेव्यमेतत् कथितं वेदबाह्यं तथेतरत् ॥[73]

इति मोहशास्त्ररूपं पाशुपतमन्यदिति श्रौतशैवागमो ग्राह्यः, कामिकादिरश्रौतो न ग्राह्य इति वायुसंहितोक्तरीत्या च द्वैविध्यवत् पाञ्चरात्रे वैदिकावैदिकभेदादर्शनात् सर्वमेव पञ्चरात्रं विप्रलिप्सामूलकमिति निश्चीयते ।

एवं संचोदितो रुद्रो माधवेन मुरारिणा ।
चकार मोहशास्त्राणि केशवोऽपि शिवेरितः ॥[74]

इति मुरारेरविशेषेण मोहकत्वं स्मृतम् । अथांशुः सात्त्वतो नाम विष्णुभक्तो नारदवचनात् वासुदेवार्चने निरतः,

शास्त्रं प्रवर्तयामास कुण्डगोलादिभिः श्रितम् ॥
तस्य नाम्ना तु विख्यातं सात्त्वतं नाम शोभनम् ।[75]

....

यत्र स्त्रीशूद्रदासानामधिकारः परः स्मृतः । इति च स्मर्यते इति चेदुच्यते-

विप्रलम्भपरिहारः

नूनं श्रीकण्ठभाष्यव्याख्यामप्पय्यदीक्षितकृतां शिवार्कमणिदीपिकामवलम्ब्यायमाक्षेपः । अत्रेदं वक्तव्यम् । पाञ्चरात्रपाशुपतयोः स्तुतिपराणि निन्दापराणि च वचनानि तत्र सांप्रतमुपलभ्यन्ते । गौतमेन शप्ताः वेदबाह्याः विष्णुद्वेषिणः शिवभक्ताः दक्षयज्ञध्वंसार्थशिवप्रेरण

---

73. Ibid 2. 37.146
74. Ibid 1. 15. 112
75. Ibid 1. 23.32cd. 33ab

प्रवृत्तदधीचिशप्ताश्चान्ये शिवद्वेषिणो विष्णुभक्ताः कलौ युगे भविष्यन्तीति स्मर्यते । तत्र सांप्रतिकाः वैष्णवा यद्यपि शिवं नाराधयन्ति तावता, शिवद्वेषिण इति न कथमपि वक्तुं शक्यन्ते। शिवप्रशंसापराणि परःशतानि संप्रदायधुरंधरप्रणीतानि दुराभिप्रायमिमं दूरे निरस्यन्ति । शैवाः सांप्रतिका अपि विष्णुद्वेषिणो न भवन्तीति यदि निरूपयितुं शक्यते, तर्हि तावान् कलिर्नेदानीमभवृद्ध इति प्रीतैर्भाव्यम् । अथ बुद्धिपूर्वात् वेदप्रसिद्धविष्णुवैभवगूहननैर्भयात् शैवानां विष्णुद्वेषोऽस्त्येवेत्यभिसंधीयते, तावता वैदिकशिवमहिमानपलापिभिर्वैष्णवैर्नैवापराध्यते । सात्त्वतादिसंकरजातानां स्त्रीशूद्राणां पञ्चरात्रे पूजनाधिकारो विभिन्नरूपः प्रादर्शीत्येतावता ब्राह्मणादीनां तद्वर्ज्यमिति कथम्? न हि सत्यास्तेयाहिंसादीनां तदधिक्रियमाणत्वमस्तीति ब्राह्मणादिभिः स्तेयासत्यादिपरैर्भाव्यम् ।

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥
किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ।[77]

इति न्याय एव ह्यत्रोचितः। पाद्मे च प्रतिष्ठापकाचार्यविवेचनावसरे संन्यासि-क्षत्रिय-वैश्य-कुण्ड-गोलादीनामनधिकार एवोक्तः । वाराहे च-

ब्राह्मणक्षत्रियविशां पञ्चरात्रं विधीयते ।
शूद्रादीनां न तच्छ्रोत्रपदवीमुपयास्यति ॥[78]

इति शूद्रादीनां पञ्चरात्रेऽनधिकार एवोक्तः । अतो विषयव्यवस्थयैव सर्वनिर्वाहः । अप्रतिष्ठितप्रतिमाभजनपूजनादिकं शूद्रादेरनुमतमपि न ब्राह्मणादीनामाराधनादिपूर्तये भवति । महाभारतवचनं च ब्राह्मणाद्यधिकारप्रदर्शि प्रागेव प्रादर्शि । प्रक्षेपशङ्कानास्पद-सर्वशिष्टपरिगृहीतभारतवचनजातविरोधे सति पुराणान्तरवचनानि प्रक्षेपादिशङ्कया त्याज्यानि वा तात्पर्यान्तरेण योज्यानि वा भवन्ति । शैवागमेषु वैदिकावैदिकविभागवत् कालक्रमेण पञ्चरात्रेऽपि नवीनाः

76. मूलं मृग्यम्
77. भ. गी. 9. 32, 3ab
78. व. पु. 66. 12

प्रबन्धाः प्रादुर्भूताः सन्ति, ये पूर्वविरोधादुपेक्ष्यांशबहुला इत्यपि संभाव्यते, तावता न पञ्चरात्रस्य प्राच्यस्याप्रामाण्यम् । वक्ष्यते चोपरि पाञ्चरात्रवचनानि तामसपाञ्चरात्रमपि प्रदर्श्य प्रामाण्याप्रामाण्यविवेकरीतिः । रुद्रप्रेरितेन विष्णुनाऽपि मोहनार्थं बहु कृतमिति यदुक्तं - तेन मोहकरुद्रसाहायकमाचरितमित्येवाध्यवसातव्यम् । सा च रीतिः विप्रादिसर्ववर्णसमादरणीये पञ्चरात्रे क्षुद्रकतिपयमात्रग्राह्यत्वोपन्यसनेन रुद्रभक्तिद्रढिमसंपादनायेति तादृशविप्रलम्भकवाक्यग्राहणेन परमास्तिकैः पञ्चरात्रोपेक्षा न कार्या । बुद्धादिरूपभगवदुपन्यस्तवेददूषणश्रवणेन वैदिकैर्वेदोपेक्षा वेत्येव सिध्यति । अत एवंरीत्या प्रवर्तितानि सर्वाणि पञ्चरात्रदूषणवचांसि ॥

दीक्षितवाक्यविमर्शः

अपि च श्रीकण्ठभाष्यव्याख्याविमर्शेन किंचिद् विवक्षामः —श्रीकण्ठभाष्ये पशुपत्यधिकरणं पाशुपतनिरसनपरतयैव पूर्वं व्याख्यातम् । अतः स्वसिद्धान्तैकरस्यं तत्र सुसंपादमिति कृत्वा ईश्वरस्य केवलनिमित्तत्ववादियोगस्मृतिरूपहिरण्यगर्भागमनिराकरणपरमिति निगमितम् । व्याख्याने च—पाशुपतं प्रमाणभूतमेकम्, अप्रमाणभूतं त्वन्यत् । तदपि वामाचारयुक्तं शौचवर्जितं लागुडपाशुपतकापालिकालामुखादिरौद्रागमरूपमवैदिकम् । तस्यापि त्ववैदिकाधिकारिविषये प्रामाण्यमिति विस्तृतम् । अत्रोच्यते-—प्रकृतिरुपादानम्, निमित्तकारणमीश्वर इति पाशुपतमतनिष्कर्षः शाङ्करभाष्याद्यारूढः । पाश्चात्यं श्रीकण्ठभाष्यं तु शिवपारम्यस्य वैदिकत्वस्थापनाय प्रवृत्तं वेदान्तानामभिन्ननिमित्तोपादानत्वपरत्वस्याविचाल्यतामालक्ष्य पशुपतेरेव तदिष्ट्वा पाशुपतागमेष्वपि तदुपादानत्वस्फोरकवाक्यान्वेषणेन तदेव स्वीकृत्य तद्विरुद्धपाशुपतवचनानामप्रामाण्यं वा अन्यतात्पर्यकत्वं वा वाञ्छति । अस्माभिः पाशुपतपाञ्चरात्राधिकरणेषु सूत्राक्षरेष्ववधानमादौ कार्यम् । 'पत्युरसामञ्जस्या'[79] दिति सूत्रस्य पशुपतेरिदं न भवति ग्राह्यम् असामञ्जस्यादित्यर्थः । किं तदिति चेत् - यत् पाशुपतागमसंमतं तत् । यदि केवलनिमित्तत्वं तत्रोक्तम्, तदत्र निरसनीयम्, तत्रोपादानत्वनिमित्तत्वोभयस्वीकारे कार्ये निमित्तत्वमात्रस्वीकारो

---

79 ब्र. सू. 2.2. 37

न भवतीत्यर्थो वा निमीत्तत्वमपि न भवतीत्यर्थो वेति विचार्यम् । यदि वेदान्ताः विष्णुं न्यक्कृत्य रुद्रस्य पारम्यपरतया निर्धारिता भवेयुः, तदा रुद्रे उभयस्वीकारपरतया व्याख्यानं स्यात् । नारायणपारम्यस्य शङ्करयादवद्वैततदितरसर्ववैष्णवसमादृतस्य भूयसा न्यायेनाऽऽश्रयणे तु रुद्रस्य नारायणपौत्रस्य सर्वसमष्ट्यनन्तरकतिपयव्यष्टिसृष्टिपश्चाद्भाविनः सर्वजगन्निमित्त कारणत्वस्याप्यसंभवात् पाशुपतोक्तं निमित्तत्वमपि निरसितुमिष्टमेव सूत्रे । उपादानत्वस्या-पशुपतौ पाशु तेष्टत्वे तदप्यत्र निरस्यमेव वेदान्तविरोधात् ।

अथमाशयः पाशुपतागममादाय रुद्रस्य केवलनिमित्तत्वं वा, उपादानत्वविशिष्ट-निमित्तत्वं वा स्वीकृत्य तेन वेदान्ता निरोध्या न भवन्ति । तदसामञ्जस्यात् । असामञ्जस्यं च उक्तस्य विकल्पासहत्वात् । किं युक्त्या एतदर्थस्थापनम्, आगमेन वा ? लोके उपादानत्व-निमित्तत्वयोः पृथङ्निष्ठतयैव भूयोऽनुभवात् न युक्तिरस्ति । आगमश्च वेदो वा पाशुपतादिर्वा । वेदस्य पशुपत्यतिरिक्तपरत्वं प्रागेव स्थापितम् । किं च स वेदोऽपीश्वरकृत इति भवदिष्टम् । ईश्वरे सिद्धे किल तदुक्ततया तत्प्रामाण्यसिद्धिः, तदसिद्धिश्चानन्तरैः सूत्रैरपि व्यक्तीभविष्यति । अत एव न पाशुपतागमोऽपि । हेयानेकार्थपरत्वाच्च । शैवागमानां संमोहनार्थप्रवृत्ततायाः प्रसिद्ध त्वाच्च । अतः पाशुपतोक्तं रुद्रस्य सर्वजगन्निमित्तत्वं वा उपादानत्वविशिष्टनिमित्तत्वं वा मुक्तप्राप्यत्वं नित्यकैलासवासित्वं विष्णुब्रह्मातिशायित्वं नित्यसार्वज्ञ्यमित्यादिकं च न भवति असामञ्जस्यादिति सूत्रार्थः । पाञ्चरात्राधिकरणे विष्णोरिदं सर्वं न भवति असामञ्जस्यादित्यनुक्त्वा जीवोत्पत्त्यादंश-मात्रदूषणात् अन्यत्र सर्वत्र वेदैकर्यं पञ्चरात्रस्य तदिष्टमिति सूत्रशैल्यैव ज्ञायते । अत एव स्वारस्यमनुभूय शांकरे इतरांशे पञ्चरात्रस्य प्रामाण्यमवर्णि, न तथा पाशुपतस्य, तर्कपादे च युक्तिसाधितांशानां युक्तिविरुद्धानां च खण्डने प्राधान्यात् पशुपतिमतवत् तार्किकादिमतमप्यत्र निमित्तेश्वरपरं खण्डितमिति शङ्करोक्तम् । न कश्चिद् वैष्णवः विष्णोस्तर्केण सद्भावं पारम्यादिकं च साधयति । नापि पाञ्चरात्रे युक्तिं पुरस्करोति । वेदप्रमाणमूलं निर्दोषसर्वज्ञतया सिद्धेन श्रीविष्णुना प्रणीततया पञ्चरात्रस्य पूर्णं प्रामाण्यमित्येव तत्र घुष्यते । विप्रलम्भश्च भगवता क्रियमाणः आसुरान् प्रत्येव दृष्टः, न तु प्रतिपन्नान् प्रति । यदि नारदशाण्डिल्यैकतद्भित चतुर्मुखादीनपि स विप्रलभत इत्युच्यते । गीताऽप्यर्जुनं युद्धप्रवर्तनाय विप्रलब्धुमेव प्रवर्तिता । वेदोऽप्यादौ विप्रलम्भायैवोपदिष्टः । त्रैविद्यतपस्विनो धूर्तबका एव । जगत्सृष्टिरेव विप्रलम्भ-रसास्वादायैवेति कथं लोकोत्तरप्रज्ञेन भवता न निर्धार्यते । अतो यावत् पाशुपत

विष्णुपारम्यतिरस्कारेण पशुपतिप्राधान्यपरमिष्यते तावद् वेदविरोधादप्रमाणमेवेति द्वैताद्वैत-विशिष्टाद्वैतमतनिष्णाततदितरमध्यस्थसर्ववैदिकलोकविदितमिति न नवीनस्य श्रीकण्ठभाष्यस्य नानाव्याख्यासाहाय्येऽपि स्वाभिमतनिर्धारणधुरीणतेत्यलमनेन विप्रलम्भकपुरुषप्रणीतप्रबन्धविमर्शेन । नैतावता शिवद्वेषः, पारमैकान्त्यप्रतिष्ठापके पञ्चरात्र एव ग्रामादिषु शिव-गणेश-स्कन्द-दुर्गा-ब्रह्मादिस्थापनतदुचितपूजकव्यवस्थापनादेर्दर्शितत्वात् । प्रागुक्तरीत्या महाभारतादि-प्रसिद्धवैभवं पञ्चरात्रं परमपुरुषकरुणापरिणामरूपत्वात् पूर्णमेव प्रमाणम् ।

यथैवं निर्दोषपुरुषपौरुषेयप्रणीततया, तथा वेदमूलकतया च प्रामाण्यं प्रतिष्ठितं भवति । यथा ह्यधीतसाङ्गवेदेन मैत्रेयादिना इतिहासपुराणसाहाय्यं विना विदितार्थवैशद्याभावात् पराशराद्याश्रयणेन

विष्णोः सकाशादुद्भूतं जगत् तत्रैव च स्थितम् ।[80]

इत्यादिविशेषार्थश्रवणेन वैशद्यमधिगम्यते । तद्वत् साङ्गोपाङ्गसविस्तरसर्ववेदाध्ययनेऽपि भगवदुपासनोपयुक्तभगवदर्चनसेवनादिप्रकारनिर्धारणवैधुर्येण महदाश्रयणं पूर्वैः कृतम्, तेन पञ्चरात्रप्रादुर्भाव इति सूपपन्नमेतत् ।

गीतापाञ्चरात्रैकरस्यम्

गीताचार्यश्च भक्तियोगमनुतिष्ठेत्युपदिश्य,

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ॥

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि ॥[81]

इति भक्तियोगोपयोगितया आलम्बनसंशीलनरूपमभ्यासं विधाय आलम्बनभूतदिव्य-

---

80. वि. पु. 1.1.31
81. भ. गी. 12. 10

मङ्गलविग्रहसंशीलनसमृद्धये तदाराधनरूपं कर्म यथावदुपवदिशति। अत्र भाष्यम्-मत्कर्मपरमो भव—मदीयानि कर्माणि आलयनिर्माणोद्यानकरणप्रदीपारोपणमार्जनाभ्युक्षणोपलेपनपुष्पाहरणपूजाप्रवर्तननामसंकीर्तनप्रदक्षिणस्तुतिनमस्कारादीनि। तानि अत्यर्थप्रियत्वेनाऽऽचर'[82] इति। यानि तु वेदानुवचनयज्ञदानतपःप्रभृतीनि सर्वत्र कथ्यमानानि, तानि कर्मयोगप्रथमप्रवर्तकतयाऽपि स्थितानि समनन्तरश्लोके—

सर्वकर्मफलत्यागं ततः कुरु यतात्मवान्[83]

इति वक्ष्यन्त इति न तेषामत्र ग्रहणप्रसक्तिः। ऋग्वेदाद्युदाहरणेन शौनकादिप्रशंसितया वीराचनस्यात्यन्तमिष्टत्वादेव कर्मयोगप्रभेदपरिगणप्रवृत्तो भगवान् प्रथमतो देवार्चामेव निर्दिशति—

दैवमेवापरे यज्ञं योगिनः पर्यु पासते[84]।

इति।

देवान् देवयजो यान्ति[85]

इति भूर्त्यमूर्त्युभयसाधारणप्रस्तावे देवतान्तरार्चामूर्तिषु क्रियमाणं घोरबलिदानादिकं श्रीभागवते जडभरतोपाख्यानप्रस्तुतचेष्टादिरूपं मनसिकृत्य स्वकीयमूर्तिपूजायामीदृशं घोरं नास्तीति विवक्षुः स्वं गुणातिशयमाविष्कुर्वन् अर्चामूर्तिमेव कलयतीति श्लोकस्वारस्यादेव सुज्ञानम्, य एषः,

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः[86] ॥

इति। न हि वेदविहितयज्ञाद्यनुष्ठानावसरे विहितं चरुपुरोडाशादि परित्यज्य पत्र-

---

82. भ. गी. 12.10 रा. भा
83. भ. गी. 12. 11
84. Ibid. 4. 25
85. Ibid 7.23
86. Ibid 9.26

पुष्पादिक्रमर्पयितुं शक्यते । अतः श्लोकः मूर्तिविषयकः । अतो भगवदेकान्तान्तरङ्ग-कैङ्कर्याण्यत्राभिप्रेयन्ते । अयमर्थः, स्मृत्यन्तरसंवादादपि स्वीकार्यः । द्वादशाध्यायदर्शित-स्यास्यैव क्रमस्य तत्राप्यभिधानादिति तात्पर्यचन्द्रिका घोषयति, यथा—

तत्र चित्तं समावेष्टुं न शक्नोति भवान् यदि ।
तदभ्यासपरस्तस्मिन् कुरु योगं दिवानिशम् ॥

तत्राप्यसामर्थ्यवतः क्रियायोगो महात्मनः ।
ब्रह्मणा यः समाख्यातः तत्परः सततं भव ॥

प्रधानकारणं योगो विमुक्तेर्दितिजेश्वर ।
क्रियायोगश्च योगस्य परमं तस्य साधनम् ॥[87]

इति । क्रियायोगशब्दश्च आलयनिर्माणप्रतिष्ठापनाचार्याराधनादौ पञ्चरात्रे सुप्रसिद्धः । श्रीभागवते च,

क्रियायोगं समाचक्ष्व भवदाराधनं प्रभो ।
यस्मात् त्वां ये यथाऽर्चन्ति सात्त्वताः सात्त्वतर्षभ ॥

एतद्वदन्ति मुनयो मुहुर्निःश्रेयसं नृणाम् ।
नारदो भगवान् व्यास आचार्योऽङ्गिरसः सुतः ॥

निःसृतं ते मुखाम्भोजात् यदाह भगवानजः ।
पुत्रेभ्यो भृगुमुख्येभ्यो देव्यै च भगवान् भवः ॥

एतद्वै सर्ववर्णानामाश्रमाणां च संमतम् ।
श्रेयसामुत्तमं मन्ये स्त्रीशूद्राणां च मानद ॥

एतत् कमलपत्राक्ष कर्मबन्धविमोचनम् ।
भक्ताय चानुरक्ताय ब्रूहि विश्वेश्वरेश्वर ॥[88]

---

87. भ.गी. 12. 11 ता. च.
88. भा. 11. 27. 1-5

इत्युद्धवः श्रीकृष्णमर्थयते। कश्चित्तु,

अलभे वेदमन्त्राणां पञ्चरात्रोदितेन वा ।[89]

इति वाक्यमुपादाय वेदानधिकारिणामन्तरजातानां पञ्चरात्रोदितप्रक्रिया इत्यर्थमाह । अलाभशब्दं तत्र सप्तमीं, वाशब्दं च स्वार्थात् प्रच्यावयन्नेष कथं स्वपक्षं स्थापयितुमर्हति ? पाञ्चरात्र एव,

वैदिकं तान्त्रिकं चैव तथा वैदिकतान्त्रिकम्[90]

इति विधात्रयमुक्तम् । तत्र वैदिकग्रहणं वेदाधिकारिणां प्रथमः कल्पः । तदलाभे पञ्चरात्रमात्रसिद्धमन्त्रग्रहणमिति तद्वास्तवार्थः । केचित् पृच्छन्ति—सत्सु शौनकबोधायनादिषु प्रतिमाप्रतिष्ठापद्धतिदर्शिषु किं पञ्चरात्रेणेति ? तत्र वक्तव्यम्-स्वसूत्रतः कर्तव्यपरिज्ञानाभावे परकीयग्रहणे प्रसक्ते सुविशदतत्क्रियाप्रतिपादकपाञ्चरात्रपद्धत्युपदेशकेषु च जाग्रत्सु किमिति अपूर्णोपदेशमूलमर्थग्रहणम् ? तत्स्वीकारिणोऽपि अनुक्तमन्यतो ग्राह्यमिति हेतुना इति-कर्तव्यतावैशद्याय पाञ्चरात्रमेवादरिष्यन्ते। अतो 'न हि भिक्षुको भिक्षुकान्तरं याचते' इति न्यायेन भगवदुपदिष्टव्यासादिमहर्षिमानितपाञ्चरात्रपद्धतिपरिग्रह एव स्थाने । अत्रैवं वैखानसपाञ्चरात्रान्यतरक्रियायोगानुष्ठानस्य विप्रादिसर्ववर्णसाधारण्ये मुक्तकण्ठं वर्ण्यमाने सर्वमुपेक्ष्य सात्त्वताख्यसंकरजातिप्राययजनमात्रादरणीयतां पाञ्चरात्रस्य, तत्तुल्ययोगक्षेमतां च वैखानसस्य,

पाञ्चरात्रं भागवतं तन्त्रं वैखानसाभिधम् ।
वेदभ्रष्टान् समुद्दिश्य कमलापतिरुक्तवान् ।।[91]

इति वचनप्रक्षेपेण वर्णयतो धृष्टस्य विष्णवाराधनविद्वेषोद्गारं सहृदयतादशायां स्वात्माऽपि न सहेत । सात्त्वतशब्दार्थं च निर्दिष्टश्रीभागवताद्यभिमतम् आगमप्रामाण्यग्रन्थतः सुगमं सच्चरित्ररक्षाव्याख्यानाच्च । वैखानसपाञ्चरात्रपाशुपतनिष्ठैः स्वमतश्रद्धया परदूषणप्रणाल्यः

---

89. व. पु. 66. 11
90. द्र. प. म p. 241.
91. द्र. वाचस्पत्य-p. 618

प्रपञ्चिताः । निर्गुणब्रह्मैकपराश्च केचित् मूर्त्यर्चाधिकृतान् मन्दान् मन्यमानाः उक्तत्रि-विधागमदूषणप्रक्रियाः मनसा मानयन्तः परोक्षं पोषयन्ति । तदेवमभिवर्धितान् विरुद्धवादान् सर्वानुपेक्ष्य यथार्थं तत्तदास्थेयम् । महाभारते—

साङ्ख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा ।[92]
आत्मप्रमाणान्येतानि न हन्तव्यानि हेतुभिः ॥[93]

इति सर्वेषां बौद्धार्हतादिवैलक्षण्येन परिग्राह्यत्वेऽभिमतेऽपि,

ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै ।[94]

इति सर्वेषां मिथो विरुद्धमतपरत्वमेवोक्तम् । अतोऽन्याविरुद्धतच्छास्त्रपरमलक्ष्यभूतार्थमात्रे तेषां प्रामाण्यम् । न चैवं वेदपाञ्चरात्रयोरपि नानामतत्वापत्तिरिति शङ्क्यम् । एतदर्थमेव,

अपान्तरतरतपा नाम वेदाचार्यः स उच्यते ।[95]
पाञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम् ॥[96]

इति आचार्यशब्दस्वयंशब्दादेः प्रयोगात् । अयमाशयः—वेदप्रवर्तकस्य केवलमाचार्यत्वात् रचयितृत्वाभावात् न तन्मतमादाय विरोधः सुवचः । अतो वेदे ईश्वरतात्पर्यमेव वक्तव्यम् । यो वेदतात्पर्यवत्वेन भाव्यमानः स स्वयमेव पाञ्चरात्रप्रणेतेति न तयोर्भेदस्यावसरोऽस्ति । कथंचिदेषामैकरस्ये प्रयत्ने क्रियमाणे साख्याद्यैकरस्यं सुवचम् । न तु पाशुपतपाञ्चरात्रैक्य-मित्यपि व्यासो मन्यते-यतः,

इदं महोपनिषदं चतुर्वेदसमन्वितम् ।
साङ्ख्ययोगकृतान्तेन पाञ्चरात्रानुशब्दितम् ।[97]

---

92. म. भा 12. 337.59 ab
93. Ibid. 14. App. 4. 393 post
94. Ibid, 12. 337.59 cd
95. Ibid. 12.337.61 ab
96. Ibid. 12.337.63 ab
97. Ibid. 12. 326. 100

इति पाञ्चरात्रे वेदसाङ्ख्ययोगसमन्वयमेव वक्ति, न पाशुपतसमन्वयम्। जीवात्मज्ञान-योगाभ्यास-वेद्यपरतत्त्वमोक्षाद्यंशानां पाञ्चरात्रोपजीव्यत्वात्। पशुपत्युपजीवनस्य चानपेक्षित्वात्। साङ्ख्यादिषु न विरुद्धाचाराः सन्ति; पाशुपते तु सन्तीत्याशयः। अत एव,

एवमेकं साङ्ख्ययोगं वेदारण्यकमेव च।
परस्पराङ्गान्यतानि पञ्चरात्रं तु कथ्यते।[98]

इत्यप्येषामेकीकरणम्।

सर्वेषु च नृपश्रेष्ठ ज्ञानेष्वेतेषु दृष्यते।
यथागमं यथान्यायं निष्ठा नारायणः प्रभुः॥[99]

इति नारायणनिष्ठता सर्वत्रोक्ता यदि पाशुपतेऽपि संपाद्यते, तदा न तत्त्यागः। श्री विष्णु-सहस्रनामभाष्ये च शांकरे हरिवंशकैलासयात्राघट्टस्थं वचनमेवमुदाहारि–

ओमित्येवं सदा विप्राः पटध्वं ध्यात केशवम्।
उपास्योऽयं सदा विप्राः उपायोऽस्मि हरेः स्मृतौ।[100]

इति रुद्र आहेति। तेन रुद्रः सेवितो हरिस्मरणोपायो भवति। तन्मूलं हरिमवगत्य हरि-मेवोपासीत मुमुक्षुरिति। प्रसिद्धं च वाराणास्यां रुद्रेण क्रियते रामतारकमन्त्रोपदेश इति। तदेवं पाशुपतमार्गमूलमाराधनप्यभिनिवेशविदूरैः यथावस्थितार्थलिप्सया रुद्रं प्रति क्रियमाणं घण्टाकर्णमार्कण्डेयादीनामिव विष्णुभजनोपायलाभायैव भवतीति शिवभक्तैरपि शिवं विहायान्ते विष्णुराराध्य इति तत्त्वस्थितिः। अत एवाद्वैतपरमहंसैर्नारायण एव निरन्तरं स्मर्यते। प्रबोधचन्द्रोदयदर्शिनां चैतत्प्रबोधः सुलभः। एवं पाशुपतापेक्षया पाञ्चरात्रस्य श्रैष्ठ्यमाकलय्यैव व्यासः पाशुपतं प्रस्तुवानोऽपि तत्प्रशंसामविधाय पाञ्चरात्रं प्रकर्षेण प्रशशंस। भगव-देकान्ताराधनपरपाञ्चरात्रप्रक्रियायां विशेषतो गौरवादेव गीतायां कर्मयोगप्रकरणेऽपि,

---

98. Ibid. 12. 336. 76
99. Ibid. 12. 337. 63cd, 4ab
100. वि.स.शां.भा. p. 134

'दैवमेवापरे यज्ञं'[101]

इति यागप्राणायामप्रत्याहारवेदाध्ययनप्रवचनादिसर्वकर्मापेक्षया प्राथम्येन देवार्चनरूपकर्मयोगः निरदेशि । सर्वेषामपि, । यत्करोषि यदश्नासि'[102] इत्युक्तरीत्या देवार्पणरूपत्वेऽपि विशिष्य कस्यचित् दैवमिति निर्देशो मूर्तिपूजां मनस्याकलय्य, यस्याः प्रपञ्चनं पाञ्चरात्रे ।

मूर्तिपूजायाः श्रैष्ठ्यम्

एतदर्थमेव च पौष्करार्थप्रधानपाञ्चरात्रप्रादुर्भाव इति पारमेश्वरसंहितायां प्रत्यपादि । उक्तं हि तत्र दशमे अध्याये स्रष्टुमादिष्टेन ब्रह्मणा आनन्दाश्रुसमाविष्टेन प्राञ्जलिना प्रार्थितः

।वेदं च · त्तो गृह्णीष्व सास्वतं नाम नामतः ॥'[103]

स्वयंव्यक्तेन दिव्येनाऽऽकारेण अनन्तभोगशयने शयानो भगवान् प्रादुर्भविष्यति । तमाराधय विमानान्तरवस्थितं महोपनिषदाख्येन शास्त्रेण यत् पौष्कराय तुभ्यमुपदिष्टत्वात् पौष्कराख्यया लोके प्रथिमानं प्रयास्यति' इति । अथ-चोक्तम् ततोमन्वन्तरे प्राप्ते वैवस्वताभिधे इक्ष्वाकुर्नाम नृपतिः वासुदेवप्रेप्सया ब्रह्माणमाराध्य तेनानुगृहीतः,

'विमानं प्रदयिष्यामि दिवः सिद्ध .... ।'[104]

'वासुदेवमनन्ताहौ शयानं ... ॥'[105] (आराधय)

'...पञ्चकालज्ञैः सद्ब्रह्मनिरतैर्द्विजैः ॥'[106]

'क्रतुभिर्विविधैश्चैव .... ॥'[107]

---

101. भ.गी. 4.25
102. Ibid. 9.27
103. पार. 10. 134 cd
104. Ibid. 10. 252 ab
105. Ibid 10. 253 cd
106. Ibid. 10. 252 cd
107. Ibid. 10. 254 c

एतत्पाञ्चरात्रिकाराधनक्रमश्च श्रीमति रामायणे अयोध्याकण्डे श्रीरामकृतोपचरणप्रकरणे प्रत्यभिज्ञायते,

> गते पुरोहिते रामः स्नात्वा नियतमानसः ।
> सह पत्न्या विशालाक्ष्या नारायणमुपागमत् ॥
>
> प्रगृह्य शिरसा पात्रं हविषो विधिवत्ततः ।
> महते दैवतायाज्यं जुहाव ज्वलितेऽनले ॥
>
> शेषं च हविषस्तस्य प्राश्याऽऽशास्यात्मनः प्रियम् ।
> ध्यायन् नारायणं देवं स्वास्तीर्णे कुशसंस्तरे ॥
>
> वाग्यतः सह वैदेह्या भूत्वा नियतमानसः ।
> श्रीमत्यायतने विष्णोः शिश्ये नरवरात्मजः ॥[108]

इत्यत्रेति सच्चरित्ररक्षायां श्रीदेशिकचरणैरुपपादि । तत्र महते दैवतायेति श्रीमद्रामायण प्रयोगः श्री रङ्गनाथे 'पेरियपेरुमाळ्' इति व्यवहारस्य प्राचीनतां दर्शयतीति तट्टिप्पणेऽस्माभिरभ्यधायि । श्रीरामपर्यन्तसर्वसूर्यवंशराजसमाराधितत्वं चैतस्य पारमेश्वरे दशमे प्रत्यबोधि । एवं देवार्चनरूपस्य कर्मयोगस्य भगवदुपदेशमूलं परम्परया प्राप्तत्वमाकलय्य कृष्णेन गीतम्-

> इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
> विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥[109]

इत्यादि । भारते च पाञ्चरात्रमनुस्मृत्य मनुर्धर्मान् प्रवक्ष्यतीति कथितम्-

> अस्मात् प्रवक्ष्यते धर्मान् मनुः स्वायम्भुवस्तथा ।[110]

इति । पञ्चकालप्रक्रियया वा प्रकारान्तरेण वा सर्वस्याह्निककृत्यस्य भगवदाराधनत्वेनोपयोग एवमहर्षीणामपीष्टः ।

---

108. रा. II. 6. 1–4
109. भ.गी. 4.1
110. म. भा. 12.332. 41 cd

स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ।[111]

इति गीताचार्यगीतमेव

वर्णाश्रमाचारवता पुरुषेण परः पुमान् ।
विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः ॥[112]

इति पराशरेण स्मृतम् । नित्यकर्तव्यदेवदेवार्चनरूपभगवदाराधनशेषभूतनित्यनैमित्तिकधर्मप्रतिपादकत्वात् सर्वमपि धर्मशास्त्रं पाञ्चरात्रपोषकम् । अतः सर्ववेदमूलकत्वमेव तस्य, विशिष्य च भगवदेकान्तधर्माभिख्यात् अन्यो वेद एकायननामा तत्र मूलमिति सर्वत्र पाञ्चरात्रे प्रख्याप्यते ।

एकायनवेदः

एकायनाख्यवेदसत्त्वे किं प्रमाणमिति चेत्-याज्ञावल्क्याध्यापितस्यापूर्वस्य शुक्लयजुषो वेदत्वे किं प्रमाणम् !

युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः ।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवा ॥[113]

इति महर्षिदृष्टाध्यापितानां वेदत्वे किंप्रमाणम्? विश्वामित्रदृष्टस्य गायत्रीमन्त्रस्य वेदत्वे किं प्रमाणम् ? अथ वेदत्वसंदेहास्पदे विचार्य निर्धारणं प्राचीनैः कृतमित्यस्य ऋग्वेदभाष्यभूमिकादौ दर्शनानात् निर्विवादाधीते निष्कारणसंदेहो न युज्यते । अन्यथा हि-

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥[114]

---

111. भ.गी. 18.46
112. वि.पु. 3.8.9.
113. म. भा. 12.203.17
114. भ. गी. 4.40

इत्युक्तमनिष्टमेव स्यादिति मन्यसे-तदिदं महाभारतादिमानिते महाजनपरिगृहितेऽस्मिन् एकायनेऽपि तुल्यम् । पाञ्चरात्रग्रन्था: सर्वे ऐककण्ठ्येन एकायनशाखामूलकत्वं विस्तरेण वदन्ति । पाञ्चरात्रप्रामाण्यमातिष्ठमानेन वेदव्यासेन तदंशे परं प्रामाण्यं न स्वीकृतमिति को नु ब्रूयात् ? अत: एकायनमूलकत्वं तदुक्तमपि तथैव स्वीकार्यम् । शान्तिपर्वणि नारायणीयोपाख्याने-

> ये हि ते ऋषय: ख्याता: सप्त चित्रशिखण्डिन: ।
> मरीचिरत्र्यङ्गिरसौ पुलस्त्य: पुलह: क्रतु: ॥
> वसिष्ठश्च महातेजास्ते हि चित्रशिखण्डिन: ।
> सप्त प्रकृतयो ह्येता: तथा स्वायम्भुवोऽष्टम: ॥
> एताभिर्धार्यते लोक: ताभ्य: शास्त्रं विनि:सृतम् ।[115]
>
> ....
>
> नारायणानुशिष्टा हि तदा देवी सरस्वती ।
> विवेश तान् ऋषीन् सर्वान् लोकानां हितकाम्यया ॥[116]

इत्युादि । प्रशांसिताश्चेमे गीतायामपि-

> महर्षय: सप्त पूर्वे चत्वारो मनवस्तथा ।[117]

इति । भूमविद्यायाम्, ऋग्वेदादिभि: सह एकायनाख्यं शास्त्रमपि परिगणितम् ।

> महतो वेदवृक्षस्य मूलभूतो महानयम् ।[118]

इति च एकायनशास्त्रं प्रशस्यते । भारते;

> यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च ।[119]

---

115. म.भा. 12.322.26–8ab
116. Ibid. 12.322.32
117. भ.गी. 10.6 ab
118. पार. 1.76
119. म.भा. 12.47. 16 ab

इत्यत्र 'वाकनिषदादिशब्दाश्च एकायनशास्त्रविषयाः ।
उक्तं च श्रीपाञ्चरात्ररक्षायाम् 'इमं च वेदभागं
भोजराज-बलदेवाचार्यादयश्च विविञ्चते–
"यो वेदवृक्षं बहुमूलशाखं नानाफलार्थिद्विजसङ्घसेव्यम् ।
पूर्वश्रुतानुश्रवभेदभिन्नमारोपयत्तं पुरुषं प्रपद्ये ॥"

इत्यादिभिः'[120] इति । यथा चैकायनशाखाया अपौरुषेयत्वं तथा काश्मीरागमप्रामाण्य एव समर्थितमिति नेह प्रस्तूयते'[121] इति श्रीमद्यामुनमुनयः आगमप्रामाण्ये । इदं च काश्मीरागमप्रामाण्य पूर्वोक्तभोजराजकृतमिति केचिल्लिखन्ति । किं तस्य काश्मीरागमप्रामाण्यमित्येव नाम ? किं वा काश्मीदेशभवं काश्मीरपुरुषकृतमागमप्रामाण्यमित्यर्थे तथा प्रयोग इति विचार्यम् । स्वयमेकमागमप्रामाण्यं लिखन्तः इमेयामुन मुनयः पूर्वस्थित मागमप्रामाण्यं काश्मीरशब्दविशेषितं निर्दिशन्तीति युज्यते । आगमशब्दे काश्मीरपदान्वये तु, काश्मीदेशप्रसिद्धाः ये आगमाः तेषां प्रामाण्यं स्थापयन् स ग्रन्थः तत्स्थापनशेषतैव एकायनवेदप्रामाण्यमपि स्थापयामासेति वक्तव्यम् । आस्तामेतत् । सर्वास्वपि पाञ्चरात्रसंहितासु अविशेषमत्यादरेण प्रमाणतयोपन्यस्तस्यैकायनस्याप्रामाण्यमेवेति प्रत्यवस्थानं विष्णुपारम्यविषयप्रत्यवस्थानस्य निगूढाविर्भावमात्रमेति । एकायनशब्दार्थं मनसिकृत्यैव पुरुषसूक्ते 'तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते'[122] इति । उभयमिदं नारायणघटकायनपदप्रत्यभिज्ञापकं सत् नारायणैकनिष्ठां सर्वेषामपेक्षणीयां दर्शयति । अस्यैकायनस्य सर्ववेदमूलत्वं चोच्यमानमुपपत्तिपरामर्शिनामनुमोदनीयमवतिष्ठते । तथा हि-अचिदविशिष्टान् जन्तूनवलोक्य जातनिर्वेदेन भगवता क्रियमाणा सृष्टिस्तावत् सर्वेषां परमानन्दपरमपदप्रापणायेति संप्रतिपन्नम् । तस्य मोक्षस्य प्रतिलम्भश्च न तद्विषयकपारमैकान्त्यमन्तरेण घटते । अतो 'यो ब्रह्माण'[123] मिति मन्त्रोक्तरीत्या सनकादिसदृशान् सर्वान् सिसृक्षुः प्रथमं पारमैकान्त्योपयोगिनमुपदेशं विधाय, पश्चान् प्रजानां परःशतपुण्यपापपारवश्यात् कामैः स्वैः स्वैः हृतज्ञानतामवेक्ष्य श्रीनारायणीयोक्तरीत्या देवानां चाधिकारलिप्सामालक्ष्य स्वाराधनभूतानामेव कर्मणां देवतान्तराराधनरूपतां सूत्रभूतानिन्द्रादिशब्दघटनेन संपाद्य

120. पार. p. 5
121. आ. प्रा. p. 79
122. तै.आ. 3.12.1
123. श्वे. 6.18

स्वेतरोद्देशेन कर्मानुष्ठानमन्वमन्यत । आद्यः पन्थाः एकायने । द्वितीयः शाखाभूतेषु वेदेषु । क्रमेण त्रयीप्रवृत्तानामेव क्षुद्रपुरुषार्थजिहासां क्षुद्रप्रावण्यहेतुदेवतान्तरोपसर्पणवैमुख्यं च विलोक्य वेदान्तैर्वास्तवार्थमुपदिदेश । सर्मान्तर्यामिणं नारायणं वचसां वाच्यमुत्तमम्, तमेवं वेदानुवचनेन ब्राह्मणा विविदिषन्ति, यज्ञेन दानेन तपसाऽनाशकेन । अतो

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।[124]
निराशिषो निर्ममाश्च यथावदाचरत सावधानाः[125]

इति । देवतान्तरवाचिपदानि प्रयुज्य तदुपस्थापितदेवतान्तररूपार्थेऽनुपरम्यान्तर्यामिपर्यन्तचिन्तनमिति श्रममिमं विना,

"प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्"[126]

इति न्यायेन भगवदेकान्तविष्णुवासुदेवनारायणकेशवमाधवादिशब्दपुरःसरभगवदाराधनप्रक्रियानिरताः शुद्धयाजिनः श्वेतद्वीपवासिनः एकायनशाखानिष्ठपरमैकान्त्युदाहारणभूताः । अत एव तेष्वत्यर्थमादरो भगवत इति भारते प्रपञ्चितम् ।

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।[127]

इति वदन्नेवाह,

ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ।[128]

इति । एवं,

चतुर्विधा भजन्ते मां ।[129] इत्युक्त्वा,

---

124. भ. गी. 3. 30
125. म. भा. 13. 105. 28
126. द्र. समयोचितपद्यमलिका. p. 46
127. भ. गी. 9. 29ab
128. Ibid 9. 29cd
129. Ibid 7. 16a

उदाराः सर्व एवैते ।[130]

इति सर्वान् प्रशंसन्नेवोपरि प्रस्तौति,

ज्ञानी त्वात्मैव मे मतम् ।[131]

इत्यादि । अनेकान्तिभिः क्रियमाणं यत् तत् सर्वं देवदेवस्य चरणावुपतिष्ठते,

सर्वदेवनमस्कारः केशवं प्रति गच्छति ।[132]

इति न्यायेनेत्युक्त्वा भारत एवेदमप्यदर्शि

याः क्रियाः संप्रयुक्ताः स्युरेकान्तगतबुद्धिभिः ।
ताः सर्वाः शिरसा देवः प्रतिगृह्णति वै स्वयम् ॥[133]

इति । तथा गौरवं वहति पाञ्चरात्रिषु, यथा तत्क्रियाः शिरसा गृह्णातीति । विश्वतो विरज्य जीवात्मानमपि शुद्धं निर्धार्य तदनन्तरं परमात्मानमुपासितुं प्रवृत्ताः तदभ्यसनपराश्च ये, तेषां स्वाराधनप्रक्रियाः प्रतिपादयितुं प्रवृत्तो भगवान्, आराध्यानां विग्रहाणामवतारमूर्तित्वात् शुद्धयजनसरणिमेवोपदिशेत् । अतो वासुदेवतद्व्यूहविभवाराधनप्रतिपादकमेकायनमेव परमादरास्पदं भगवतः । तदनधिकारिविषये च व्यामिश्रयजनपरवेदप्रचारः, एषामप्यन्तत उद्धरणीयत्वात् । तदाह—

अनन्यदेवताभक्ता ये मद्भक्तजनप्रियाः ।[134]
मामेव शरणं प्राप्तास्तेऽतीव दयिता मम ।[135]

इति । तर्हि प्रथमोपदिष्टदेवतान्तर्यामिभगवद्रूपबोधकमन्त्रमूलककर्मानुष्ठानं परित्यज्य शुद्ध-यजन एव सर्वैः प्रयतितव्यमिति मतिर्मा भूत् । नित्यनैमित्तिकेषु कर्मसु तेषामनुप्रवेशो न

---

130. Ibid 7.18a
131. Ibid 7.18b
132. म. भा. 13. 639. 4pr.
133. Ibid 12. 331. 50
134. Ibid. 14. App. 4. 1668pr.
135. 14. App. 4. 1669 pr.

दोषाय, तेषां कर्मणां फलोद्देशेन करणात्, अकरणे प्रत्यवाय इत्येवानुष्ठानात्। अस्माभिरनुद्देशेऽपि अवर्जनीयतया देवतान्तराण्यपि तत्र निमन्त्रितब्राह्मणन्यायेन तृप्ता भवन्ति चेत्, न तत्रास्माभिर्विद्वेषः कार्यः। काम्यं तु किमपि न कार्यम्, न तरां देवतान्तरोद्देशेना यदुच्यते,

दुर्निमित्ते भये पापे ग्रहादीनां विपर्यये।
विष्णुतद्भक्तपूजाभिः शान्तिं कुर्वीत नान्यथा॥[136]

....

आरम्भे कर्मणां पुष्ट्यै विघ्नानां प्रशमाय च।
कुर्यात् सपरिवारस्य विष्वक्सेनस्य पूजनम्॥[137]

इत्यादि। यथा हि विषयसंनिधिरत्यन्तनिःस्पृहेणापि यथाशक्ति वर्जनीयः तथा परमैकान्तिनां देवतान्तरसंनिधिः। तेषां बाधकविषयसंनिधायकत्वात्। श्रूयते च बृहदारण्यके 'यथा पशुरयं स देवानाम्। यथा ह वै बहवः पशवो मनुष्यं भुञ्ज्युः, एकमेकैकः पुरुषो देवान् भुनक्ति। एकस्मिन्नेव पशावादीयमाने अप्रियं भवति, किमु बहुषु। तस्मादेषां तन्न प्रियम्, यदेतन्मनुष्या विद्युः'[138] इति। एवं ब्रह्मवेदनस्य देवानिष्टत्वादेव स्मृतिरपि,

परमात्मनि गोविन्दे भक्तिमुद्वहतः नृणाम्।
संसारन्यूनताभीतास्त्रिदशाः परिपन्थिनः।[139]

इति। उपरिवरवसुरप्यधः पपात देवेषु दाक्षिण्यं वहन्, किं पुनरन्ये? तस्मात् देवतान्तरवर्जनेन एकवासुदेवाराधनप्रतिपादकमेकायनं मुख्यं मूलभूतं च। न तन्निष्ठाश्चैव मुच्यन्ते,

---

136. भा. सं. 1. 80
137. Ibid. 1.84
138. बृ.4.10.
139. मूलं मृग्यम्

ये तु वाकनिषन्निष्ठाः तत्तत्संस्कारसंस्कृताः ।
ते वै भागवताः शुद्धाः वासुदेवैकयाजिनः ॥[140]

इति ।

तत् सिद्धं सर्वज्ञपरमपुरुषकृपापरीवाहत्वात्, सर्ववेदानुरोधित्वात्, एकायनाख्यमूल-वेदोपजीवित्वाच्च पाञ्चरात्रं कार्त्स्न्येन प्रमाणमिति । अर्वाचीनकतिपयभागाप्रामाण्यं च वर्जनीयमिति विभागावसरे वक्ष्यते ।

पाञ्चरात्रादिशब्दाः

अथ पञ्चरात्रशब्दार्थः । अस्यैव नामान्तराण्यपि सन्ति । यथोक्तमस्माभिः श्री पाञ्चरात्ररक्षाभूमिकायाम्-भगवच्छास्त्रं तन्त्रं सिद्धान्तः आगमः इति बहुधा व्यवह्रियमाण स्यास्य शास्त्रस्य पञ्चरात्रमिति प्रसिद्धं नाम । तदर्थस्तु पदस्याविस्पष्टार्थकतया बहुधा-तन्त्रग्रन्थैरप्युत्प्रेक्षणीय एवासीत् ।

'प्रवक्ता छन्दसां वक्ता पञ्चरात्रस्य यः स्वयम्' [141]

इत्युक्तरीत्या वेदानां प्रवचनं पञ्चरात्रकरणं च प्रथमतो भगवत्कर्तृकमिति,

पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम् ।[142]

इति भारतप्रशंसिततयाऽप्यवधृतमिति भगवच्छास्त्रमिति नाम । विष्णुतन्त्रे-

अष्टोत्तरसहस्राणि अष्टोत्तरशतानि च ॥
पञ्चरात्राणि तन्त्राणि सन्ति मे कमलोद्भव ॥[143]

इति वदता विष्णुना,

---

140. भा.सं. 5.12
141. द्र. श्रीदेशिकस्तोत्राणि p. 172.
142. म.भा. 12.337.63.
143. वि.त. 1.36cd, 7ab

एतानि पञ्चरात्राणि नामानि कथितानि वै ।
शतमष्टोत्तारणां च तन्त्राणां च यथागमम् ॥[144]

इति अष्टोत्तरशतं नाम्नापि निरदिश्यत । पञ्चरात्रसिद्धान्तमार्गेषु बहुषु मन्त्रसिद्धान्तं गृहीत्वा,

मन्त्रसिद्धान्तमार्गेषु नवरत्नं प्रसिद्धकम्[145]
(वि.त.ब्रह्मोत्सवाध्याये)

इत्यारभ्य पाद्म विष्णुतन्त्र-कपिञ्जल-ब्रह्मसंहिता-मार्कण्डेय-श्रीधरसंहिता-परमसंहिता-भारद्वाज (पराशर) नारायणतन्त्रभेदेन नवरत्नमिति कश्चिन्निर्दशः । पाद्मे चर्यापादे,

पाद्मं सनत्कुमाररूपं तथा परमसंहिता ।
पाद्मोद्भवं च माहेन्द्रम् ....[146]

इति पञ्चरत्नानि भवन्तीति चाहुः । सनत्कुमारसंहिता विष्वक्सेनसंहिता-सात्यकितन्त्र-अहिर्बुध्न्यसंहितादयः श्रीवात्स्यवरदाचार्यविरचितप्रपन्नपारिजातादौ, प्रकृतनिक्षेपरक्षायां च बहुलमुदाह्रियन्ते, यथा परमसंहिता, श्रीभाष्य एव पाञ्चरात्राधिकरणे । रक्षान्तरेषु चान्यान्यपि बहूनि । एवमपि,

सात्त्वतं पौष्करं चैव जयाख्यं तन्त्रमुच्यते ।
रत्नत्रयमिति ख्यातम् .... ॥[147]

इति जयाख्यसंहितावचनमनुरुद्ध्य साक्षाद्भगवन्मुखोद्गतमिदं त्रयमेव मुख्यं रत्नत्रयमितीर्यते सर्वैराचार्यैः । एतद्विवरणभूताः अन्ये ग्रन्थाः । एवं च साक्षात् भगवन्मुखोद्गतत्वस्य सर्वत्र वक्तुमशक्यत्वेऽपि तद्व्याख्यानरूपत्वात् सर्वं तथा व्यपदिश्यत इति वक्तव्यम् । भगवदर्चाप्रतिपादनैकान्त्यात्तु भगवच्छास्त्रत्वं सर्वेषां सुस्पष्टमविशिष्टं, परं तत् वैखानसस्यापि ।

---

144. Ibid. 75cd, 6ab
145. अकारोमूग्यः
146. पा.च. 33.204abc
147. ज. 1.2 (अ.पा)

एवमेषां तन्त्रमिति नाम,

तन्त्रेण तेन मार्गेण यो मां नित्यं समर्चयेत् ।
तं त्र.यतीति संसारात् तन्त्रमित्यभिधीयते ।
ततो बिपुलसंज्ञानं मत्प्रतिष्ठादिगोचरम् ।
त्राणं च कुरुते यस्मात् तस्मात् तन्त्रमितीरितम् ।।[148]

इति निरुक्तं विष्णुतन्त्रे ।

सिद्धान्तसंज्ञार्थोऽपि-सिद्धान्त इति पञ्चरात्रमिति च नामद्वयमस्तीति,

एवं नानागमानं च सामान्यं विद्धि सर्वदा ।
नामद्वयं वा सिद्धान्तं पाञ्चरात्रेति पौष्कर ।।[149]

इत्युक्त्वा,

ये जन्मकोटिभिः सिद्धास्तेषामन्तेऽत्र संस्थितिः (वै स्मृतः?)[150] ।।

इत्यदर्शि पौष्करे । पाद्मे,

मीमांसादिषु शास्त्रेषु ये सिद्धार्था मनीषिणः ।
तेषामन्तेऽधिकारोऽस्मिन्निति सिद्धान्तसंज्ञितम्[151] ।।

इति । परमेश्वरे च,

ये जन्मकोटिभिः सिद्धास्तेषामन्तेऽत्र जन्मनः ।
यस्मात् तस्मात् विवेदैष सिद्धान्ताख्यो यथार्थतः ।।[152]

इति ।[153] एतदनुसारात् पौष्करेऽपि अन्तोऽत्र संस्थिति रिति पाठः स्यात् । अन्तशब्दस्य

---

148. वि.त. 1.84,5
149. पौ. 38. 302 cd, 3ab
150. Ibid. 38. 305cd
151. पा.ज्ञा. 1.79
152. पार. 19.544
153. पा.र.भू. p 445-7

संस्थितिरित्यर्थः । तथा ह्युक्तं न्यायदर्शने सिद्धान्तशब्दार्थवर्णनासरे-'तन्त्राधिकरणाभ्युपगमसंस्थितिः'सिद्धान्तः'[154] इति अत्रैव श्लोके-

"....तेषामन्तोऽत्र जन्मनः (वै स्मृतः।)[155]" ॥

इति पौष्करपाठः ।

आगम इति नाम पञ्चरात्रसिद्धान्तेषु चतुर्ष्वेकतमस्य असाधारणम् । अथापि सर्वस्याप्यागमाख्या प्रसिद्धा । श्रुतीनामप्यागमशब्दव्यपदेश्यत्वेऽपि तन्त्रसिद्धान्तविशेषासाधारण्यमपि विवक्षाभेदात् भवितुमर्हति । श्रुतीनां पारम्पर्येणाधीत्यैव संपाद्यत्वात् परम्परयाऽऽगच्छतीत्यागम इति नाम ।

सृष्टिश्च प्रलयश्चैव देवातानां समर्चनम् ।
साधनश्चैव सर्वेषां पुरश्चरणमेव च ।
षट्कर्मसाधनं चैव ध्यानयोगश्चतुर्विधः ।
सप्तभिर्लक्षणैर्युक्तं त्वागमं तद्विदुर्बुधाः ।[156]

इति तन्त्रेष्वागमशब्दं निर्वहन्ति । सद्ब्रह्मवासुदेवयाजिभिर्मुख्यकल्पाधिकारिभिर्वंशक्रमागतैराहृतः सिद्धान्तः सिद्धान्तेषु प्रधानभूतः । कृतयुगे धर्मान्तरं विना स्थितः आगमसिद्धान्तः इति तत्र कस्यचिद्विशेषमाहुः । व्याकरणे मध्यनिविष्टस्य वर्णराशेरागम इति नाम । पञ्चरात्रं श्रुतिस्मृतिमध्यनिवेशादागमो भवति । वेदवदपौरुषेयत्वाभावात् सर्वज्ञकर्तृकतया भेदापेक्षणावश्यकत्वाभावाच्च । रुद्रबुद्धादिसर्वग्रन्थानुस्यूततया आगमव्यवहारस्तु त्रयीमूलकत्वापौरुषेयत्वान्यतरद् विना मुखान्तरेणागत्वात् । मानत्वामानत्वे तु यथार्हमिति । एवं सात्त्वतादीनामपि ग्राह्यम् । सन्तः ज्ञानिनः, सत्त्वान् भगवान्, तदीयं सात्त्वतम्[157] इति आगमप्रामाण्ये निरवाचि ।

---

154. न्याद. 1.1.26
155. पौ. 38.305d
156. द्र.वाचस्पत्य p. 618
157. आ.प्रा p. 71

पञ्चरात्रशब्दार्थः

अथ पञ्चरात्रमिति नाम विचार्यते । स एतं पुरुषमेधं पञ्चरात्रं यज्ञक्रतुमपश्यत् तमाहरत्' [158] इति शतपथब्राह्मणे अस्तीति वदन्ति । यद्यपि शब्दमात्रेण न नः किंचित् । द्विरात्र-त्रिरात्र-चतुरात्रादिवत् पञ्चरात्रोऽपि कश्चित् यज्ञ इत्येतावता पञ्चरात्रसंहितायां तन्नाम्नः किमायातम् । यदि पुनः अर्चाराधनक्रमस्य वैखानसाद्युक्तस्य वैदिकयागहोम-प्रक्रियासाजात्यं बह्वस्तीति वैखानसविजयेऽस्माभिरपि दर्शितेन पथा द्विरात्रदिवैलक्ष्यण्येन पञ्चरात्रयज्ञसादृश्यं पञ्चरात्रोक्तप्रतिष्ठार्चनादिपद्धतौ वर्णयितुं पार्येत, तदा पञ्चरात्रमिति गौणं नामेति निरूप्येत । तदितस्तद्यज्ञविमर्शात एव निर्धारणीयमिति मन्येत-अथापि तस्य तत्र नारायणसंबन्धित्वावगमात् तावता स व्यवहार इति । पुरुषो ह वै नारायणोऽकामयत, अतितिष्ठेयं सर्वाणि भूतानि अहमेवेदं स्यामिति । स एतं पुरुषमेधं पञ्चरात्रं यज्ञक्रतुमपश्यत् । तमाहरत् । तेनेष्ट्वाऽत्यतिष्ठत् सर्वाणि भूतानि । इदं सर्वमभवत् । अतितिष्ठति सर्वाणि भूतानि, इदं सर्वं भवति, य एवं विद्वान् पुरुषमेधेन यजते, यो वा एतदेवं वेद[159] इति श्रुत्यानुपूर्वी । नूनमिह बृहदारण्यके सर्वात्मकब्रह्मभावकामनया मनुष्यदिभिर्यदुपासना क्रियते, तस्य ब्रह्मणोऽपि तथात्वमुपासनबलादेव संपन्नमिति उपासनप्रशंसनेन तत्र प्रेरणवत्, पञ्चरात्राख्य-पुरुषमेधयज्ञक्रतौ पुरुषप्रेरणार्थं नारायणेनापि तस्य कृतत्वप्रशंसनं कृतम् । क्रतुफलं सर्वभावः । तच्च सर्वातिशयितत्वम् । तच्च मोक्ष एव वा तत्तुल्यं वा फलमस्तु । सर्वथा द्विरात्रादौ ईदृशफलमनुक्त्वा पञ्चरात्रे एतद्वर्णनात् पञ्चरात्रागमानामपि भगवद्यज्ञपराणां इतरवैराग्यपूर्वकमोक्षफललम्भकत्वमस्तीति प्रमेयसूचनं स्यात् । अन्यत् पञ्चरात्र-यज्ञानुष्ठानरीतिविचारतो विवेचनीयं भवेत् । ग्रन्थारूढास्तावदर्था एवम्-

शब्दादयो विषया एव पञ्च महाभूतानि । तद्गोचराज्ञानविनाशकतेजोरूपत्वात् पञ्चरात्रमिति विष्णुसंहितायां परमसंहिताप्रभृतौ च ।

---

158. श.ब्रा. 13.6.1
159. Ibid.

पञ्चेतराणि शास्त्राणि रात्रीयन्ते महान्त्यपि ।
तत्संनिधौ समाख्याऽसौ तेन लोके प्रवर्तते ॥[160]

इति पञ्चत्वमृच्छन्तीति पञ्चीभूताः रात्रयः यथावदर्थाप्रतिपादकानि शास्त्रान्तराणि येनेति च पाद्मसंहिता षट्समया इत्येवमादिना प्रसिद्धानां शास्त्राणां पञ्चान्तर्गतत्वायोगात् निषिद्धशास्त्राणि विहाय शिष्टपरिगृहीतानि शास्त्राण्येव पञ्चेति निर्दिश्य तेषां रात्रित्वमत्राभिप्रेतमिति विमर्शे विधीयमाने 'साङ्गेषु वेदेषु निष्ठामलभमानः शाण्डिल्यः पञ्चरात्रमधीतवान्'[161] इत्युक्त्या, भारतस्य पञ्चमवेदत्वात् तस्योपलक्षणत्वात् इतिहासपुराणादिकं वेदार्थव्याख्यानरूपं सर्वं पञ्चमत्वेन परिगणयितुं शक्यमिति हेतुना,

अधीता भगवन् वेदाः साङ्गोपाङ्गाः सविस्तराः ।[162]

इति परमसंहितोक्तं चानुसृत्य वेदचतुष्कतदुपजीविग्रन्थजातयोः रात्रिपञ्चकत्वं युक्तम् । इमानि शास्त्राणि वस्तुतो महान्त्यपि न पञ्चरात्रमिव वक्तव्यमर्थं विशदं वदन्ति । अत एव प्रजानां भगवद्धर्मवैलक्षण्यापरिज्ञानात् यथावन्मुमुक्षुत्वं न निष्पद्यत इति सर्वापेक्षया पञ्चरात्रश्रैष्ठ्यं च सम्यगुपपादितं भवति । वेदेष्वितिहासेषु परतत्त्वहितादिग्राहणं रात्रिषु वस्तुग्रहणतुल्यम् । पञ्चरात्रे तद्दर्शनं च मध्याह्न इवेति प्रशंसातात्पर्यात् । पञ्चरात्राण्यप्यन्यानि विनिन्द्य परमसंहिता प्रशस्यते, तत्र,

आगमेषु न चैकस्मिन् पश्यामि परमं हितम्[163]

इत्युक्तेः । अतो नैतावता वेदा दूषिता भवन्ति, न हि निन्दान्यायात् । अत एव भाष्यकारैः परमसंहितावाक्यमेवोपात्तम्, यथा तस्य पञ्चरात्रदूषणे तात्पर्यं दुर्वचम्, तद्वत् वेददूषणेऽपि न तात्पर्यमिति सहृदयसंमन्तव्यमेतदिति ज्ञापयितुम् ।

लोके अहोरात्रविवक्षया द्व्यहं त्र्यहमित्येवमहःशब्दस्येव द्विरात्रं त्रिरात्रमिति

---

160. पा. ज्ञा. 1.72
161. श्रीभा. 2.2.42
162. प. 1.3 ab
163. Ibid. 1.5ab

रात्रिशब्दस्य प्रयोगात् अहोरात्रपञ्चकपरत्वस्वारस्यं पश्यन्त: शास्त्रमिदं पञ्चभिर्दिनै: पञ्चभि: पुरुषै: गृहीतमिति हेतो: पञ्चरात्रमित्यप्याहु: । तंत्रश्वरसंहितायाम्,

पञ्चायुधांशास्ते पञ्च शाण्डिल्यश्चौपगायन: ।
मौञ्जायन: कौशिकश्च भारद्वाजश्च योगिन: ॥[164]

....

पञ्चापि पृथगेकैकं दिवारात्रं जगत्प्रभु: ।
अध्यापायमास यत: .... ॥[165]

.... पञ्चरात्रमितीर्यते ।[166]

इति भगवदध्यापितत्वं शाण्डिल्यादीनामुक्तम् । प्रकारान्तरमप्यध्यापनविषये तत्र लक्ष्यते,

पुरा तोताद्रिशिखरे शाण्डिल्योऽपि महामुनि: ॥[167]

....

द्वापरस्य युगास्यान्ते आदौ कलियुगस्य च ।
साक्षात् संकर्षणाल्लब्ध्वा वेदमेकायनाभिधम् ॥

सुमन्तुं जैमिनिं चैव भृगुं चैवोपगायनम् ।
मौञ्जायनं च तं वेदं सम्यगध्यापयत् पुरा ॥[168]

इति । तदिदं वेदविषयम्, पूर्वोक्तं तु तन्त्रविषयमिति विवेक्तव्यम् । तथा अहोरात्रस्येव अहोरात्रांशानामपि रात्रिशब्दग्राह्यतामिच्छा पञ्चकालविभागपरत्वादेव पञ्चरात्रमत्यपि वदन्ति । अहोरात्रे अहर्नात्रे पञ्चधाविभागस्य प्रात:संगवमध्याह्नाप:ह्नसायाह्नरूपेण प्रसिद्धतया

164. ई. 21. 519
165. Ibid. 21.532abc
166. Ibid. 21533b
167. ई. 138cd
168. Ibid. 1.40, 1

तद्व्यावर्तनेन रात्रिमपि घटयित्वा पञ्चधाविभजनमिति ज्ञप्तये, रात्रिकार्ययोगप्राधान्यज्ञप्तये च पञ्चरात्रेति प्रयोग इति तदा भाव्यम्। पञ्चकालकर्तव्यनित्यकृत्यपञ्चकपरत्वं पाञ्चरात्र-शब्दस्य स्यादिति आचार्यैरत्र पञ्चकालविभाग-तत्कृत्यनिरूपणदर्शनेन कामं वदन्तु। आचार्याभिमतः पाञ्चरात्रशब्दार्थोऽयमिति तु तावता न सेत्स्यति। अह्न इव रात्र्या अपि पञ्चधा विभागः प्रदोषः, अनुयोगान्ताराधनम्, पूर्वरात्रयोगः, निद्रा अपररात्रयोगः, ब्राह्ममुहूर्तकाल इति योगैदम्पर्येण विभागः पञ्चरात्रेष्ट इत्यपि स्यात्। नारदपञ्चरात्रे तु,

> रात्रं च ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम्।
> तेनेदं पञ्चरात्रं हि प्रवदन्ति मनीषिणः॥[169]

इति विष्णुसंहितादिवचनेन प्राक् शब्दादिपञ्चविषयज्ञानरूपाज्ञाननिवर्तकत्वेन पञ्चरात्रत्व-मुक्तम्। परव्यूहविभवहार्दार्चारूपपञ्चरूपविषयकज्ञानहेतुतयाऽपि पाञ्चरात्रत्वं भवितुमर्हति। 'रा' शब्दो धनवाची। पञ्चरूपाण्येव धनं तद्रक्षकं तत्स्थापकमिति च। पाद्मे ज्ञानपादो योगपादः क्रियापादश्चर्यापाद इति पादात्मना विभागवत्, पारमेश्वरे काण्डात्मना विभागवच्च नारदपाञ्चरात्रे रात्रशब्द घटनेन पञ्चधा विभागेन पञ्चरात्रत्वं दर्शितम्। एवं सनत्कुमारसंहिता-यामपि ब्रह्मरात्रेन्द्ररात्रेत्येवं विभागोऽस्ति। अत्र सर्वत्र रात्रीयन्त इत्यर्थो न भवितुमर्हति।

अहिर्बुध्न्यसंहितायां वैष्णवसुदर्शनाख्यसंकल्पबलेन तदा शास्त्रप्रचारमचिन्तयत्, यदा संकर्षणोदितस्य प्राच्यस्यातिविस्तृतस्ये शास्त्रस्य लोपेन सर्वो लोको मोहाकुल आसीत्। तदा च हरेर्वाक् संभवः। अत एव वाच्यायननामा अपान्तरतपाः वेदान् आविरभावयत्, कपिलः साख्यं हिरण्यगर्भो योगं पशुपतिः पाशुपतम्। ततो विष्णुः सदागमात् सारमुद्धृत्य,

> तत् परव्यूहविभवस्वभावादिनिरूपणम्॥
> पञ्चरात्राह्वयं तन्त्रं मोक्षैकफललक्षणम्।[170]

निर्ममे इत्युक्तम्। तत्परिशीलने एकायनाख्यस्य सदागमस्यापि पञ्चरात्रतन्त्ररूपविवरण-सापेक्षत्वात् एतदभावे अस्पष्टार्थकत्वमेमेति हेतोरस्य पञ्चरात्रस्य संनिधौ वेदः साङ्ख्यं

---

169. ना.प.ज्ञा. प्र. 1.44
170. अहि. 11.63cd, 4ab

योगः पाशुपतमेकायानं च रात्रीयन्ते, न विशदमर्थं दर्शयन्ति इत्यभिमतं स्यादिति मन्येत । एवं परव्यूहविभवहार्दार्चानिरूपणादेव पञ्चरात्रस्य वैशद्यावहत्वमिति पञ्चरूपप्रतिपादनपरत्वमपि अनेकार्थकस्य पञ्चरात्रशब्दस्य तत्संहितातः तत्पञ्चकानिर्देशोऽपि कथमप्यानीयतां नाम । सर्वथा इतरप्रमाणापेक्षया अस्य वैलक्षण्यं यादृशार्थपरत्ववर्णने पुष्कलमुपपादितं स्यात्, स पञ्चरात्रशब्दार्थ इति निगमयितव्यम् । एवं पञ्चकालप्रक्रियां परव्यूहादिरूपपञ्चकं च यथा, तथा आगम-मन्त्र–तन्त्र-तन्त्रान्तराख्यान् प्रतिनियतान् चतुरः सिद्धान्तान् त्रयीधर्मनिष्ठानामपि दीक्षापूर्वभगवदाराधनपद्धतिं च पञ्च प्रतिपादयतीत्यतोऽपि पञ्चविधज्ञानहेतुत्वं पञ्चरात्रस्य बोभवीति ।

आगमानामपरिमितत्वम्

एषामागमानामियत्तैव न लक्ष्यते । वैखानसागमा अपि प्रथमतो मरीच्यादिभिर्यावदाकारेण गृहीताः, तावदाकारेण सांप्रतं न लक्ष्यन्ते । अधिकारिणामायुरारोग्यादिह्रासमालोक्य सारोद्धारेण तैराश्रितेभ्य उपदिष्टा इतीदं विमानार्चनकल्पान्ते ग्रन्थविभागादिकं विहतमेवेक्ष्य निश्चिनुमः । प्रायेण पञ्चरात्रग्रन्थेषु उपक्रमे तेन तेनोपदेष्ट्रा अपरिमितात् भगवन्मुखश्रुतात् कालानुसारेण संगृह्य उपदेशः क्रियत इति निर्दिश्यते । यथा परमसंहितायां मार्कण्डेयेन,

> पूर्वे मन्वन्तरे लब्धं मया तन्त्रं च देवल ॥
> तावता चिरकालेन न कस्मैचिदुदाहृतम् ।

> तन्त्रमेतदशेषेण ग्रन्थबाहुल्यकारणात् ॥
> एकदेशमुपाश्रित्य बहवस्तापसा गताः ।

> ततस्तु बहुधा भिन्नमिदं तन्त्रं जगत्यभूत् ॥
> अकृतार्थमसारं च विरुद्धं च परस्परम् ।

पञ्चरात्रमिदं प्रोक्तं योगतन्त्रमिदं परम् ॥
निर्मितं परमेणैव पुरुषेण तपोधन ।[171]

....

ये तु जानन्त्यशेषेण तन्त्रमेतन्मनीषिणः ॥
न तेषां पुण्यमार्गेषु संशयो जायते क्वचित् ।[172]

....

अध्यायलक्षमेतत्तु सृष्टिसंहारसंयुतम् ॥[173]

....

न त्वेतदखिलं तन्त्रं श्रोतुं देवल शक्यते ॥[174]

....

मन्त्रसारमुपोद्धृत्य तव वक्ष्यामि देवल ॥[175]

इति । अत्र श्वेतद्वीपे मार्कण्डेयं प्रति उपदेष्टृत्वेन सनकः कथितः । सनकं प्रति उपदेष्टृत्वे शाण्डिल्यः कथितः पारमेश्वरे । तत्र च,

एतस्मिन् पर्वतश्रेष्ठे पुराऽनेन महात्मना ।
साक्षाद्भागवतोऽव्यक्तादच्युतादच्युताभिधात् ॥[176]

....

---

171. प. 1.30cd = 4ab
172. Ibid. 1.36cd, 7ab
173. Ibid. 1.45cd
174. Ibid. 1.46cd
175. Ibid 1.47cd
176. पार. 1.13

श्रुत्वैवं प्रथमं शास्त्रं रहस्याम्नायसंज्ञितम् ॥
दिव्यमन्त्रक्रमोपेतं मोक्षैकफललक्षणम् ।
भूयः संचोदितात् तस्मात् तेन लोकहितैषिणा ॥
श्रुतं विस्तरतः शास्त्रं भोगमोक्षप्रदं हि यत् ।
अनुष्टुप्छन्दोबन्धेन प्रोक्तं भगवता स्वयम् ॥
सात्त्वतं पौष्करं चैव जयाख्येत्येवमादिकम् ।
तत्सर्वं विदितं सर्वं शाण्डिल्यस्य महात्मनः ॥[177]

....

आद्यं भागवतं धर्ममादिभूते कृते युगे ।
मानवा योग्यभूतास्तु अनुतिष्ठन्ति नित्यशः ॥[178]

....

अन्तर्दधाति सर्वोऽयं वासुदेवसमाहृतः ।
ततो योग्याय भगवान् प्रादुर्भावयति स्वयम् ॥[179]

....

सारभूतं विशेषेण पौष्करार्थोपपादकम् ॥
मूलवेदानुसारेण छन्दसाऽनुष्टुभेन च ।
लक्षग्रन्थेन सर्वार्थक्रियाज्ञानोपलब्धये ॥[180]

....

177. Ibid. 1.16cd-9
178. Ibid. 1.78
179. Ibid. 1.80
180. Ibid. 1.90cd-1

तस्मात्तु सारमुद्धृत्य[181] …. ….

…. …. ….

संप्रवक्ष्यामि ते शास्त्रम्[182] …. ….

इत्यादि । अत्रैव पारमेश्वरे 19 अध्याये,

आद्यं नित्योदितव्यूहस्थापनादिप्रकाशकम् ।
अपौरुषेयं सद्ब्रह्म वासुदेवाख्ययाजिनाम् ॥
लक्ष्यभूतं द्विजेन्द्राणां हृदिस्थमधिकारिणम् ।
ब्रह्मोपनिषदाख्यं च दिव्यमन्त्रक्रियान्वितम् ॥
विवेकदं परं शास्त्रमनिच्छातोऽपवर्गदम् ।
एवं नित्योदिताख्यस्य नित्याकारस्य च प्रभोः ॥
वसुदेवाभिधानस्य षाड्गुण्यादिमहोदधेः ।[183]

…. ….….

एतदागमसिद्धान्तं श्रुतिरूपं तु विद्धि तत् ।
एष कार्तयुगो धर्मः सर्वधर्मोत्तमः स्मृतः ॥[184]

इत्युक्त्वा, तस्मादागमसिद्धान्तात् जाग्रद्व्यूहादिमूर्तिसंकर्षणप्रद्युम्नानिरुद्धवागीश्वररुद्रादित्येन्द्रादिदेवनारदादिदेवर्षिमुखेन पञ्चरात्रप्रपञ्चनं मन्त्रतन्त्रतन्त्रान्तररूपभेदविवेचनं च विहितमस्ति । पौष्करे च 39 अध्याये आगमानां प्रमाणं (इयत्तां) संज्ञां च वक्ष्यामीत्यारभ्य संक्षिप्य कनिष्ठमध्यमोत्तमरूपेण विभज्य अनुष्टुप्छन्दोबद्धतां सर्वत्र्येष्व श्लोकशतादर्ध

181. Ibid. 1.92c
182. Ibid. 1.93c
183. Ibid. 19.524-7
184. Ibid. 19.528

पादसंज्ञकम्, द्विगुणं तन्मूलसंज्ञं, सार्धशतस्य नाम स्यात् उद्धार इति सार्धं शतद्वयम् उत्तरमिति, तद्द्विगुणं बृहदुत्तमिति, सार्धं सहस्रं कल्पमिति एवंसंज्ञा आगमाः सन्त्यनेकश इत्युक्त्वा अथ, द्विषट्सहस्रपर्यन्तं संहिता, ततः कल्पस्कन्धः, तन्त्रमित्यादिनानासंज्ञाः निर्दिश्य, कालेन सह निर्यातमसङ्ख्यं परमेश्वरात्,

आद्यं सर्वागमानां च परमेश्वरमागमम् ।[185]

इत्युक्त्वा संकर्षणप्रद्युम्नानिरुद्धमुखेन प्रकाशवृद्धिं प्रकाश्य,

वागीश्वराच्च सिद्धानां तैरुद्धृत्य यथोदितम् ॥
सम्यक् समुच्चयीकृत्य नवनीतं यथोदधेः ।
विभोर्विद्याधिदेवस्य ब्रह्मणोऽस्य प्रकाशितम् ॥[186]

रुद्रादित्येन्द्रपूर्वाणां ब्रह्मणा नारदादीनाम्, तेभ्यो लोकत्रयान्तस्थर्षीणाम्, नानादेशवशाच्चैव नानाजातिवशादप्येनमित्यसङ्ख्यतैव दर्शिता । अत्रैवं शङ्का स्यात्-भगवत्प्रोक्ते पौष्करेऽस्मिन् भाविनामनन्तानां भेदानां कथं निर्देश इति? तत्र संक्षेपविस्तररूपेण बहुधा भगवता तदा तदोपदेशो वर्तित इति ज्ञायमानतथा कृतयुगप्रवर्तितस्य धर्मस्य मध्ये मध्ये विच्छेदे परःसहस्रकृत्व उद्भवोत्सादौ संभाव्येते इति प्रतिचतुर्युगमेवं प्रवर्त्यत इति च पूर्ववृत्तप्रतिपादनं पश्चात्तने पौष्कर इति समाधेयम् । भविष्यत्प्रभेदप्रदर्शनमिति वा वक्तव्यम् । किमयं पौष्करप्रबन्धो भगवन्मुखत एव साक्षान्निर्गतः, उत तदर्थसंग्रहोऽन्येन कृत इति चेत्-यथा श्रीकृष्णेनोपदिष्टो गीतार्थो वेदव्यासेन श्लोकात्मना ग्रथितः एवमिति स्यात् । तदा कर्तुरन्यस्य नाम निर्ज्ञातव्यं भवति । उक्तरीत्या अनुष्टुप्छन्दोबद्धमेवोपदिष्टं भगवतेत्यङ्गीकारेऽपि पौष्कर उवाचेत्यारभ्योक्तानां श्लोकानां को ग्रथिता? नवमाध्याये 'ऋषय ऊचुः' 'पौष्करः प्रत्युवाचे'त्यपि केचन श्लोका निर्दिश्यन्ते तेषां भगवन्मुखोद्गतत्वं कथमिति शङ्का स्यात् । भारते वैशम्पायन उवाचेत्यादीनामपि पश्चात् व्यासकर्तृकत्ववत् श्रीमद्रामायणात्सर्गचतुष्टयस्यापि वाल्मीकिकर्तृकत्ववत् मन्वादिस्मृतिषु उपक्रमभागादीनामपि मन्वादिकृतत्ववत् सर्वं भगवत्कर्तृकमित्येव स्थापनीयम् । अथ वा तदुद्दिष्टांशानां यथावदनुवादस्य पौष्करसात्त्वतजयाख्येषु वर्तमानत्वात् तावता सर्वं भगवदुक्तमेवेत्युच्यते । इयमेव

---

185. पौ. 39.18ab
186. Ibid. 39. 33cd, 4

शब्दानुपूर्वी तन्मुखनिःसृतेति किं ग्रहेण? सर्वथा

'पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम्'।[187]

इति महाभारतेऽप्युक्तत्वात् नात्राविश्वसनीयता। कृत्स्नस्येति पदं च एकैकाक्षरमपि तदीयमिति न स्थापयेत्। यावन्तः सिद्धान्तभेदाः ज्ञानयोगक्रियाचर्याभेदा वा, ते सर्वे भगवदुक्ता एव तैस्तैः स्ववाक्यैर्विशदीक्रियन्त इति नात्रानुक्तमननुमतं वाऽस्तीत्येतत्परं भवितुमर्हति। अतोऽद्योपलभ्यमानानां पौष्करादीनामर्वाचीनमहाजनवाग्विलासरूपत्वेऽपि नाप्रामाण्यस्यावकाशः, व्यासनिबद्धगीतावाक्यानामिव अत्रैव पौष्करे, 36 अध्याये क्षेत्रेश्वराधिष्ठितानि क्षेत्राणि पृष्टो भगवान् पौष्कराय परःशतान्याह क्षेत्रतद्वासमाहात्म्यवर्णनपूर्वकम्-

पुष्करं क्षेत्रमाश्रित्य पुण्डरीकाक्षसंज्ञया।
वासुदेवस्तु भगवान् नित्यसंनिहितः स्थितः॥[188]

इत्यारभ्य,

सौकरीयेण रूपेण क्षेत्रे तत्संज्ञके तु वै॥[189]

....

उत्पलावर्तके क्षेत्रे शौरिसंज्ञोऽच्युतः स च॥[190]

....

देवदेवेशनाम्ना च हरितपर्वतमस्तके॥
एकदेशं समासाद्य सर्वस्य वरदः स्थितः।[191]

इत्येवम्।

---

187. म. भा. 12 337.63ab
188. पौ. 36.303
189. Ibid. 36.319cd
190. Ibid. 36.351dc
191. Ibid. 36. 354cd, 5ab

उक्तं चान्ते-

कालान्तरेण व्यक्तीनां मज्जनं जायते यदि ॥

संनिधिं शक्तिभावेन नित्यं कुर्वन्ति तत्र च ।[192]

इति । सर्वमिदं स्रष्टुर्भगवतः भूतभाविसर्वपरिस्थितिसाक्षात्कारनिबन्धनमिति स्वीकर्तव्यम् ।

पञ्चरात्रग्रन्थानां प्रामाण्यं तेषां भगवदाराधनप्रतिपादनैदम्पर्यं भगवदाराधकानां देवलकत्वाभावः, भगवन्निवेदितानां निर्माल्यत्वाभावः, विष्वक्सेननिवेदितेन पितृश्राद्धादि-कर्तव्यता, निर्माल्यस्य दोषत्ववचनानां विषये व्यवस्थेत्यादिकमागमप्रामाण्ये श्री भगवद्यामुन-मुनिभिर्न्यरूपि । तदभिमताः सिद्धान्तभेदाः, तेषामसंकरस्यावश्यकता, वैखानसैरपि मन्त्रकल्पादौ पाञ्चरात्रस्योपजीव्यता, सर्वसूत्रनिष्ठानामपि पाञ्चरात्रपद्धतेर्ग्राह्यता, तदुक्तनि-षेकादिसंस्कारप्रभेदानां परं तन्मात्रनिष्ठाधिकारिविशेषविषयता, आ. यनिर्माणप्रतिष्ठापन पूजनाद्यंशे सर्वोपजीव्यत्वमित्यादि श्री देशिकचरणैः श्रीपाञ्चरात्रक्षादिष्वनेकेषु ग्रन्थेषु विशदमदर्शि ।

पञ्चरात्रचातुर्विध्यम्

तदिदं पञ्चरात्रम् आगम-मन्त्र-तन्त्र-तन्त्रान्तरभेदेन चतुर्विधान् सिद्धान्तान् दर्शयति । पारमेश्वरे

'चतुर्धा भेदभिन्नस्तु पाञ्चरात्राख्य आगमः ।'[193]

इयारभ्यैतत्प्रपञ्चः कृतः । अत्र प्रथमस्य आगमसिद्धान्तस्य अपौरुषेयत्व-ब्रह्मोपनिषत्त्व-दिव्यमन्त्रक्रियान्वितत्व मोक्षैकफलकत्व-सद्ब्रह्मवासुदेवाराधनरूपत्वदीनां प्रशंसनात् साक्षादे-कायनभागस्य तथैव वासुदेवप्रकाशितत्वात् आगमसंज्ञा सम्यगुपपद्यत इति निश्चीयते । अस्य कार्तयुगधर्मस्य युगान्तरे अधिकारिदौर्लभ्यमालक्ष्य सिद्धान्तान्तर प्रादुर्भाव उक्तः-

---

192. Ibid. 36. 389cd, 390ab
193. पार. 522ab

तततस्त्रेतायुगस्यादौ भोगमोक्षप्रसिद्धये ।
तस्मादागमसिद्धान्तान्निःसृतं बहुभेदकम् ॥[194]

इत्यादिना ।

व्यामिश्रयजनदोषाभावः

एवं तर्हि व्यामिश्रयजनं दोष इत्याशङ्कामुद्भाव्य पौष्करे तत्परिहारः कृतः । तेनातत्त्वज्ञ'नां त्रय्यामधिकारेऽपि पाञ्चरात्रे नाधिकारः । पौष्करः उवाच-

देव ! व्यामिश्रयाजित्वं प्रतिषिद्धं पुनः पुनः ।
प्रागुक्तानां च यागानां द्रष्टुमङ्गीकृतं च तत् ॥
तन्मात्रसंशयं जातं क्षेप्तुमर्हसि सांप्रतम् ॥

श्री भगवानुवाच—

सत्यमेतन्महाबुद्धे ! यथा संचोदितं त्वया ।
किं तु क्रियान्तरे प्राप्ते न दोषस्त्वधिकारिण म् ॥
यस्मात् सर्वपरत्वं हि तेषामस्त्यच्युतं प्रति ।
तदाश्रितत्वाद् देवानामन्येषां पूजनात्तु वै ॥
न दोषो हि यथा लोके भ्रातृभृत्यगणस्य च ।
माननाद्धर्मपत्नीनां समक्षाद्वा परोक्षतः ॥
ये पुनर्लोकधर्मस्थाः समबुद्धिपदोज्झि (च्छ्रि?) ताः ।
भगवत्यविशेषज्ञा नित्यं कार्यवशेन तु ॥[195]

....

व्यामिश्रयजिनस्ते वै पातित्यपदसंस्थिताः ॥[196]

---

194. Ibid. 529
195. पौ. 38.47-51
196. Ibid. 38.53cd

इति। भगवत्संनिधौ तदाश्रितत्वेन देवतान्तरयजनं न दोषाय, पतिव्रतानां भर्तुरिव, तद्भ्रातृभृत्यादीनां परिवेषणादिवत् इत्येवमुक्त्या देवतान्तराणां प्रीतिरपि पौष्कारायनुमतेति ज्ञायते। भ्रातृभृत्येत्येवमाकारं विना भर्तृभृत्येति श्रीमद्रहस्यत्रयसारपाठः। आगमसिद्धान्तिन एवं देवतान्तरप्रीतिं नोद्दिशेयुरिति यदि वक्तव्यं, तर्हि तदादृता शुद्धयाजिप्रणाली कीदृशीति परिशीलनीयम्। रत्नत्रयोक्तरीत्या कर्षणादिप्रतिष्ठान्ताचरणपराणां ग्रामदेवालयमण्डपगोपुरप्राकारादिषु सर्वत्र देवगणावाहनादिकमतीव स्पष्टम्। आलयनिर्माणरूपनिमित्तवशाधीनतया सर्वस्य नैमित्तिकत्वान्न दोषः। विवाहादौ देवतान्तरपरमन्त्रप्रयोग इतेति निष्कामानपि संगन्तव्योऽधिकारः। समत्वबुद्ध्या व्यामिश्रयाजिनामत्रानधिकारश्चात एव पौष्करादवगम्यते।

विभाजकाकारः

संकर्षणप्रद्युम्नानिरुद्धवागीश्वरनानादेवदेवर्ष्यादिप्रपञ्चितत्वं मन्त्रसिद्धान्तस्य पारमेश्वरे दर्शितम्। अगमसिद्धान्तेऽपि,

कर्तव्यत्वेन वै यत्र चातुरात्म्यमुपास्यते ॥
क्रमागतैःस्वसंज्ञाभिः ब्राह्मणैरागमं तु तत् ॥[197]

इति वचनात् चतुर्व्यूहाराधनसद्भावेऽपि मन्त्रसिद्धान्ते जाग्रत्स्वप्नसुषुप्ततुरीयरूपेण चातुर्व्यूह्यस्य चतुर्धाविभागतदुपासनप्रक्रियावैशद्यमस्तीति ज्ञायते। एतदाशयेनैव पौष्करे 'नानाव्यूहसमेतं चे'त्येवमेतदारम्भः। चतुर्व्यूहयचातुर्विध्यं चैवं न्यरूपि।

व्यूहे जाग्रदादिचातुर्विध्यम्

श्रीमद्रहस्यत्रयसारे तत्त्वत्रयाधिकारे व्याख्यायां सारास्वादिन्यां साक्षात्स्वामिभिः-

'परमेव्योम्नि विशाखयूपाख्यः कश्चिद्भगवतो
रूपविशेषः। तत्रोर्ध्वाधःप्रदेशेषु जाग्रत्स्वप्न-

---

197. Ibid. 38.293cd, 4ab

सुषुप्तितुरीयसंज्ञकानि चत्वारि स्थानानि ।
एकैकस्थानेऽपि वासुदेवादिमूर्तिचतुष्टयं
विशाखयूपस्य शाखाचतुष्टयवत् प्रागादिदिक्षु
परितो विराजते । तत्र जाग्रत्स्थानस्थितासु
मूर्तिषु सृष्ट्यादिजगद्व्यापारसितादिवर्णा-
युधादिपौष्कल्यम् । तदुपरितने स्वप्नस्थान-
मूर्तिचतुष्टये जगद्व्यापारेच्छामात्रम् ।
पूर्वमूर्तिकारणावस्थेम् । तत्र वर्णानामनु-
त्कटत्वं ध्वजाद्युपकरणरहित्यं च ।
सुषुप्तिस्थानस्थमूर्तिषु आयुधादेरपि
रेखारूपेण सद्भावः जगद्व्यापारेच्छया
अप्यनाविष्कारः वासुदेवमूर्तिमेकां विनाऽन्य-
त्रैव करचरणाद्यवयवविभागोऽपि । तदुपरि
स्थिते तत्कारणभूते तु मूर्तिचतुष्टये
तुरीयस्थे सर्वत्र करचरणाद्यवयवविभागाभावः
निर्व्यापारतया षाड्गुण्यवत्तया च
स्थितिमात्रमिति । उपासितृपुरुषगत-
जाग्रदादिदशासाम्यमाकलय्य तत्र
जाग्रदादिव्यवहारः । लक्ष्मीतन्त्रे चैतद्विस्तरः।' इति ।[199]

ईदृशव्यूहभेदानां व्यूहान्तराणां केशवादीनां विभवाख्यानां प्रादुर्भावभेदानां यथायथमाराधनादि-क्रमत्र मन्त्रसिद्धान्ते संकर्षणादिभिर्देवर्षिपर्यन्तैः प्रपञ्चितम् । पाद्मे तु, एकमूर्तिप्रधान-काराधनपरो मन्त्रसिद्धान्तः । चतुर्व्यूहाराधनमागमसिद्धान्त इत्युक्तम् । आगमापेक्षया मन्त्रस्य प्रथमतया निर्देशस्तु स्वस्य (पाद्मस्य) मन्त्रसिद्धान्तानुसारिताया उपरि तत्रैव वर्णनात्

198. द्र. रहस्यत्रयाधिकार–तत्वत्रयाधिकार–सारास्वादिनी–p. 276
199. पार. 19.538

स्वकीयत्वाभिमानात् । भोगमोक्षोभयपरतया गौरवातिशयाच्च । पारमेश्वरोक्तरीत्या (19-530) चतुर्विधचतुर्व्यूहकेशवादिव्यूहान्तरपद्मनाभादिप्रादुर्भावतत्तद्देवीपरिवारादिनिरूपणेन तत्तदर्थमन्त्र-कलापस्य 'मन्त्रमण्डलमुद्राणां कुण्डादीनां च लक्षणम्' इत्युक्तरीत्या व्युत्पादनात् मन्त्र-सिद्धान्त इति नामेति मन्यते । परव्यूहादिभेदं विना मूर्त्याराधनवर्णनं तन्त्रे, नृसिंहवराह-हंसहयग्रीवाद्यन्यादृशमूर्त्याराधनप्रपञ्चनं तन्त्रान्तरे,

'कर्मणामपि संन्यासः कथ्यते यत्र चागमे'[200]

इत्युक्त्या आगमसिद्धान्ताधिकारिणः सर्वथा काम्यकर्मत्यागिनः । तादृशाधिकारिदौर्लभ्या-दन्यसिद्धान्तप्रवृत्तिः । भारते श्वेतद्वीपं प्रति गतान् एकतद्वितादिन् प्रति

गच्छध्वं मनुयः सर्वे यथाऽऽगतमितोऽचिरात् ।[201]

....

कामं कालेन महता एकान्तित्वमुपागतैः ।
शक्यो द्रष्टुं स भगवान् .... ॥[202]

....

वैरस्वतेऽन्तरे विप्राः प्राप्ते त्रेतायुगे पुनः ।
सुराणां कार्यसिद्ध्यर्थं सहाया वै भविष्यथ ॥[203]

इति वचनमपि व्यामिश्राधिकारिकमन्त्रादिसिद्धान्तप्रकाशने एषामृषीणां साहायकमित्याशयेनेति ज्ञायते । आगमसिद्धान्तस्य मोक्षैकफलकस्य श्रवणानन्तरं भोगमोक्षफलप्रदमन्यत् श्रुत मित्यारभ्य तत्र,

---

200. पा.च. 19.117
201. म.भा. 12.223 48ab
202. Ibid. 12.323 49adc
203. Ibid. 12.323.51

'सात्त्वतं पौष्करं चैव जयाख्येत्येवमादिकम् ।'[204]

इति रत्नत्रयस्यापि मन्त्रादिसिद्धान्तपरत्वेन परिगणनात् अस्य रत्नत्रयस्यैव सर्वमूलत्वात् आगमसिद्धान्तसंप्रदायः कार्तयुगः संप्रति सर्वथा नष्ट इति वक्तव्यं भवति। तावता एकैकं रत्नम् एकैकसिद्धान्तप्रतिपादकमिति न व्यवस्था । पारमेश्वर एव शब्दसंदर्भतः अर्थनिरूपण-रीतितश्च सर्वथा पौष्करानुसारिणि,

पितॄणां च संविभागमथाचरेत् ।
पौष्कराख्ये विशेषेण देवदेवेन विस्मृतम् ॥
विधानमेतद् विप्रेन्द्र प्रोक्तं पुष्करजन्मने ।
सात्त्वतोक्तविधानेन तद्विधानं वदामि ते ।।[205]

इत्यारभ्य सात्त्वतोक्तरीत्या पितृक्रियानिरूपणात् सात्त्वतपौष्करोभयरीत्यादरणस्यैकसिद्धान्तनिष्ठा-प्राबल्यावगत्या सिद्धान्तभेदेन ग्रन्थभेद इत्यस्यासिद्धेः । जयाख्यसंहितोक्तरीतिरप्यन्यत्र स्थले पारमेश्वरादृता । अतः सर्वत्र सर्वमुच्यते । तत्तत्सिद्धान्तानुसारेण तदुक्तार्थपृथक्करणरीतिस्तु तत्तदनुभवसंप्रदायक्रमेणैव प्रतिष्ठापूजनादिप्रयोगपद्धतिपरिमार्गणेन भवितुमर्हति ।

तत्तत्सिद्धान्तानुमारि संहिताविभजनम्

व्यवस्था पुनरर्वाचीनेषु ग्रन्थेषु दृश्यते । यथोक्तं श्री पाञ्चरात्ररक्षायाम् 'कालोत्तरे-

अनेकभेदभिन्नं च पञ्चरात्राख्यमागमम् ।
पूर्वमागमसिद्धान्तं मन्त्राख्यं तदनन्तरम् ।
तन्त्रं तन्त्रान्तरं चेति चतुर्धा परिकीर्तितम् ।

इति चतुर्धा विभागं सामान्येन प्रतिपाद्य, 'नारयणीयमौदध्य (चध्य?) मग्निकाश्यपसंज्ञितम्' इत्यादि । 'शास्त्राण्येतानि सुव्रत' इत्यन्तेन आगमादिसिद्धान्तेषु चतुर्षु कतिपयसंहितानां

---

204. ज. 1.2 (अ.पा)
205. पार. 7.256, 7

निवेशनमनुक्तानामपि संहितानामुपलक्षणतयोदाहृत्य[206] इति। एतेन पौष्कराद्युद्देशपूर्वभाव्यागमोपदेशानुसारिण्योऽपि संहिताः काश्चन सन्तीति सम्यगवगम्यते। तत्संहितानां पठनेनैवाऽऽगमसिद्धान्तस्याव्यामिश्रयाजित्वं कीदृशमिति निर्धार्यम्। पारमेश्वरे दिव्याद्यायतननिर्णयाध्याये

शास्त्रं दिव्यादिभेदेन श्रोतुमिच्छामि तत्त्वतः।[207]

इति सनकपृष्टेन शाण्डिल्येन, 'वासुदेवेन यत् प्रोक्तं तत् दिव्यम्। तदेव ब्रह्मरुद्रादिप्रवर्तितमपि। अथ ब्रह्मरुद्रादिदेवैः ऋषिभिश्च प्रणीतं मुनिभाषितम्। तत् त्रिविधं सात्त्विकराजसतामसभेदात्।

केवलं मनुजैर्यत्तु कृतं तत् पौरुषं भवेत्॥[208]

इदं च संभवद्प्रामाण्यं केवलमानुषत्वात् इति त्रेधा विभाज्य तुर्यादिजाग्रदन्तचतुर्व्यूहविधाचतुष्टयं बीजपिण्डपदसंज्ञारूपेण मन्त्राणां चातुर्विध्यं मूलमूर्तावेव सर्वाराधनं तत्र कतुमशक्यस्य स्नानादेरेव मूर्त्यन्तरेषु कर्तव्यत्वं भूतशुद्धिरित्यादिकं दिव्ये भगवता प्रतिपाद्यते। तदुक्तार्थस्य सर्वरञ्जकतया व्युत्पादनं सात्त्विके। मूलमूर्तिमनादृत्य कर्मार्चायां तु पुष्कलम्। नित्यसंपूजनं ब्रह्मरुद्रादिबिम्बप्रमाणलक्षणादि च राजसे। भगवन्तं प्रति अङ्गभावं विना स्वातन्त्र्येण ब्रह्मरुद्रदुर्गादिस्थापनपूजनप्रधानं तामसम्। अनर्थकासंबद्धसाडम्बरवाग्जालं पौरुषमिति विस्तरेण न्यरूपि। कौर्मे,

कापालं पाञ्चरात्रं च यामलं वाममार्हतम्।
एवंविधानि चान्यानि मोहनार्थानि तानि तु॥[209]

इति वाक्यं संदंशवशात् पाञ्चरात्रपदेन पारमेश्वरदर्शितं रुद्रादिप्रधानकपूजनविधायितामसपाञ्चरात्रं

---

206. पा.र. पृ. 31, 2
207. पार. 10.335ab
208. Ibid 10. 345cd
209. कू. 1.11.273

गृह्णातीति स्पष्टमितोऽवगन्तुं शक्यम्। तत्तद्देवतायाः तदाराधनक्रमस्य च वस्तुतः सत्त्वेऽपि पञ्चरात्रप्रवर्तकभगवदभिप्रायाननुरोधित्वात् तामसप्रकृतिकजनाधिकारिकत्वाच्च तदुपेक्षा, पौरुषं तु ईषदंशे प्रमाणमपि असंभावितार्थप्रतिपादनांशे अप्रमाणम्। नन्वेवं पाञ्चरात्रस्यापि क्वचिद-प्रामाण्यमङ्गीकृतं स्यादिति चेत्-किं तेन ? भगवत्प्रोक्तपाञ्चरात्रप्रामाण्यं पूर्वपक्षाशङ्कितं तु यथावस्थितार्थबोधनेन कार्त्स्न्येन परिहृतम्। पाञ्चरात्रमधिकृत्य ये ये व्यवहरन्ति, ते सर्वे प्रामाणिकार्थमात्रप्रतिपादका इति न वयं नियन्तुं प्रभवामः। वस्तुतः तादृशभागस्य पाञ्चरात्रत्वमेव नास्ति, यथा वेदेतिहासपुराणादिषु प्रक्षिप्तानां भागानाम्। इतरशास्त्र-रात्रित्वापादकाबाधितार्थबोधकवाक्यराशेरेव पाञ्चरात्रत्वात् अप्रामाणिकार्थकवाग्जाले तदयोगात्।

सात्त्विकादिभेदभिन्नसंहितागणनम्

एवं पारमेश्वरे विभज्य विशिष्य संहिताविभागोऽपि तदनुरोधेनैवमकारि,

सात्त्वतं पौष्करं चैव जयाख्यं च तथैव च ॥
एवमादीनि शास्त्राणि दिव्यानीत्यवधारय।

संहिता चेश्वरस्यापि भारद्वाजस्य संहिता ॥
सौमन्तवी तथा ह्येतत् पारमेश्वरसंज्ञितम्।

वैहायसीसंहिता च शास्त्रं चित्रशिखण्डिजम् ॥
तथा जयोत्तरं तत्र एवमादीनि तत्त्वतः।

सात्त्विकानि विजानीहि मुनिवाक्यानि सत्तम ॥

तन्त्रं सनत्कुमाराख्यं तथा पद्मोद्भवाभिधम्।

सत्यापि (शातातप) तेजोद्रविणं मायावैभविकं तथा ॥

इत्यादीन्यवगच्छ त्वं राजसान्येव तत्त्वतः।

पञ्चप्रश्नं शुकप्रश्नं तत्त्वसागरसंहिता ॥

इत्यादीन्यवबुद्ध्यस्व तापसानि विशेषतः।

पूर्वोक्तलक्षणेनैव ज्ञातव्यं तत्र पौरुषम् ॥[210]

इति। तामसत्वेऽपि बाधितार्थकत्वाभावात् सनत्कुमारसंहिता तत्त्वसागरसंहितादिकं संप्रदाय-ग्रन्थेषु प्रमाणतयोदाह्रियते। सात्त्विकराजसतामसशब्दाः नागरद्राविडवेसरभेदभिन्नेषु उत्तममध्यमाधमत्वविवक्षया सत्त्विकराजसतामसशब्दप्रयोगदर्शनात् तथैवेति ज्ञेयमिति अधिकारिवैलक्षण्यप्रयुक्तं च ग्रन्थनामेति च दर्शितं श्री पाञ्चरात्ररक्षायाम्। पारमेश्वरे एवं संहितानामनिर्देशात् एतावदपेक्षया पश्चात्तनत्वं पारमेश्वरस्य। पाद्मे अष्टोत्तरशतं तन्त्रग्रन्थाः नाम्ना निर्दिष्टाः। तत्र श्रीप्रश्नविश्वामित्रादीनामपि निर्देशोऽस्ति। एवं च पाद्मं तावद्ग्रन्था-नन्तरग्रथितत्वेनाङ्गीकार्यम्। एवमपि श्री पाञ्चरात्ररक्षादौ तदुदाहरणात् श्रीदेशिकादिमह-नीयाचार्यप्राक्कालिकत्वं तस्य दुर्निवारम्। बलवत्तरप्रमाणोपलम्भे तु पाद्मे वाऽन्यत्र वा यथायथं कतिपयभागान् प्रक्षिप्तत्वं शङ्क्येत; न तु निष्कारणशङ्कायुज्यते, सर्वानाश्वासप्रसङ्गात्। परं तत्र सात्त्विकादिविभागो नादर्शि। अत्र आगमःदिसिद्धान्तानां नामान्तरतोऽपि निर्देशः पारमेश्वरगतत्वेन श्रीपाञ्चरात्ररक्षायामेवमदर्शि,

चतुर्धा भेदभिन्नं च स्वयंव्यक्तादिभेदतः।
स्वयंव्यक्तं हि सिद्धान्तमागमाख्यं पुरोदितम्।
मन्त्रसिद्धान्तसंज्ञं च यत्तद्दिव्यं प्रकीर्तितम्॥
तन्त्रसंज्ञं हि यच्छास्त्रं तत्सैद्धं समुदाहृतम्।
तन्त्रान्तरं तु यत्प्रोक्तमार्षं तु तदुदाहृतम्॥[211]

इति। एकायनांशस्यागमत्वेन गणनात् तस्य चापौरुषेयत्वात् स्वयंव्यक्तपदप्रयोगः। भगवदुप-दिष्टत्वाच्च पौष्करादिकं दिव्यम्। तत एव ततो निकृष्टाधिकारिप्रणीतत्वात् तन्त्रतन्त्रान्तरयोः सैद्धार्षपदव्यवहार्यता। देवदेवर्षिप्रणीतस्य तन्त्रस्य सैद्धत्वं हि तेषां मन्त्रसिद्धत्वेनअणिमाद्यष्टैश्वर्य-सिद्ध्यादिना च भवितुमर्हति। मुनिभाषिताख्यया प्रागुक्ते एकदेशस्य आर्षपदेन निर्देशोऽपि युज्यत एव। शास्त्रस्य स्वयंव्यक्तादिभेदवत् स्थानानां स्वयंव्यक्तादिभेदोऽप्यस्ति। स

---

210. पार॰ 376cd–92
211. पा॰ र॰ पृ॰ 32

पारमेश्वरे नवमे विस्तृतः। शास्त्रस्यैवं नाम्ना निर्देशात् उत्कर्षनिकर्षज्ञानमपि भवति। अत एव निकृष्टशास्त्रानुसारेण कृते स्थाने उत्कृष्टशास्त्रेणान्यथाकरणे प्रजानां कलहः स्यादिति यथोपक्रमं तत्तद्व्यवस्थारक्षणीयेति असंकर उदादिष्टः। सात्विकराजसतामसरूप-विभागे च विभाव्यमाने एकान्तित्वानेकान्तित्वरूपाधिकारभेदस्याप्यवगमात् न पूजकव्यत्यासो युज्यत इति ज्ञायते। स्थानेषु स्वयंव्यक्तादिषु तत्तद्विषयनियतरीत्यैव पूजनम्। निकृष्ट-पूजाक्रमत्यागेन उत्कृष्टपूजाक्रमावलम्बनं युक्तमित्यर्थप्रतिपादकानां वचसां, स्वयंव्यक्तस्थानस्य।

> वैदिकैस्तान्त्रिकैर्वापि श्रौतैर्वा द्विजसत्तम।
> स्वयंव्यक्ते तु भवने मिश्रैर्वा देवमर्चयेत्॥"[212]

इति कालोत्तरवचनेन सर्वविधपूजार्हत्वेनोक्तत्वात् यत्र कालवशात् उत्कृष्टरीतिं विना निकृष्टरीतिश्चिरात् प्राप्ता, तत्रापि तत्त्यागेन युज्यते उत्कृष्टरीतिग्रहणमित्येवपरत्वं दर्शितं श्रीपाञ्चरात्र-रक्षायाम्। अधिकारितारतम्यात् तत्र निकृष्टनान्यथा पूजायामपि उत्कृष्टेनोत्कृष्टमार्गेण पूजनं युक्तमिति च। अत्र वैदिकश्रौत-मिश्रभेदेन चातुर्विध्ये कथिते श्रौतवैदिकयोः को भेद इति विचार्यम्। मूलश्रुति-दिव्यमन्त्र-प्रवृत्तश्रुति-तत्संभेदनिमित्तानि नामधेयानीमानीति श्रीपाञ्चरात्ररक्षायाम्। मन्त्रसिद्धान्तस्य दिव्यमिति नाम प्राक् दर्शितम्। अनुपलभ्यमान-मूलश्रुति–अधीयमानश्रुतिभागद्वैविध्येन वैदिक श्रौतमिति च विभाग इति ज्ञायते। यदि कश्चित् एकायनमार्गं विहाय त्रयीमार्गमेव शौनकबोधायनादिदर्शितमवलम्ब्य स्वयंव्यक्ते पूजां कुर्यादधिकारिदौर्लभ्यात् तदपि युक्तमित्यप्यर्थः स्यात्। वैखानसस्यास्वीचिकीर्षितत्वेऽपि अन्यादृशवैदिकग्रहणस्यागत्यां बाधकाभावात्। वैखानसविजये एवमवोचाम– 'चतुर्षु सिद्धान्तेषु द्वयोः, श्रौतवैदिकविभागस्तु-तन्निष्ठैः परम्पराऽधीतवेदमूलक एकः, उपदेशकाले भगवदादिमुखश्रुतवेदमूलकः खिलश्रुतिमूलकोऽन्य इत्याशयेन। तान्त्रिकं मिश्रं च वेदमूलकमपि श्रुतिवाक्यप्रदर्शनविनाभूतोपदेशविषय इति विशेषः'[213] इत्यादि। स्वयंव्यक्तेषु श्रेष्ठतया परमेश्वरपरिगणिते श्रीरङ्गे दिव्यामार्गेण पूजनमेव ब्रह्मणाऽपि कृतमिति ज्ञायते, यतो भगवान् विमानाविर्भावकः पौष्करादिकमेवोपदिदेश। नूनमिदं ब्रह्मणो मुख्यैकायनशाखान्तर्गत

---

212. द्र. पा.र. p. 19
213. वै.वि.पृ. 21

कार्तयुगधर्मयुगधर्मप्रवणनिष्कामपुरुषाधिकारिकागमाख्यसिद्धान्तानधिकारपर्यालोचनयेति मन्यते। न हि जगत्सृष्टिव्यापृतस्य चतुर्मुखस्य मुमुक्षुत्वेऽपि सनकादिसाम्यं सुवचम्।

पाद्मे सिद्धान्तविभागावसरे मन्त्रसिद्धान्तस्य प्रथमत्वेन आगमस्य द्वितीयत्वेन परिगणनं भोगमोक्षोभयोपयोगित्वेन प्रकृतकालानुकूलत्वेन चाऽऽदरातिशयात्। न पुनरागमस्य सर्वसंमतं श्रैष्ठ्यमुपेक्ष्येत्युक्तमेव।

त्रयीपाञ्चरात्रवैलक्षण्यम्

एवं स्थिते पाञ्चरात्रस्यापि शुद्धभगवद्वाचकपदमात्रप्रयोक्तृत्वाभावात् देवपितृपूजनादेरपि स्वीकारदर्शनात् त्रय्यपेक्षया कोऽतिशय इति चेत्, त्रयीमार्गविहितविषये अन्तर्यामिपरमात्माज्ञानेऽपि तत्तद्देवपित्रुद्देशेन हव्यकव्यार्पणाधिकारोऽस्ति। पाञ्चरात्रे तु उपनिषत्तुल्य भगवदाराधकान् प्रत्येव तत्तद्विधानादन्तर्याम्युद्देशेनैव तदर्पणेन क्रिया निष्पाद्येति ज्ञायते। यथा कर्मणां केवलतत्तद्देवोद्देशेन तत्तदन्तर्याम्युद्देशेन चानुष्ठानमिति भेदसंभवेऽपि मुक्त्यर्थविद्यासु इन्द्रादिमन्त्रविषयकतयाऽनुष्ठानो योगः तद्वत्। तथा च, पाञ्चरात्रम्-

> सद्ब्रह्म वासुदेवाद्यैर्विविक्तैर्यत्र नामभिः।
> प्रोच्यते भगवान् विष्णुस्तद्विशुद्धमुदाहृतम्॥
> यत्राविविक्तैः शब्दैस्तु प्रोच्यते पुरुषोत्तमः।
> देवादीनामशुद्धानां व्यामिश्रं तत् प्रचक्षते॥[214]

इति द्विविधकर्मानुष्ठानसहम्। तत्र आगमाख्यो विभागः प्रथमश्लोकविषयः देवतान्तराणां तत्र विशेषणतया प्रवेशाभावात्। देवतान्तरवाचकानामपि शब्दानां यदि, साक्षादप्यविरोधं जैमिनिः'[215] इत्युक्तरीत्या योगव्युत्पत्त्या देवतान्तराघटनेन परमात्मपरत्वमिष्यते, तदा प्रथमश्लोकोक्तसदादिशब्दवत् सामान्येन विशेषेण वा परमात्मन एव वचनादव्यामिश्रत्वमेव।

---

214. भा.सं. 1.78, 9
215. ब्र.सू. 1.2.29

परविद्यासुजीवोक्तिर्निरिक्त्यादेः पराश्रया ।
तल्लिङ्गानन्यथासिद्धौ तद्विशिष्टावलम्बिनी ॥[216]

इति न्यायसिद्धाञ्जने मोक्षोपायविद्याविषये दर्शिता रीतिः एवं चैकान्तिनः यत्र यत्र देवतान्तरप्रवेशनमवर्जनीयम्, तत्रैव तदिच्छेयुः नान्यत्रेति औपनिषदसिद्धान्तः पञ्चरात्रेऽपि समानः । नित्यनैमित्तिकेषु तदन्वयो न दोषायेति प्रागेवोक्तम् । तत्र मूर्तीनां परोक्षत्वे देवतान्तरवाचिशब्दोच्चारणेन कर्मानुष्ठाने परमैकान्तिभिर्देवतान्तरान्तर्यामिपरमात्मोद्देशेनैव निष्कामं विहितानुष्ठानात् देवतान्तरस्य विशेषणतयैवोपलक्षणतया भानमपि संभाव्यते । सन्ध्योपासनादौ सूर्यान्तर्यामिभगवदुद्देशेन प्रदीयमानस्यार्घ्यस्य देवालयसमीपे पुष्करिण्यादौ अनुष्ठानपरैरालयाभिमुख्येनैव प्रदानं शास्त्रविहितम् । तेन सूर्यस्योपलक्षणतयैव भानमेष्टव्यम् । तथा,

सुरूपां प्रतिमां विष्णोः[217] इति वाक्ये,
तामर्चयेत् तां प्रणमेत् तां यजेत् [218]

इत्युक्त्या स्वानुष्ठीयमानसर्वयागाराध्यत्वेन स्वार्चाभावनमपि युज्यत एव । एवमुपलक्षणत्वे संभवत्यपि यत्र देवतान्तरमूर्तिमेवावाहितां प्रत्यक्षामुद्दिश्य आलयेषु बल्यर्पणादि, तत्र गोग्रासप्रदान, भूतबल्यर्पण, वायसबलिदान, निमंत्रितब्राह्मणभोजनादिन्यायेन देवतान्तर-प्रीतिः परमैकान्तिधर्मतो भवन्ती न तस्यैकान्त्यभङ्गाय उपलभ्यमानेषु । पाञ्चरात्रग्रन्थेषु आलयनिर्माणप्रतिष्ठापूजादिषु देवतान्तरसंसर्गविनाभूतोपदेशपरं मृग्यम् ।

उक्तवक्ष्यमाणरीतौ पाञ्चरात्रे सर्वसाधारण्यसिद्धिः

एवं मन्त्रादिसिद्धान्तनिष्ठेषु देवतान्तरविशिष्टभगवदुद्देश्यककर्मसंबन्धावगमात् तुल्यनयेन त्रयीमार्गनिष्ठानां पञ्चरात्रप्रक्रियया भगवदाराधनमनुमतिमिति न केवलम् ऊहः,

---

216. न्या. सि, p. 369
217. द्र. श. न. p. 3
218. Ibid. p. 4

किं तु बहुग्रन्थानुगुण्यादपीति प्रागेवोक्तम्। अत एवं विष्णुतिलकग्रन्थः त्रयीमार्गनिष्ठानुष्ठेयपद्धतिप्रदर्शन एव विशेषतो व्यापृतो दृश्यते अन्यत्र पञ्चरात्रग्रन्थेषु भगवधाराधनानन्तरं वह्निसंतर्पणाख्यं विलक्षणं कर्म विदधत्सु विष्णुतिलके त्रयीमार्गगान् मनसिकृत्य वैश्वदेवमेव विदधाति,

पक्त्वा वन्यं समभ्यर्च्य देवेश विनिवेद्य च।
वैश्वदेवादिकं सर्वं समाप्य कमलासन ॥[219]

इति। एवं स्वस्वसूत्रोक्तवेधेना पाञ्चरात्रिकाध्वनापि वा तत्तदनुष्ठानविधानादपि सर्वेषां पाञ्चरात्राधिकारः सुग्रहः। एवं भरद्वाजसंहितादिकमपि त्रयीमार्गगामिग्राहि द्रष्टव्यम्। लक्ष्मीतन्त्रे क्वचित् कोशेषु आन्ध्रलिपिमुद्रितेषु आलयपूजाकरणे सर्वेषां विप्राणां नाधिकारः, किं तु, काण्वमाध्यंदिनविदः पञ्चरात्रपरायणः॥

....

कात्यायनमुनिप्रोक्तसूत्रकर्मक्रियाश्रिताः॥
काश्यपो गौतमश्चाथ भृगुराश्वलायनोऽङ्गिराः।
इत्यादयो मुनिश्रेष्ठाः परार्थयजने हरेः॥
साधिकारा भवन्त्यन्ये यजने नाधिकारिणः।

....

कश्यपादिमुनिश्रेष्ठगोत्रजैर्हि परार्चना।
कार्या भागवतैरन्यैः कृता यदि परार्चना।
मोहेन राजराष्ट्राणां बलाद्दोषो भविष्यति ॥[220]

इत्यादिनि यानि वचनानि, तानि पारंपर्यप्राप्ताराधनपद्धतिपुरुषलाभे तद्ग्रहणे आदरप्रदर्शकानि,

---

219. वि.ति. 3.445
220. ल. त. p. 165

आलयोपयुक्त न्त्रादिदर्शितचकाब्जदीक्षाहीनानां केवलं पञ्चभिः संस्कारैर्मोक्षार्थदीक्षितानां श्रीवैष्णवानां तत्परिगृहिते त्कृष्टदिव्यालयेष्वनधिकारदर्शकानीति रीत्या नेयानि। सत्यलोकात् भगवदर्चामूर्त्यवतारकाले तेषां सहाऽऽगतत्वात् तेषामेव प्रशंसेति च वदन्ति। आस्तां तावदेतत्। वचनानि त्वेतानि परार्थयजने सर्वेषां नाधिकार इति वदन्ति सन्ति स्वार्थयजने सर्वेषां पाञ्चरात्रिकाराधनपद्धतिः परिग्राह्येति ज्ञापयन्तीतीदं नः प्रकृतम्। अतः सर्वेऽपि दिव्यादिषु मार्गेषु केनचित् अर्चां प्रतिष्ठाप्य आराधयितुमर्हन्ति विना संकरम्।

वैखानसे अवान्तरसंकराविरोधः

अयमेव वैखानसपाञ्चरात्रयोर्विशेषः, यत् तत्रापि अत्रिणा-

वैखानसविधिश्चैवं चतुर्धा भवति द्विजाः॥

आत्रेयः काश्यपीयाश्च मारीचो भार्गवस्तथा।[221]

इति भेदं दर्शयताऽपि,

एषां चतुर्विधानां तु मूलं तत्सूत्रमेव यत्।[222]

…… …… ……

अन्योन्यसंकरे तस्माद्दोषो नास्त्येक एव सः।[223]

इति साङ्कर्ये दोषाभाव उक्तः। पाञ्चरात्रे तु आगम-मन्त्र-तन्त्र-तन्त्रान्तरसिद्धान्तानां चतुर्णां साङ्कर्यं नेष्टमिति। शास्त्रे स्वयंव्यक्तादिभेदवत् आलयेष्वपि स्वयंव्यक्तं दैवं सैद्धमार्षं मानुषमित्येवं भेदाः सन्ति। विप्रक्षत्रवैश्यशूद्रादिप्रतिष्ठापितेष्वालयेषु पूजाकाल-नियमादिकमपि पारमेश्वरे नवमे प्रपञ्चितम्।

221. स. 80. 17cd, ab
222. Ibid. 80.19ab
223. Ibid. 80.20ab

उपलभ्यमानग्रन्थानां साधारण्यम्

चतुर्धा भिन्नेषु निषेकादिश्मशानान्ताः संस्काराः त्रयीधर्मनिष्ठावैलक्षण्येन विहिताः तत्तत्सिद्धान्तनिष्ठानामेव, एवमन्येऽपि केचित् तत्तदसाधारणधर्माः सन्तीति पूर्वोक्तनारदीयादि-वाक्यविमर्शे व्यक्तं ज्ञायन्ते। परं तु कीदृशस्तत्तत्संस्कारप्रयोगः कस्कश्च सोऽसाधारणो धर्म इति बहु परिश्रम्यैव निर्धार्यम्। उपलभ्यमानेषु ग्रन्थेषु त्रयीधर्मनिष्ठसाधारणकर्षणादि प्रतिष्ठान्तक्रियापूजाचर्याणामेव न्यूनाधिकभावेनोपलम्भात्। तत्तदसाधारणधर्मास्तत्परपुरुषोद्देशे-नोपदेश्या नात्रावकाशं लभन्त इव। क्वचित् ज्ञानयोगनिरूपणमपि सर्वसाधारणमेव। अर्चन-विशेषात् विभवव्यूहक्रमेण परमप्राप्तिरित्येतदपि कीदृशार्चनेनेत्यन्विष्य निर्णेयम् अतस्त्रयीनि-ष्ठसाधारण्यमेवोपलभ्यमानानां पाञ्चरात्रग्रन्थानाम्।

पञ्चरात्राध्यात्मविमर्शः

अथ पाञ्चरात्रप्रमेयं विचार्यते-

यं वेदाः पर इत्यनन्यविषयाः यं व्यूह इत्यागमाः
यं प्राहुर्विभवं पुराणवचनान्यर्चां प्रबन्धाश्च यम्।
यं योगाद्यनुशासनैकनिरताः हार्दं हृदि ध्यानतो
दृश्यं तं प्रणमामि पञ्चवपुषं पञ्चात्मलक्ष्मीयुतम्॥[224]

इत्यस्मदुक्तरीत्या प्रथमत आगमानां व्यूहनिरूपणैदम्पर्येऽपि परव्यूहविभवार्चाहार्दप्रतिपादकत्वं, वैशेष्यात्तु सर्वप्रकारार्चामूर्तिप्रतिष्ठापनार्चनैदंपर्यमिति सर्वविदितम्। श्रीभाष्ये पाञ्चरात्राधि-करणे परव्यूहविभवमात्रनिर्देशः तेषामेव आराधकमहाजनप्रार्थनावशादर्चारूपेणाविर्भावात् ध्यानकाले हार्दतया संनिधानाच्चेति भाव्यम्। विभवान्तर्गतानामेव गोबलीवर्दन्यायेन अर्चाहार्दरूपतः पृथङ्निर्देश इति च। परवासुदेवरूपात् विभज्योह्यमानत्वात् व्यूह इत्यवयवार्थे सत्यपि क्वचित् लक्ष्मीतन्त्रादौ परवासुदेवेऽपि संकर्षणादिष्वेव सा परिभाषा। मत्स्यकूर्म-मनुष्यादिस्वविभूतितुल्यरूपग्रहणात् विभवनाम्ना व्यपदेश इति च सहस्रनामभाष्ये प्रत्यबोधि।

---

224. प्रकृतग्रन्थकर्तुः अयं श्लोकः।

इमे च विभवाः विशाखयूपरूपचातुर्व्यूहप्रभवाः विशाख्ये मन्दिरे लब्धविहारा इति लक्ष्मीतन्त्रे । सात्वतसंहितायामेतद्विस्तरः ।

अहिर्बुध्न्यदर्शितपञ्चरात्रार्थः

अहिर्बुध्न्यसंहितायां शब्दप्रमाणव्यूहवर्णनाध्याये-

त्रयी साङ्ख्यं तथा योगशास्त्रं पाशुपतं तथा ।
सात्त्वतं चेति तद्रूपं ... . ॥[225]

इति विभज्य चतुरो वेदान्, कल्पादीनि षडङ्गानि, मीमांसान्यायविस्तररूपमुपाङ्गद्वयम्, सेतिहासपुराणं, वास्तुवेदो धनुर्वेदो गान्धर्वमायुर्वेद इति पञ्चोपवेदान् वार्तादण्डनीतिरूप-विद्याद्वयं च त्रय्यन्तर्भावेन प्रदर्श्य, साङ्ख्यं सामान्यतः प्राकृतवैकृतमण्डलद्वयात्मकम्, अवान्त विभागो च षष्टिभेदं तन्त्रम्, योग नुशासनं हैरण्यगर्भं निरोधयोगकर्मयोगभेदभिन्नम्, पाशुपतं पशु पतिकृतं पति-पशु-पाश-शुद्ध-मिश्रचर्या-देव-दीक्षा-सायुज्यरूपतोऽष्टकाण्डम्, पञ्चरात्रं च भगवत्कर्म-विद्या-काल-कर्तव्य-वैशेषिक-क्रिया-संयम-अधिकृत-मार्ग-मोक्षरूपार्थ-दशकविषयकसंहिताभेदात् दशविधमिति प्रदर्श्य, एतानि पञ्चशास्त्राणि मूलभूतानि युगे युगे प्रादुर्भवन्तीति निरूपयन् पञ्चरात्रस्य दशधा कंचिद्विभागं मन्यते । इदं च पाशुपतं पशुपत्यन्तर्यामिभगवद् राधनपरं मन्तव्यम् । रुद्रपारम्यपराश्चान्ये आगमा उपेक्ष्याः । अनेन पञ्चरात्रं साङ्ख्ययोगसात्त्वतदेवपाशुपतरूपशास्त्रपञ्चकप्रतिपाद्य र्थत्राणकरमिति ज्ञायते । अतोऽपि पञ्चरात्रत्वम्,

साङ्ख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा ।
परस्पराङ्गान्येतानि पञ्चरात्रं तु कथ्यते ॥[226]

इति भारतवचनमप्यत्र समन्वितम् । एष कश्चिद्विभागः ।

---

225. अहि. 12.3abc
226. म.भा. 12.336.76abc

तत्त्वनिरूपणस्य आवश्यकता

अर्चनारूपचर्याप्रधानस्यापि पञ्चरात्रस्य तदर्थतया तत्त्वबोधकत्वमप्यस्ति । अन्यथा हि परदेवतायाः श्रीपतेरेवाराध्यत्वमविद्वांसः पूजकाः

भगवत्यविशेषज्ञाः .... ॥[227]

....

.... प्रेरिता देवतार्चने ॥[228]

.... ।

व्यामिश्रयाजिनस्ते वै पातित्यपदसंस्थिताः ॥[229]

इत्युक्तरीत्या देवतान्तरेषु भगवद्भृत्यत्वबुद्धिं विना साम्यादिबुद्धिकलुषा भवेयुः । अत एव वैखानसैरपि ज्ञानं क्रिया च स्वग्रन्थेषु विषयता स्वीक्रियेते । निरूपणे पौर्वापर्यं तु तत्तदिच्छायत्तम् । तद्वदिहापि,

'ज्ञानकाण्डक्रियाकाण्डभेदेनैतद् द्विधा कृतम् ।'[230]

इति पारमेश्वरोक्तरीत्या द्वैधैव । सामान्यतो विभागेऽपि पाद्मादिषु चतुर्धा विभाग आदृतः ज्ञानयोगक्रियाचर्याभेदेन । ज्ञानमेव हि-

'द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मवेदो

वदन्ति परा चैवापरा च'[231] इति मुण्डकोपनिषद्व्याख्यारूपश्रीविष्णुपुराण-वचनतः-

'आगमोत्थं विवेकाच्च द्विधा ज्ञानं प्रकीर्तितम्' ।[232]

---

227. पौ. 38.51c
228. Ibid. 38.52d
229. Ibid. 38.53cd
230. पार. 1.95
231. मु. 1.14
232. वि.पु. 6.5 61ab

इत्यस्मात् शास्त्रार्थश्रवणात्मकज्ञानं योगरूपं ज्ञानं चेति द्वेधा विवक्षितमिति तदर्थमर्चासंपादनस्यावश्यकत्वे स्थिते तन्निरूपणं कर्षणादिप्रतिष्ठान्तक्रियाकलापविवेचनेन कर्तव्यं भवतीति तदर्थं क्रियापाद इति कश्चिद्भागो विशिष्याकल्प्यत । अथ तदाराधनरूपचर्याविषयः पादः । ज्ञानं विना धर्मानुष्ठानस्य निष्प्रयोजनत्वादेव मनुरपि धर्मशास्त्रमारभमाणो धर्मव्यूहसमाराध्यस्य भगवतः सर्वमूलत्वं प्रथमतः प्रथयामास 'आसीदिदं तमोभूतम्'[233] इत्यादिना । एतद्द्विधाचतुष्टयविवेचने च संग्रहेण क्रियमाणे पञ्चरात्रप्रतिपाद्यार्थः सर्वः संगृहीतो भवति ।

पाद्मगतिः

आदौ तत्त्वज्ञानं पञ्चरात्रतो निष्पद्यमानं व्युत्पाद्यते । तत्र पाद्मे—

आदिमध्यान्तरहितमवृद्धिक्षयमच्युतम् ॥[234]

....

सर्वाकारं निराकारं तमसः परमव्ययम् ।,[235]

इत्येवं निर्दिश्य' तस्मादाविरासीत् सनातनात् ।[236]

द्विहस्तमेकवक्त्र'[237] मित्यादिकमुक्त्वा 'स वासुदेवो विज्ञेयः' [238]

इति तन्नामामिधाय "वासुदेवात् ततो जातो वासुदेवाह्वयोऽपरः"[239] इति व्यूहवासुदेवस्य पश्चादुत्पत्त्युक्तेः परवासुदेवोऽपि कदाचिज्जात एवेति मन्येत । नैवम् । व्यूहानां सृष्टिस्थिति-

---

233. म.स्मृ. 1.5
234. पा.ज्ञा. 2.6cd
235. Ibid. 2.7cd
236. Ibid. 2.8ab
237. Ibid. 2.8c
238. Ibid. 2 11
239. Ibid. 2.13ab

संहारहेतुत्वात् प्राकृतसृष्टिकालोत्पन्नसमष्टिभूतमनोहंकाराद्यभिमानित्वकल्पनाच्च प्रतिप्राकृतसृष्टिप्रादुर्भाववर्णनसंभवेऽपि 'सदा पश्यन्ति सूरयः'[240] 'पश्यन्ति सूरयः । शश्वत् तद्विष्णोः परमं पदम्'[241] इति सार्वकालिकनित्यसूर्यनुभवविषयस्य परस्योत्पत्त्यसंभवात् । इदं तु पाद्मवाक्यं नित्यानामपि वस्तूनां नित्येच्छासिद्धत्वमेति संप्रदायरीत्या परमात्मस्वरूपनित्येच्छासिद्धत्वस्य तदीयानादिपरवासुदेवविग्रहेऽपि सद्भावाभिप्रायम् । एतेन विष्णुतिलकसंहिताद्युक्तमपि निर्व्यूढम् । सा हि 'अव्यक्तमच्युतं ब्रह्म'[242].... ....निराकारं परं तत्त्वं[243] सर्वत्र व्याप्यवर्तते[244] इति परमात्मस्वरूपमुक्त्वा, तत् कारणवशादासीत् चिद्घनं स्फटिकप्रभम्[245] द्विहस्तं चक्रधृत् परम्[246] किरीटहारकेयूर[247] वासुदेवाह्वयं महः । चत्वारो जज्ञिरे तस्मात्[248] इत्येव परवासुदेवस्याप्युत्पन्नमिवाऽह । अत एव पारमेश्वरे दिव्यमात्मस्वरूपं च नित्यःज्ञानादयोगुणाः[249]...आकृतिश्च परात् परा । नित्यैका वासुदेवाख्या ततः सृष्ट्यादिहेतुना...[250] ....व्यूहा[251] इति स्पष्टमुच्यते । पौष्करे च-

> नित्यसिद्धे तदाकारे तत्परत्वे च पौष्कर ।
> यस्यास्ति सक्तिर्हृदये तस्यासौ संनिधिं व्रजेत् ॥[252]

इति । सक्तिरिति तत्र पाठः । न तु सत्तेति (पा. 15)

---

240. ऋ. 1.22.20
241. पा. ज्ञा. 2.12cd
242. वि.ति. 2.5a
243. Ibid. 2.7a
244. Ibid. 2.7d
245. Ibid. 2.8ab
246. Ibid. 2.9b
247. Ibid. 2.9c
248. Ibid. 2.10d, 11a
249. पार. 196ab
250. Ibid. 1.97bcd
251. Ibid. 1.100d
252. पौ. 38.38

शाङ्करहृदयम्

संगृह्यैतत् भाषितुं प्रवृत्ते च शाङ्करभाष्ये पञ्चरात्राधिकरणे यथावेदान्तं पञ्चरात्रेऽपि नारायणस्यैव जगत् प्रति निमित्तत्वमुपादनत्वं च यथावत् प्रतिपाद्यत इति नास्यात्राप्रामाण्यप्रसक्तिरिति मुक्तकण्ठमवेदि। नात्र निर्गुणब्रह्मनिरूपणमुभयत्रेति वा जीवब्रह्मैक्यमुभयत्रेति वा ऐकरस्यमदर्शि, किं तु नारायणस्य कारणत्वप्रयुक्तं पारम्येण। एवं च निमित्तोपादानाद्वैतं, तथाविधकारणत्वतदाक्षिप्तसर्वज्ञत्वसर्वशक्तित्वादिविशिष्टवस्त्वद्वैतं वा कथ्यतां, न तु निर्विशेषाद्वैतजीवब्रह्माद्वैतादिकम्।

निर्गुणादिशब्दार्थः

निर्गुणं निष्कलमित्यादिशब्ददर्शनमात्रेण शांकरनिर्गुणब्रह्म पाञ्चरात्रेष्टमिति न शक्यते वक्तुम्।

पुरुषं निर्गुणं साङ्ख्यमथर्वशिरसो विदुः।[253]

निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्।[254]

इत्यादिश्रुतिवाक्यानां यादृशो निर्वाहः तादृश एवात्रापि। तत्र श्रुतौ साङ्ख्यमिति साङ्ख्यमतगुणस्मरणेन तद्राहित्यमुपस्थापयति सुगमश्च गीतामावर्तयतां सर्वत्र प्रकृतिगुणग्रहणेन तदभावश्चेतने बोध्यत इति निर्वाहः।

प्रकृतेः क्रियमाणानि गुणैः[255]

गुणा गुणेषु वर्तन्ते[256]

निर्गुणं गुणभोक्तृ च[257]

---

253. मन्त्रि. 14
254. श्वे. 6.19
255. भ.गी. 5.27ab
256. Ibid. 3.28c
257. Ibid.

इत्यादौ रजस्तमासामेव हि परामर्शः। किं बहुना, अहिर्बुध्न्येनैव

कथं च गुणहीनं तत् षाड्गुण्यं परिगीयते ॥

....

शृणु नारद षाड्गुण्यं कथ्यमानं मयाऽनघ ॥[258]

इति। प्रकृतिवत् त्रैगुण्याभावात् बद्धजीववत् त्रैगुण्याधीनविकाराभावाच्च नैर्गुण्यं परमात्मनः। त्रैगुण्याधीनज्ञानादिगुणविलक्षणाश्च स्वाभाविकाः ज्ञानशक्त्यादयः षड्गुणा उपरि उपपाद्यन्त। षण्णां निर्वचनमपि तत्र विशदम्।

तस्योपादानभावेऽपि विकारविरहो यतः।
वीर्यं नाम गुणः सोऽयमच्युतत्वापराह्वयम् ॥[259]

इति श्रीभाष्यकारसिद्धान्तं स्वोपज्ञं दर्शयतीव।

'एते शक्त्यादयः पञ्च गुणाः ज्ञानस्यकीर्तिताः' ॥[260]

इत्युपरितनवाक्यात् न ज्ञानांशे गुणगुण्यैक्यं मन्तव्यम्। ज्ञानपदवत् शक्तिबलादिपदं धर्मिवाचि न भवतीत्यत्रैव तात्पर्यात्। एवं निष्कलपदमपि परमात्मस्वरूपस्य वासुदेवादि-विग्रहवत् सावयवत्वाभावपरिमिति न ततः किंचित्। अन्ततः शोधने तु ब्रह्मणः सृष्टिकाये प्रपञ्चविशिष्टत्वं, प्रलयकाले च भविष्यत्सृष्ट्यौपयिकविचित्रजीवविविधकर्मवासना-दिभरिताविद्याविशिष्टत्वमिति न कदाचित् अविशिष्टाद्वैतप्रसक्तिः। अतो भास्कराद्यद्वैतिमत इव शांकरमतेऽपि सृष्टिप्रलययोर्ब्रह्मणो न निर्विशेषतेति 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीय'[261] मित्यादिवाक्यानां न निर्विशेषपरत्वसंभवः कथंचित्। तत्त्वज्ञानानन्तरभाविमुक्तावेव 'तद्' वाच्यम्। तदपि अनेकजीववादे दुर्घटम्। कतिपयजीवीयाविद्याक्रान्ततायाः असार्वत्रिकत्वात्।

---

258. अहि. 2.54cd, 55cd
259. Ibid. 2.60
260. Ibid. 2.61cd
261. छा. 6.1.2

तादृशमुक्तिरूपप्रमेयस्य शांकराभिमतस्य पञ्चरात्रे भगवदर्चनार्थप्रवृत्ते अप्रसक्त्या वा अभावत एव वा प्रतिपादनमसिद्धमित्येव विशिष्टब्रह्मरूपसगुणब्रह्मांशे सामरस्यं तत्राभाषि । विशिष्टस्योपादानत्वं च नारायणे चिदचिद्वैशिष्ट्योपपादनेनैव वक्तव्यम् । मायाविशिष्टत्वादेर्मनागपि पाञ्चरात्रग्रन्थे र-श भावात् ।

तत्त्वत्रयम्

एवं शांकरनिष्कृष्टवाक्यत एवास्य निःसंदेहत्वेऽपि पाञ्चरात्रवचांसि कानिचिदुदाहृत्याऽपि त्त् प्रदर्श्यते दृढप्रत्ययसिद्धये । अत्र जीवानादित्वे प्रमाणतया श्रीभाष्यकृदुपन्यस्तं परमसंहितावचनमेवाचिद्वैशिष्ट्येऽपि प्रमाणं भवितुमर्हति-

> अचेतना परार्था च नित्या सततविक्रिया ।
> त्रिगुणा कर्मिणां क्षेत्रं प्रकृते रूपमुच्यते ॥
> व्याप्तिरूपेण संबन्धस्तस्याश्च पुरुषस्य च ।[262]

इति । पुरुषस्य जीवस्य प्रकृतौ व्याप्तिरित्यनेन जीवविभुत्वमभिमतं न मन्तव्यम् । प्रकृतौ सर्वत्र यत्किंचिज्जीवसंबन्धो वर्तत एवेत्यत्र तात्पर्यात् । तदेवोपरि दृष्टान्तादप्यवसीयते-

> यथाकाशमिदं सर्वं व्याप्य शब्दो व्यवस्थितः ।
> तथैवाव्याकृतं प्राप्य परमात्मा व्यवस्थितः ॥[263]

इति अत्र परमिति च आत्मेति च पदच्छेदः । अयमेव विषयभोक्तृत्वात् विषयीति उपर्युच्यते । अथ कथमेतदुभयस्मात् सृष्टिरिति ब्रह्मणः प्रश्ने परम आह-

> परस्य पुरुषस्यैव नियोगात् .... ।[264]

....

262. प. 2.18, 9
263. Ibid. 2.26
264. Ibid. 2.26ab

अचेतना तु प्रकृतिर्नान्यथा संप्रसूयते ।[265]

इत्यादि । अथ प्रकृतेर्महदादिसृष्टिक्रमोऽपि किंचिद्रूपेणादर्शि । पाद्मसंहितायामिव विश्वामित्र-संहितायां च-

'नारायणस्य द्वे रूपे पुरुषः प्रकृतिश्च ते ।'[266]

इत्यारभ्य यथाश्रीविष्णुपुराणं यथाविशिष्टाद्वैतसिद्धान्तं सृष्टिक्रमो न्यरूपि । तत्र रूपे इति पदेन प्रकृतिपुरुषयोर्नारायणशरीरत्वस्यापि कथनात् चिदचिद्विशिष्टे कार्यकारणभावः सिद्धः । अहिर्बुध्न्यसंहितायामपि प्राकृतसृष्टिप्रकरणे (7) विष्णुप्रकृतिपुरुषरूपतत्त्वत्रयग्रहणेनैव सृष्टिरुपपाद्यते । उपादानत्वं कचित् स्पष्टम्, कचिदस्पष्टम् । अहिर्बुध्न्येन शंकरेण स्वसंहितायां भगवति परमात्माद्यनेकशब्दवाच्यत्ववर्णनावसरे-

'सर्वोपादानतासाम्यात् समः संपरिकीर्तितः': [267]

इत्युक्तमेव शांकरे मनसिकृत्य पाञ्चरात्रे नारायणस्योपादानत्वमप्युपनिषदिवोद्घोषयतीति भाषितम् । एवं समशब्दार्थनिरूपणक्रमे निरूप्यमाणे समष्टिव्यष्टिसर्वप्रपञ्चनिविष्टतया यत्र यत्र कस्यचित् चेतनस्याचेतनस्योपादानत्वमुच्यते; तत्र तत्रायमविशेषादुपादानीभवतीति विशद-मवगम्यत इति विशिष्टाद्वैतसिद्धान्तप्रतिष्ठापितो विशिष्टरूपेण कार्यकारणभाव एव सर्वपाञ्च-रात्रप्रचिख्यापयिषित इति सुग्रहम् । अयमेव षाड्गुण्ये शक्त्याख्यो गुणः सर्वप्रकृति-भावस्यैव शक्तित्वात् इति व्यक्तमत्रैवोपरि । पाञ्चरात्रेऽपि प्रसिद्धं प्रकृतिपदमेव सूत्र-कारोऽप्याद्रियत,

"प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ।"[268] इति ।
उपनिषदि परमात्मनि प्रकृतिपदं मृग्यम् ।

अहंकारादेव सर्वतन्मात्रोत्पत्तिः कचिदुच्यते, कचिदेकैकभूतव्यवधानेन । एवं

---

265. Ibid. 2.27ab
266. विश्वा. 5.27ab
267. अहि. 2.34ab
268. ब्र.सू. 1.4.23

सृष्टिक्रमे तत्र तत्रैषद्वैषम्यं नानाश्रुतिविमर्शावसरे सर्वैककण्ठ्यसंपादनवत् पञ्चरात्रेऽपि एकतात्पर्यवर्णनेन परिहार्यम् । 'अष्टौ प्रकृतयः षोडशविकाराः'[269] इत्यादिवाक्यमुपादाय सुबालोपनिषद्भाष्ये श्रुतप्रकाशिकाचार्यैः, तत्त्वमुक्ताकलापसर्वार्थसिद्धौ च श्रीदेशिकचरणैरैकरस्यमुपापादि । तथा पाञ्चरात्रग्रन्थेष्वपि भाव्यम् । उक्तमेवाहिर्बुध्न्यसंहितायाम् (8)-

एवमुच्चावचां सङ्ख्यां तत्त्वप्रकृतिगोचराम् ।
वदन्ति मुनयः सिद्धाः देवा वेदास्तथैव च ॥[270]

इति । तत्रैव लक्ष्म्या अपि कारणत्वविवक्षया,

परमात्मा परो देव एकः षाड्गुण्यमुज्ज्वलम् ॥[271]

....

एवं विष्णोः प्रिया भाः सा शक्तिः षाड्गुण्यविग्रहा ॥
नानानामभिरेकाऽपि तत्त्वविद्भिरुपास्यते ।
तस्यां प्रवर्तमानायां स्वसंकल्पेन सजने ॥[272]

....

या सा शक्तिर्जगद्धातुः कथिता समवायिनी ॥
लक्ष्मीर्नाम द्विधा सा तु क्रियाभूतिविभेदिनी ।
या क्रिया नाम संकल्पः स सुदर्शननामवान् ॥
भूतिर्नाम जगद्रूपा कलाव्यक्तपुमात्मिका ।[273]

इति । अत्र लक्ष्म्याः कालप्रकृतिपुरुषरूपविभूत्यात्मकत्वं व्यक्तम् । एवं व्यूहविभवाद्य-

---

269. गर्भो. 3.
270. अहि. 8.5
271. Ibid. 8.10cd
272. Ibid. 8.14cd, 5
273. Ibid. 8.29cd-13ab

प्राकृतशुद्धसृष्टिप्रपञ्चोऽपि पञ्चरात्रग्रन्थेषु वर्ण्यते । उपनिषत्सु जगत्कारणत्वेन परमात्मनिरूपणप्रवृत्तासु चतुर्विंशतितत्त्वरूपप्रकृति-पञ्चविंशपुरुषषड्विंशपरमात्मगणनमेव प्रायः क्रियते । कालतत्त्वनित्यविभूत्यादिविषये वचनेषु बहुषु सत्स्वपि सर्वपरिगणनमेकत्र न शक्यं द्रष्टुम् । पाद्मे-

चत्वारिंशद्दशैकं च तत्त्वानि परमात्मनः ।
रूपाणि .... ॥[274]

इत्यारभ्य, ब्रह्मशिवसंकर्षणादिपृथक्कारेण परिगणनमेकं कृतम् । लक्ष्मीतन्त्रं तु-

स्थूलसूक्ष्मविभेदेन भूतानि दश खानि च ॥
ज्ञानकर्मविभेदेन त्रीण्यन्तःकरणानि च ।
प्रकृतिश्च प्रसूतिश्च माया सत्त्वं रजस्तमः ॥
कालश्च नियतिः शक्तिः पुरुषः परमं नभः ।
भगवानिति तत्त्वानि सात्त्वताः समधीयते ॥[275]

इति गणयति । अत्र नम इत्यन्तेन एकस्यैव प्रकृतितत्त्वस्य कार्यकारणविभागेन एकोनत्रिंशत्तया गणनम् । एवं कालादिविषयेऽपि यथायथं भाव्यम् । परमं नभः नित्यविभूतिः । सप्तमाध्याये एकद्विवरणम् ।

परमतभङ्गे भगवच्छास्त्रविरोधभङ्गाधिकारे श्रीदेशिकचरणैः यादप्रकाशोद्धृतभगवच्छास्त्रवचनानि एवं दर्शितानि "आकाशेनावृतो वायुः" इत्यारभ्य आकाशमनोऽहंकारबुद्धितत्त्वाव्यक्तानि उपर्युपरि व्यापकतया निर्दिश्य,

अव्यक्तं तमसा व्याप्तं रजसा तत् तमस्तथा ॥
रजः सत्त्वगुणव्याप्तं सत्त्वं कालात्मना पुनः ।
कालो नियत्या व्याप्तो हि सा च शक्त्या वृता पुनः ॥
पुरुषेणावृतमिदमान्तरं च बहिस्तथा ।[276]

---

274. पा.ज्ञा. 8.37abc
275. ल.त. 6.72cd-4cd
276. प.भ. p 237, 8

इति लक्ष्मीतन्त्रच्छायां किंचिल्लभमानानि। अत्र श्रुत्युक्तप्रक्रियाविलक्षणां कारणपरम्परा-मालक्ष्यैतदुक्तम्, मूलप्रकृत्यवस्थाविशेषगतातिसूक्ष्मवैषम्यमूलमिदं वचनजातमिति। यथा सुबालोपनिषदि

अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयते।
तमः परे देव एकीभवति[277] इति अत्र प्रकृतावेव
महतः पूर्वस्थितायाम् अव्यक्ताक्षरतमो-
रूपावस्थात्रयमुच्यते।

तथा ततोऽधिका अवस्थाः मनसिकृत्यानेकोक्तिः। संभाव्यन्ते हि गर्भे मासदशकपर्यन्तं प्रतिदिनमवस्थाभेदवत् सृष्ट्युन्मुखप्रकृतौ महत्तत्वोपत्तेश्चिरकालानन्तरभाविन्याः पूर्वमनेका अवस्थाः प्रकृत्याः समविषमान्यतररूपसततपरिणामशीलत्वात्।

वैखानसोक्तदेहोत्पत्तिक्रमः

एवं किल देहोत्पत्तिप्रकारो वैखानसे विमानार्चनकल्पे विस्तरेणावर्णि। अत्र त्रिविधं भवति एकं मूत्रम्, एकं पुरीषम्, एकं पुरुषाणां शुक्लं स्त्रीणां शोणितम्। शुक्ल-शोणितयोः क्षीरे सर्पिरिव सर्वव्यापिनी मायाशक्तिर्भवति। पुरुषबीजमूलसंचितं शुक्लम् स्त्रीकुचमूलसंचितं शोणितं च संयोगकाले दैवयोगेन वायुना गर्भालयं प्रविशति। तत्र एकरात्रोषितं कलिलं द्विरात्रोषितं बुद्बुदम्, त्रिरात्रोषितं मांसलम्, चतूरात्रोषितं पेशलम्, पञ्चरात्रोषितं घनम्, षड्रात्रोषितं व्यूहम्, सप्तरात्रोषितं बद्धम्, अष्टरात्रोषितं सुकुमारम्, नवरात्रोषितं यावनम्, दशरात्रोषितं वयसम्, अर्धमासे अण्डाकृतिः, मासे शरीराकृतिः।मासद्वये शिरोबाहुप्रदेशः, चतुर्थे मासे पाणिपादद्वयम्, पञ्चमे मासे अस्थिसंघातम्, सप्तमे मासे जीवप्रकाशः, अष्टमे मासे देहे अहंकरोति, नवमे मासे प्रचलनं करोति, तत ऊर्ध्वं जायते। स्नायुमज्जास्थीनि रेतोमयानि, तद्रक्तमांसानि शोणित-मयानि, एवं षट्कोशशविकृतेत्यादि।

---

277. सु. 2.2

जीवतत्त्वम्

एवं प्रकृतिरूपाचेतनवैशिष्ट्यं परमात्मनः सिद्धम् । एवं जीववैशिष्ट्यमपि । पूर्वमेव प्रकृत्या इवास्यापि तच्छरीरस्य दर्शितत्वात् । यादवप्रश्नोद्धृततया परमतभङ्गोदाहृतवचनमध्य एव,

तत्पदं प्राप्य तत्त्वज्ञाः मुच्यन्ते च शुभाशुभात् ॥
त्रसरेणुप्रमाणास्ते रश्मिकोटिविभूषिताः ।
भूयस्तेनैव जायन्ते न लीयन्ते च ते क्वचित् ॥
मद्रूपधारी द्युतिमान् सायुज्यं हि स गच्छति ।[278]

इति मुक्तानां जीवानामणुपरिमाणत्वमवगम्यते । श्रीभाष्यकारैश्चोपनिषदनुसारेणाणुत्वं स्वाभाविकं परिमाणं, 'स चानन्त्याय कल्पते'[279] इति श्रुतिस्तु धर्मभूतज्ञानव्याप्तिकृतमानन्त्यं ब्रवीति । अन्यथा परिमाणद्वयस्वीकारे निर्विकारत्वभङ्गापत्तेरिति अणुत्वमहत्त्वयोर्जीवेश्वरनियतपरिमाणत्व–निर्धारकबादरायणसूत्रानुरोधेन स्थापितस्य वचनमिदं पोषकम् ।

तत्रानन्दमया भोगाः लोकाश्चानन्दलक्षणाः ॥[280]

....

सदा पश्यन्ति तं देवा पुरुषं पुष्करेक्षणम् ॥[281]

....

त्रसरेणुप्रमाणास्ते रश्मिकोटिविभूषिताः ॥[282]

---

278. प.. p. 238
279. श्वे. 5.9
280. अहि. 6.23cd
281. Ibid. 6.24cd
282. Ibid. 6.27cd

इति अहिर्बुध्न्येऽपि । एवं मुक्तावपि जीवपरमात्मभेदे सुस्पष्टे सिद्धे मुक्तावभेदः पञ्चरात्रेष्ट इति वादस्य नैवावसर इति न्यरूपि परमतभङ्गे । एकान्तिधर्मनिष्ठैः कैश्चित् जीवब्रह्मैक्य-वादस्य भेदाभेदवादस्य च पाञ्चरात्रानुसारेणोत्थापनं तदनुरोधिश्रुत्युदाहरणं च तत्तच्छ्रुतिवाक्या-नाम् उपेन्द्रहस्तिबलदेवाचार्यवरदराजपण्डितादिकृतव्याख्याविरोधादप्यनास्थेयमिति च परमत-भङ्गे । एवं च 'उत्क्रमिष्यत एवं भावादित्यौडुलोमिः'[283] इति सूत्रव्याख्याने औडुलोमिमते मुक्तौ जीवब्रह्माभेदः पञ्चरात्रेष्ट इत्याशयेन यदुक्तं भामत्याम्-"यथाहुः पाञ्चरात्रिकाः–

आमुक्तेर्भेद एवेष्टो जीवस्य च परस्य च ।
मुक्तस्य तु न भेदोऽस्ति भेदहेतोरभावतः ।[284]

इति" इति । तत् यथावत् पञ्चरात्रग्रन्थार्थाविमर्शेनेति मन्तव्यम् । तथा सति शाङ्कर-भाष्ये पञ्चरात्राधिकरणे अयमपि कश्चिद्दोषः प्रदर्शितः स्यात् । शांकरमते हि सर्वदैव जीव-ब्रह्मैक्यमिष्टम् । न तु मोक्षदशायां परम् । खण्डितं चेदं मतं श्रीविष्णुपुराणे-

परमात्मात्मनोर्योगः परमार्थ इतीष्यते ।
मिथ्यैतदन्यद्द्रव्यं हि नैति तद्द्रव्यतां यतः ॥[285] इति ॥

पाद्मवाक्यार्थः

एवं च पाद्मे संसारविमुक्तयोः स्वरूपभेदं प्रतिपाद्य,
मुक्तात्मनश्च भवतो भेदः कः पुरुषोत्तम ।[286]

इति ब्रह्मणा पृष्टो भगवान्,

अहमेव भवन्त्येते न भेदस्तत्र कश्चन ।[287]

---

283. ब्र.सू. 1.4.21
284. Ibid भामती
285. वि.पु. 2.14.7
286. पा. ज्ञा. 4.16ab
287. Ibid. 4.17ab

इति मुक्तब्रह्मैक्यमेवाबोचत् इति तदैक्यं न शङ्कनीयम् । अनादिभेदवतोरैक्यासंभवात् । अत एवोत्तरार्धे-

यथाहं विहराम्येवं तथा मुक्ताश्च देहिनः ॥[288]

इति स्वस्य कामरूपग्रहणेन सर्वत्र विहारो यथा, तथा तेषामपि, 'स एकधा भवति त्रिधा भवति'[289] "कामान्नी कामरूप्यनुसंचरन्"[290] 'तस्य सर्वेषु लोकेषु कामचारो विहारो भवती' त्युक्तं संगच्छते । अन्यथा यथातथेति दृष्टान्तदार्ष्टान्तिकद्वयासिद्धेः । एवं च पूर्वोपात्तसूत्रे शांकरभाष्ये दर्शितया 'यथा नद्यः'[292] इति श्रुत्या तुल्यम्,

वर्षधाराः पृथग्भूताः पतन्त्यो दिवि मेघतः ।
भूमावैक्यं यथा यान्ति तद्वद्ब्रह्मणि योगिनः ॥

अर्णो नदीनां बहुधा तत्स्वरूपादिभेदवत् ।
प्रविष्टं वारिधेर्वारि नोदकाद्व्यतिरिच्यते ॥

तथैव ब्रह्मणि परे मुक्तात्मानश्चतुर्मुख ।
एकीभावेन तिष्ठन्ति तत्सालोक्यं यथा भवेत् ॥[293]

इति पाद्मवचनमपि निर्व्यूढम् । प्रथमं मेघात् पततां तोयबिन्दूनां भूमावेकीभाववत् ब्रह्मणि मुक्तात्मनामेकीभाव इत्युक्त्या तोयभूम्योरिव मुक्तब्रह्मणोर्भेदः सिद्धः । द्वितीये वारिधिप्रविष्टानां वारीणां पूर्वस्थितवारिधिवारित इव मुक्तानां ब्रह्मतो भेदः सिद्धः । तत्र पृथग्विभागानर्ह-संश्लेषमात्रम्, न तु ऐक्यम् । अन्यथा स्थूलपरिमाणानापत्तेः । अत एव कठोपनिषदि 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति'[294] इति आधारजलस्य च तादृक्त्वमेवोक्तम्,

---

288. पा.ज्ञा. 4.17cd
289. छा. 7.26.2
290. तै 3 5
291. छा. 7.25.2
292. मु. 3.2.8
293. पा.ज्ञा. 6.50-2
294. क. 4.15

न तु तदैक्यम् । लवणोदकप्रविष्टानां गङ्गादिनानावर्णप्रवाहानां नामरूपप्रहाणेन तत्संश्ले लावण्यादिभाव एव, न तु तत्त्वमेत्रेत्यानुभविकमेतत् । नित्यतिरवद्यनिःसंकोचज्ञानानन्दानषे नित्यसूरीणामपि भगवत्परिवारतां प्रतिपादयत् पञ्चरात्रं पश्चात् प्रयास्य परं पदं प्रविशद्भ्य परमात्मैक्यमेव प्रतिपादयतीति महदिदं साहसम् ।

मुक्तित्रैविध्यविमर्शः

एवमप्यवशिष्यत एकं निरूपणीयम् । पाद्म एव मुक्तित्रैविध्यमुच्यते,

भेदेन चाप्यभेदेन मिश्रेण च चतुर्मुख ॥
त्रिधैव मुक्तिरुदिता भेदे कैङ्कर्यलक्षणा ।
मुक्तिर्यथेह लोकेषु परिचर्यापरा नराः ॥
देवस्य तद्वदेवैते वैकुण्ठे परमात्मनः ।
लोके तस्य समीपस्थाः मुक्तात्मानः समाहिताः ॥
वसन्ति किङ्कराः सन्तः तत्प्रसादपराः सदा ।
अभेदमुक्तिरत्यन्तमैक्यं स्यात परजीवयोः ॥
आत्मनो भावना चैक्ये सोऽहमित्येवमात्मिका ।
यस्य तस्यैकतापत्तिः मुक्तिर्जीवपरात्मनोः ॥
सिद्धान्ते मिश्ररूपे तु भेदे स्थित्वाऽर्चनादिभिः ।
तोषयित्वा परं देवं ततो युक्तः समाहितः ॥
विज्ञानेनैकतानेन परमात्मनि चिद्घने ।
ऐक्यं प्राप्नोति सा मुक्तिरुक्ता सायुज्यलक्षणा ॥[295]

इति । भेदेन नित्यकैङ्कर्यैकरतत्वमेका मुक्तिः । अहं ब्रह्मास्मीति भावनामूलैक्यापत्तिरन्या । प्रथमतः कैङ्कर्यं प्राप्य तोषिततदैक्यभावनया तदैक्यप्राप्तिर्मिश्ररूपा तृतीयेति एतद्वचनार्थः । इदं च अहं ब्रह्मास्मीति भक्तिरूपोपासनेन परमसाम्यापत्तिरूपसायुज्यप्राप्तिरेव मोक्ष इति

295. पा.ज्ञा. 8.27-33

प्रतिपादयन्तीभिः श्रुतिभिः तथा तदर्थस्थापकैः 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च', "भोगमात्रसाम्यलिङ्गाच्च"[297] इत्यादिसूत्रैश्च विरुद्ध्यते। भेदमिच्छतो भेद एव मुक्तौ, अभेदमिच्छतः अभेद एव, प्रथमं भेदं पश्चादभेदं चेच्छतः तथाभावश्च मुक्तिरित्युक्तौ वस्तुतत्त्वमैक्यं वा भेदो वेति न निर्धार्यते। तत्त्वेन चैकरूपेण भवितव्यम्। यथावस्थितस्वरूपलाभ एव मुक्तिः। अत इदं वचनजातं मुक्तित्रैविध्यवास्तवत्वपरं न भवति। अत्रैव मध्ये 'सिद्धान्ते मिश्ररूपे तु' [298] इति सिद्धान्तपदे अवधानं कार्यम्। तथा चात्रेद मुच्यते, लोके त्रयः सिद्धान्ताः सन्ति, कैङ्कर्यमेव मोक्ष इत्येकः, ऐक्यमेवेत्यन्यः, तदुभयं क्रमेणेति तृतीयः। तत्तत्सिद्धान्तानुसारिणः तथा तथा मोक्षं ब्रूयुः। प्रथमे सालोक्यपदस्वारस्यम्। द्वितीये ब्रह्मैव भवतीत्यैक्यवचनस्वारस्यम्। तृतीये सायुज्यपदस्येति। एवं सिद्धान्तत्रयसद्भावमात्रमत्रोक्तम्, स्वाभिमतं त्रयमपीति तु अत्र न सिद्ध्यति। मुक्तित्रैविध्यस्याप्यङ्गीकारे चतुर्थोऽयं सिद्धान्त इति स्यात्। एवमुक्तेरभिप्रायस्तु-सन्ति महर्षयः, प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः[299], उत्क्रमिष्यत एवं भावादित्यौडुलोमिः[300] इति भेदाभेदवादिनः। तेषामपि विष्णुपारम्यवादित्वात् पाञ्चरात्रेणानुपेक्ष्यत्वमिति। तर्हि कः स्वपक्ष इति चेत्-एतन्मुक्तिनिरूपणात् प्राक् अणिमाद्यैश्वर्यं प्राप्नुवतां पुनरावृत्तिर्वर्णिता। तत् फलं मुक्तिं च स्वाभिमतां संगृह्य निगमयति अनन्त-श्लोकेन,

ऐश्वर्यमणिमाद्यष्टगुणावाप्तिः सुदुर्लभा।
मुक्तिर्वा परमानन्दप्राप्तिरूपा यदीप्सितम्॥
पुसां तदुभयं मुक्तिः (भक्तिः?) प्रसूते परमात्मनि।[301]

इति। मुक्तिरित्यत्र भक्तिरिति शोधनीयम्, अन्यथा अनन्वयात्, भक्तिमान् पुमान्[302]

---

296. ब्र.सू. 4.1.3.
297. Ibid. 4.4.21
298. पा.ज्ञा. 8.32a
299. ब्र.सू. 1.4.20
300. Ibid. 1.4.21
302. पा.ज्ञा. 8.20
301. पा.ज्ञा. 8.34, 5ab

इत्युपक्रमाच्च । तथा च भगवतो यावान् आनन्दः, तावतः परमस्याऽऽनन्दस्य प्राप्तिरेव मुक्तिः[303] इति परमं साम्यमुपैति[304] (मु) भोगमात्रसाम्यलिङ्गाच्च (4.4.21) इति श्रुति सूत्रानुकूलमुक्तम् । एवं परमानन्दमात्रकथनेन जगद्व्यापाराभावस्य मुक्तौ व्यञ्जनात् जीवब्रह्मभेद एव पाञ्चेष्टः । एवं च अहं ब्रह्मास्मीत्युपासनस्य विशिष्टाद्वैतिनिरूपित-प्रकारतैव तदभिमता वेदितव्या । समानयुज्यमानकत्वं सायुज्यम् । तच्च समानगुणकत्वम् । अथवा समानानुभावकत्वम् । अनुभाव्यैक्यं ततः सिद्ध्येन् नानुभावित्रैक्यम् । न च सायुज्यकैङ्कर्ययोर्विरोधः । अत एव परमसंहितायाम् (30-94)

> सायुज्यं प्रतिपन्ना ये तीव्रभक्तास्तपस्विनः ।
> किङ्करा.......नित्यं भवन्ति निरुपद्रवाः ।।[306] 94
>
> ....
>
> वेदान्तेष्विदमेवोक्तं वैष्णवं परमं पदम् ।।[307]
>
> ....
>
> एतदेव परासिद्धिर्गतीनां परमा गतिः ।।[308]

इत्यादि ।

यो हि माण्डूक्योपनिषदि, शान्तं शिवमद्वैतम्[309]

---

303. Ibid. 8.34,5
304. मु 3.13
305. ब्र.सू. 4.4.21
306. प. 30.94
307. Ibid. 30.97cd
308. Ibid. 30.98cd
309. मा. 7

इति खण्डं श्रुत्वा शैवाद्वैतमुपनिषदर्थ इति ब्रूयात्, तादृगेवायमिति। न हि तत्रत्यं शिवपदं क्लीबान्तं रुद्रपरं भवितुमर्हति। नो खलु अद्वैतपदं पराभिमतार्थकम्। पूर्वं व्यूहरूपाणां विवक्षितत्वात् तेषामुत्पत्तिविलयसद्भावात् चतुर्व्यूहचातुर्विध्यादिना च व्यूहवासुदेवादेरेकैकस्यापि अनेकत्ववत् परवासुदेवमूर्तेरनादेर्नित्याया अनेकत्वं नास्तीत्यभिप्रायकमित्यादिप्रकरणानुगुणं चिन्तनीयम्। तथैव मुक्तपरमात्मैक्यस्याप्यर्थो ग्राह्यः। रामसुग्रीवयोरैक्यम्[310] अविभागेन दृष्टत्वा[311]दित्यादिकमपि भाव्यम्।

अप्राकृतानेकलोकस्थितिः

अत एव पाद्मे प्राकृतलोकानां निरूपणानन्तरं,

महतस्तमसो बाह्ये लोकाः सुबहुयोजनाः ॥[312]

इत्यारभ्य अनिरुद्धप्रद्युम्नसंकर्षणव्यूहवासुदेवानां पृथक् पृथक् उपर्युपरि लोकान् कोटियोजनानतिमनोहरान् उक्त्वा अनादेः पर य वासुदेवस्य श्रीभूसमेतस्य सेनेशादिपरिवृतस्य शेषभोगे आसीनस्य मुक्तपञ्चकालज्ञसिद्धसेव्यमानस्य लोकः कथ्यते। तत्प्राप्तिरेव परममुक्तिरिति। अर्चिरादिना प्राप्तानां भगवल्लोकानामप्यनेकत्वं बृहदारण्यके श्रूयते-तान् वैद्युतः पुरुषो मानस एत्य ब्रह्मलोकान् गमयति। ते ब्रह्मलोकेषु पराः परावन्तो वसन्ति[313] इति परावन्तः-परवन्तः पराधीनाः। यद्वा परा इति दूरदेशपरम्। परावन्तः-पुनरावृत्तिस्थानाद्-दूरे स्थिता इत्यर्थः। परावत इति पाठे तेनावार्थेन ब्रह्मलोकविशेषणम्। व्यूहलोकेष्वपि कामचारो मुक्तानाम्। श्रीभाष्ये अपि

परस्य ब्रह्मणः .... स्वेच्छापरिकल्पिताः
स्वासाधारणाः अप्राकृताश्च लोका नात्यन्ताय न सन्ति [314]

---

310. रा.सु. 35.52
311. ब्र.सू. 4.3.4
312. पा ज्ञा. 12.49
313. बृ. 6.1215
314. श्रीभा. 4.3.11

इत्यभाषिं । पारमेश्वरे च स्वकीयज्ञानकाण्डविषय-

परिगणने, महिषीभूषणायुधगरुडादिप्रस्तावानन्तरम्-

एतेषां मूर्तयो नित्या अनित्याश्च पृथग्विधाः ॥

विभोर्वै वासुदेवस्य स्थानं नित्यं परात्परम् ।

अन्येषां व्यूहरूपाणां विभवानां तथैव च ॥

तेषां विस्तारमानं च यथा स्वं स्वं व्यवस्थितम् ॥[315]

इत्युक्तम् । अत्र विरजांसि इति विशेषणात् अप्राकृतत्वं ज्ञायते ।

ब्रह्मविष्णुरुद्रमूर्तिषु भेदो नास्तीति क्वचित् कथनात् त्रयाणां साम्यमेव सर्वात्मनेष्टमिति वादोऽप्येवं निरसनीयः । तथा विष्णुप्रतिमावत् ब्रह्मरुद्रप्रतिमानिर्माण-प्रतिष्ठापनपूजनादि-कमप्यत्र वक्तव्यं भवेत् । पाशुपत-पञ्चरात्रयोरेकागमत्वमेव स्यात् । अतः साम्यवर्णनं यावत्प्रजाविषये ब्रह्मणः स्रष्टृत्वेन संबन्धः, तावद्विषये पालकत्वेन विष्णोः संबन्धः, संहारकत्वेन च रुद्रस्येत्येतावन्मात्रपरम् । तदधीनं गौरवं तु त्रयाणां सममेव । विष्णुतिलके, भगवत्सृष्टेन ब्रह्मणा सृष्टः अर्धनारीश्वरः प्रजाः असङ्ख्याः उदपादयत् । तद्भारश्चासह्य आसीत् । ततो भारहरणोपाये चिन्त्यमाने भगवता रुद्रोदरे क्षुद्वर्धिता । तत्पीडितश्च स सर्वमभक्षयत् । अथ रुद्रः कथं मे महतीयं क्षुदित्यचिन्तयत् । ततो भगवता रुद्र आज्ञप्तः संहारसामर्थ्यसंपन्नत्वात् त्वं हरो भवेति इति वर्णितम् । परमसंहितायां च,

त्रयस्तत्र प्रधानास्तु सर्वलोकेषु विश्रुताः ॥

पुरुषाः कीर्तिताः पूर्वं ब्रह्मेशो विष्णुरित्यपि ।

तत्रापि तत्सत्त्ववृत्त्या जगतां च पि रक्षणात् ॥

अपवर्गरतत्वाच्च विष्णुरेव विशिष्यते ।

सर्वकल्याणहेतुत्वात् तेनासौ पुरुषोत्तमः ॥[316]

---

315. पार· 1·104cd-
316. प· 2·93cd-5

इत्यादिविस्तरेण। ब्रह्मादिषु मूर्तित्रयमिति व्यवहारश्च। भगवतो वासुदेवस्यैव विष्णु-रूपेणावतारात् तत्राऽऽत्मभेदाभावात् विष्णुमूर्तिरिति मूर्तिव्यवहारे प्राप्ते, तत्साम्यचिन्तया ब्रह्मरुद्रयोरपि मूर्तिव्यपदेश आपतितः। अथ च तत्र जीवसद्भावेऽपि सर्वसृष्टिसंहृतिनिर्वाहो-पयोगितया भगवतो विशेषाविर्भावसत्त्वात् तद्भावनया स मूर्तिव्यपदेशः कथंचिदनुमोदितः आसीदिति निर्वहणीयः।

'संकर्षणात्मको रुद्रो निष्क्रम्यात्ति जगत्त्रयम्।'[317]

इति च श्रीविष्णुपुराणे...

सृष्टिं तत करिष्यामि त्वामाविश्य प्रजापते।[318]

इति च ब्रह्मविषये कथ्यते। तदनयोः प्राकृतत्वं संकर्षणादीनां तु साक्षाद्भगवत्त्वमिति विशेषः। एतच्च चातुर्व्यूह्यं चतुर्धेति विशाखयूपाख्यरूपनिरूपणमुखेन प्रागेवादर्शि। अत एव चातुरात्म्यं वैकुण्ठनिलयमिति व्यक्तम्। तत्रान्तिमस्य अनिरुद्धस्यांशात् पद्मनाभादेव ब्रह्माण्डस्य ब्रह्मणश्च जन्मेति तत्पश्चाद्भाविनां विभवानां प्राकृतलोकस्थानकत्वेऽपि व्यूहानां पूर्वेषां परमं पदमेव स्थानं भवितुमर्हति। अत एव लक्ष्मीतन्त्रे–

तृतीयं विभवाख्यं तु विश्वमन्दिरमव्ययम्।
नानाकारक्रियाकर्तृरूपं विष्णोर्निशामय॥[319]

इति विभवानामेव विश्वशब्दवाच्यप्रपञ्चस्थानकत्वमुक्तम्। एवं विशाखयूपान्तर्गतया चतुर्धावस्थितानामेषां व्यूहानां प्रत्येकमेकैकलोकाधिपत्यमपि तत्रास्तीति ज्ञायते। अत एव वैखानसे विमानार्चनाकल्पे, 'अथातः परमात्मनः सकाशात् हि यमण्डमभवत्। तदन्तर्गतानां सर्वेषामण्डानमुपरि सनातनमचिन्त्यं देवैरप्यनभिलक्ष्यं नित्यशुद्धमुक्तस्वभावपुरुषै-रनुभूयमानं वैष्णवमण्डम्। तत्र विष्णुलोकाश्चत्वारः आमोदः प्रमोदः संमोदो वैकुण्ठमिति एकैकस्योपरि यथाक्रमेण भवति। .... तस्मिन् व्योमनिलये परमात्मा स्वसंकल्पेन

---

317. वि.पु. 2.5 19cd
318. परमतभङ्गे चतुर्थे परतत्वाधिकारे अयं श्लोकार्थः दृश्यते
319. ल. त. 10.44

देवीभूषणायुधैः सह आमोदे विष्णुः, प्रमोदे महाविष्णुः, संमोदे सदाविष्णुः, वैकुण्ठे सर्वव्यापि नारायणः आसीनो भवति"[320] इति लोकचतुष्टयमुक्तम्। अत्र हिरण्मयाण्डपदेन प्राकृतब्रह्माण्डग्रहणे, उपरि 'सनातनमचिन्त्यम्'[321] इत्यादिना सनातनत्वादिविशेषण-विशिष्टतया वर्ण्यमाना लोकास्तद्विलक्षणा एव विभाव्याः। यदि तु उपरि प्राकृत प्रपञ्चोत्पत्तेः पृथग्वर्णनात् हिरण्मयाण्डपदं 'हिरण्मये परे कोशे विरजं ब्रह्मनिष्कलम्।'[322] इत्युपनिषदुक्तप्राकृतमण्डमेव, तत्र लोकचतुष्टयस्याधस्तादनेकाण्डसद्भावोऽपि संभाव्यत इति मन्यते, तस्याप्राकृतस्योत्पत्तिकथनं न सादित्वाभिप्रायेण, किं तु "इच्छात एव तव विश्वपदार्थसत्ता"[323] "नित्यं नित्येच्छासिद्धम्"[324] इत्यादिसंप्रदायानुरोधेन भगवदिच्छाविरहे नित्यस्यापि स्थित्यसंभवाभिप्रायेणेति ध्येयम्। एते चत्वारो लोकाः अनिरुद्धादीनामेव। त एव विष्ण्वादिशब्दान्तराभिलपिता इति भाव्यम्। एषां पुरुषसत्याच्युतादिनामधेयभाक्त्वमपि भारतोक्तं प्रागेवावोचि। एवमैकरस्याशयेनैव प्रवृत्तं श्रीवात्स्यवरदाचार्यपद्यम्,

> आमोदे भुवने प्रमोद उत संमोदेऽपि संकर्षणं
> प्रद्युम्नं च तथाऽनिरुद्धमपि तान् संहारसृष्टिस्थितीः।
> कुर्वाणान् मतिमुख्यषड्गुणभिदायुक्तान् त्रियुग्मात्मकान्
> व्यूहाधिष्ठितवासुदेवमपि तं वैकुण्ठनाथं भजे ॥[325] ॥

इति वैखानसविजये-दर्शितमस्माभिः। श्रीभाष्ये-विभवार्चनात् व्यूहं प्राप्य व्यूहार्चनात् परं ब्रह्म वासुदेवाख्यं सूक्ष्मं प्राप्यत इति वदन्ति"[326] इति श्रीपाञ्चरात्राधिकरणे उक्तः क्रममुक्तिपक्षः अप्राकृततत्तल्लोकस्थविषयकोऽपि भवेत्।

---

320. वि, क. प. 87 p. 494, 5
321. Ibid.
322. मु. 2.2.9
323. वैकुण्ठस्तवः sl. 37
324. रहस्यत्रयाधिकारे प्रधानप्रतितन्त्राधिकारात् उद्धृतम्।
325. वै वि. p. 32
326. ब्र.सू. 2.2.41 श्री.भा.

व्यूहानां प्राकृतलोका अपि

परं तु भारते,

सर्वलोकतमोहन्ता आदित्यो द्वारमुच्यते ॥
ज्वालामाली महातेजाः येनेदं धार्यते जगत् ।
आदित्यदग्धसर्वाङ्गा अदृश्याः केनचित् क्वचित् ॥
परमाण्वात्मभूताश्च तं देवं प्रविशन्त्युत ।

तस्मादपि विनिर्मुक्ता अनिरुद्धतनौ स्थिताः ॥
मनोभूतास्ततो भूयः प्रद्युम्नं प्रविशन्त्युत ।
प्रद्युम्नाच्च विनिर्मुक्ताः जीवं संकर्षणं ततः ॥
विशन्ति विप्रप्रवराः साङ्ख्ययोगाश्च तैः सह ।

ततस्त्रैगुण्यहीनास्ते परमात्मानमञ्जसा ॥
प्रविशन्ति द्विजश्रेष्ठ क्षेत्रज्ञं निर्गुणात्मकम् ।

सर्वावासं वासुदेवं क्षेत्रज्ञं विद्धि तत्त्वतः ॥
समाहितमनस्कास्तु नियताः संयतेन्द्रियाः ।
एकान्तभावोपगताः वासुदेवं विशन्ति ते ॥[327]

इति वचनस्य श्रीमद्रहस्यत्रयसारोदाहृतस्य (गतिविशेष) दर्शने संकर्षणादीनां प्राकृतलोकस्थितिरवगम्यते । सूर्यमण्डलादुपरि तेषां स्थितिं प्रदर्श्य वासुदेवार्थगमनपर्यन्तं तेषां त्रैगुण्यवशत्वस्य 'ततस्त्रैगुण्यहीनास्ते' इत्यनेन ज्ञापनात् । तत्र साङ्ख्ययोगाश्च तैः सह इति जीवप्राप्तिरूपकैवल्यार्थज्ञानयोगनिष्ठानामपि तत्र सहस्थितिकथनात्, कैवल्यभाजां च "योगिनाममृतं स्थानं स्वात्मसंतोषकारिणीम् ।"[328] इति श्रीविष्णुपुराणे परमपदातिरिक्तलोकप्राप्तिप्रतीतेश्च । संकर्षणस्य जीवाभिमानितया कैवल्यभाजां संकर्षणलोकप्राप्तिर्युज्यते ।

---

327. म.भा. 12. 332. 13cd–8
328. वि.पु. 4.2.21

एवं च मनोहङ्काराभिमानिप्रद्युम्नानिरुद्धलोकयोस्तदधरत्वम् । अनिरुद्धस्य क्षीरसमुद्रस्थत्वकथनात् तद्वदन्ययोरपि प्राकृतोऽपि लोक एषितुमर्हः । ब्रह्मादिवत् विष्णोरपि प्राकृतलोकस्थितिवत् चतुर्णामिह स्थितिः संभाव्यत एव एषां संहृतिसृष्टिस्थितिरूपकार्यवत्तया जैवजागरस्वप्न-सुष्वापावस्थाभिमानित्वस्य तदा विश्वतैजसप्राज्ञरूपसंज्ञानवत्त्वस्य च माण्डूक्यभाष्ये प्रदर्शितत्वाच्चैषामेतल्लोकस्थितिरप्यपेक्ष्यते । संकर्षणे सुषुप्त्यभिमानिनि प्राज्ञ इति नामसत्त्वादेव उपनिषदि सुषुप्तिदशायां जीवस्थितिवर्णने 'प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरम्'[329] इति प्राज्ञशब्दप्रयोगः । स्वस्वलोकस्थितानां ब्रह्मादीनां देवानां मेरुशिखरेऽपि स्थानपरिकल्पनवत् एषां प्रकृतिकार्यव्यापृतानां प्रकृतावपि स्थानं त्रिमूर्त्यन्तर्गतस्य विष्णोरिव स्थाने श्रीविष्णुपुराणव्याख्याने श्रीष्णुचित्तीये वायुपुराणं प्रमाणीकृत्य सत्यलोक एव विष्णोर्वैकुण्ठः शिवस्य कैलासश्च प्राकृतो वर्तत इत्यभ्यधायि ।

नारायणलोकोऽपि

पाद्मसंहितायां च—

> उत्तरेण ब्रह्मलोकात् विष्णुलोकं विदुर्बुधाः ।
> अन्तरं लोकयोरुक्तं लक्षयोजनसंमितम् ॥
> तावत्येवान्तरालेऽस्य दक्षिणस्यां दिशि स्थितः ।
> शिवलोकश्चतुर्वक्त्र तस्मिन् आस्ते शिवः स्वयम् ॥[330]

इति विष्णुशिवलोकावुक्त्वा, अथ भगवतः पञ्चलोकाः प्रतिबोध्यन्ते-

> योजनानां कोटिमूर्ध्वमुल्लङ्घ्य पुरतः स्थितः ।
> सर्वात्मा भगवानूर्ध्वं तस्मात् कोटित्रयाय ते ॥
> निवृत्त्यात्मा निवसति भगवानव्ययः स्वयम् ।
> तावत्येव स्थितो माने विश्वात्मा विश्वकृद्धरिः ॥

329. बृ. 4.3.21
330. पा.ज्ञा. 12 34,5

पुरुषात्मा पुरस्तात्तु चतुष्कोटिप्रमाणके ।
स्थितः कोटिमर्तं त्योर्ध्वं पञ्च पश्चादवस्थितः ।।
परमेष्ठी च भगवान् पञ्चकं विष्णुविष्टरम् ।[331]

इति पञ्चोपनिषन्मन्त्रप्रतिपाद्यपञ्चशक्तिमयमूर्तिलोकाः दर्शिताः । एषामेव वा एतत्तुल्यानां वा व्यूहलोकत्वमपि संभाव्यते । एतदनन्तरमेव अण्डभित्तिमावरणसप्तकमण्डानन्त्यं नारायणस्य सर्वत्रान्तर्बहिर्व्याप्तिं चभिधाय तमसः परस्तात् चत्वारो व्यूहलोकाः पाद्मेऽपि प्रतिपादिताः:-

महतस्तमसो बाह्ये लोकाः सुबहुयोजनाः ।।
चत्वारः क्रमशः सन्ति चतुर्भिः समधिष्ठिताः ।
व्यूहैः क्रमेण वक्ष्ये ताननिरुद्धः परः स्मृतः ।।
प्रद्युम्नोऽनन्तरं तेषां संकर्षणसमाह्वयः ।
वासुदेवस्ततः पश्चात् व्यूहाख्यः कमलासन ।।[332]

....

अनादिर्वासुदेवश्च तयोर्लोकावनुक्रमात् ।।
ततो नारायणस्यापि लोकस्तन्निकटे स्थितः ।[333]

....

तेभ्यो बहिः स्थितो लोको यत्रास्ति भगवानजः ।।
अनादिर्वासुदेवाख्यः शोभिते मणिमण्डपे[334]

इत्यादि ।

अत्र नारायणमूर्तिलोकोऽपि कश्चिदिष्यते ।

---

331. Ibid. 12.36-9ab
332. Ibid. 12.49cd-51
333. Ibid. 12.52cd, 3ab

लक्ष्मीतन्त्रे व्यूहचतुष्टयं निरूप्योक्तम्-

> विभवोऽनन्तरूपस्तु पद्मनाभमुखो विभो: ॥
> अनिरुद्धस्य विस्तारो दर्शितस्तस्य सात्वते ।
> अर्चापि लौकिकी या सा भगवद्भावितात्मनाम् ॥
> मन्त्रमन्त्रेश्वरन्यासात् सापि षाड्गुण्यविग्रहा ।
> पराद्यर्चावसानेऽस्मिन् मम रूपचतुष्टये ॥
> तुर्याद्यवस्था विज्ञेया इतीयं शुद्धपद्धतिः ।[335]

इति ।

अत्रानुक्तावपि व्यूहान्तररूपाणां केशवादीनां हार्दावतारस्य च शुद्धस्सृष्ट्यन्तर्भावो भाव्यः । केशवादिमूर्तीनामिव तत्कान्तारूपेणावतीर्णानां लक्ष्मीमूर्तीनामपि नामनिर्देशोऽप्यत्र लक्ष्मीतन्त्रे व्यक्तः । तेषां वर्णभुजभूषणायुधादिकमपि बहुषु प्रत्यपादि । पाद्मे च वर्णनिरूपणावसरे-(क्रियापादे 14)

> कृते वलर्क्षस्त्रेतायामरुणो द्वापरे पुनः ॥
> पीतः कालो घनश्यामो वासुदेवः परः पुमान् ।
> रक्तः संकर्षणो देवः प्रद्युम्नः कनकप्रभः ॥
> श्यामोऽनिरुद्धः कथितः कृतादिषु चतुर्ष्वपि ।
> केशवः कनकप्रख्यः स्यार्दर्जुनसमाकृति ॥
> नारायणः श्यामवर्णो माधवः स्फटिकप्रभः ।[336]

इत्यादि ।

अनेन वासुदेवमूर्तिमात्रे युगभेदेन वर्णभेद इति ज्ञायते । अत्र ब्रह्मशिववसुरुद्रादित्याप्सरः-प्रभृतीनामपि वर्णविशेषा व्युत्पादिताः । परव्यूहविभवानामेवार्चारूपेणाविर्भाव इति तत्त्रयमपि पञ्चरात्राधिकरणे भाष्ये गणितम् । 'बिम्बाकृत्यात्मना बिम्बे समागत्यावतिष्ठते' ।[337] इति,

---

335. ल.त. 2.58cd-61ab
336. पा.क्रि. 14.68-71ab
337. सा.6.22ab

सात्त्वतेऽपि मन्त्रमन्त्रेश्वरन्यासात् षाड्गुण्यमूर्त्याविर्भावोऽर्चायामदर्शि। हार्दरूपो दिव्यमङ्गलविग्रहः प्रतिपुरुषं हृदये आविर्भूतोऽन्यः। तस्य संस्थानं तु योगकलया हृदयाब्जकोशमुद्घाट्य यदि स स पुरुषो ध्यायेत्, तदैव द्रष्टुं शक्यम्। अत एवोच्यते-

अष्टाङ्गयोगसिद्धानां हृद्यागनिरतात्मनाम् ॥
योगिनामधिकारः स्यात् एकस्मिन् हृदयेशये ।[338]

इति तत्तद्योग्येकदृश्यत्वम्। अतो बहुसाधारण्याभावादत्र तदुपेक्षा। शौनकोऽपि विष्णुधर्मे (103)

सुरूपां प्रतिमां विष्णोः प्रसन्नवदनेक्षणाम् ।
कृत्वाऽऽत्मनः प्रीतिकरीं सुवर्णरजतादिभिः ।[339]

इति यथेच्छं काञ्चनमूर्तिमुत्पाद्य प्रतिष्ठाप्य,

तामर्चयेत् तां प्रणमेत् तां यजेत् तां विचिन्तयेत् ॥
विशत्यपास्तदोषस्तु तामेव ब्रह्मरूपिणीम् ।[340]

इति परव्यूहविभवतत् अर्चाया अर्च्यत्वयष्टव्यत्वोपास्यत्वादिकमाह। नैवं हार्दस्य सर्वसाधारण्यम्। यद्यपि,

"मानसी होमपूजा च बेरपूजेति सा त्रिधा"[341]

इति पूजात्रैविध्यवचनात् हृद्यागमपि सर्वे कुर्वन्ति, अथापि नैषां हार्दरूपमभिलक्ष्यम्। अतः स्वाभीष्टरूपमेकं समयानुगुणमनुचिन्त्य तदर्चनभावनया मानसपूजां निर्वर्तयन्ति। योगी परं योगशक्त्या साक्षात्कृत्य हार्दरूपं तदर्चनं यथावद्विधत्ते। एवंभूतहार्दरूपाणामर्चानां विभवानां च प्राकृतलोकस्थानकत्वेऽपि, व्यूहानां प्राकृतलोकेऽपि स्थितानां परमपदस्थानकत्वमप्रकम्प्यम्। परस्य तु वासुदेवरूपस्य परमपदमेव स्थानम्। तदेव मनसिकृत्य तैत्तिरीयेऽपि

---

338. Ibid. 2.7cd, 8ab
339. वि.ध. 103.16
340. Ibid. 103 29, 30
341. खि.ब. 1.16ab

'ब्रह्मविदाप्नोति परम्'[342] इत्यभिधीयते। ब्रह्मवित्, नानारूपं ब्रह्म येन केनापि रूपेणोपासीनः परमेव वासुदेवं मुक्तौ प्रतिपद्यत इति तदर्थः। विव्रियते च तत्र, 'यो वेद निहितं गुहायाम्, परमे व्योमन् सोऽश्नुते'[343] इति।

श्रीतत्त्वम्

एवं भगवतः पञ्चरूपत्वे लक्ष्म्या अपि पञ्चरूपत्वं तत्तत्स्थानकत्वं च सिद्धम्। लक्ष्म्या अपि यथायथं नियमेनावतारो न केवलं लक्ष्मीतन्त्रे अहिर्बुध्न्यादिसंहितान्तरेष्वपि जोघुष्यते। प्रपन्नपारिजाते, श्रीवात्स्यवरदगुरुभिर्दर्शितानि पञ्चरात्रवचनान्यपि हृद्यानि। व्यासवत् पञ्चरात्रे विशिष्टमादरं वहता श्रुता-काशिकोक्तरीत्या एकायनवाक्योपबृंहणरूपान् श्लोकान् प्रणीतवता पञ्चरात्रप्रशंसितद्वादशाक्षरघटकभगवद्वासुदेवपदव्याख्या विस्तरपूर्वकं,

क्व नाकपृष्ठगमनं पुनरावृत्तिलक्षणम्।
क्व जपो वासुदेवेति मुक्तिबीजमनुत्तमम्॥[344]

इति, परमार्थदर्शिना परमर्षिणा पराशरेणापि श्रियो भूमा सम्यगुपदिश्यते 'विष्णोर्देहानुरूपां वै करोत्येषाऽऽत्मनस्तनुम्'[345] इति। श्रीशब्दार्थश्च षड्विधः संप्रदायग्रन्थेषु प्रसिद्धः। यत्सङ्ग्रहरूपोऽयमास्माकः श्लोकः

श्रीस्त्वं श्रिता शरणमीप्सुभिरार्तरावं
श्रुत्वा श्रिता सपदि शार्ङ्गिभुजान्तरालम्।
तां श्रावयस्यथ शृणासि समस्तमेनः
श्रीणासि शेषविधये सकलैर्गुणैर्नः॥[346]

---

342. तै. 2.1
343. Ibid.
344. वि.पु.2.2.44
345. Ibid. 1.9.145
346. प्रकृतग्रन्थकर्तुः अयं श्लोकः

इति ।

इतोऽधिकमपि श्रीशब्दघटकस्वरव्यञ्जनाभिधित्सितार्थविशेषप्रकाशनेनोपकरोति लक्ष्मी-तन्त्रम्,

श्रयन्ती श्रयणीयास्मि शृणामि दुरितं सताम् ॥
शृणोमि करुणां वाचं श्राणामि च गुणैर्जगत् ।
शयेऽन्तः सर्वभूतानां रमेऽहं पुण्यकर्मणाम् ॥
ईडिता च सदा देवैः शरीरं चास्मि वैष्णवम् ।
एतान् मयि गुणान् दृष्ट्वा वेदवेदान्तपारगाः ॥
गुणयोगविधानज्ञाः श्रियं मां संप्रचक्षते ।
साऽहमेवंविधा नित्या सर्वाकारा सनातनी ॥[347]

इति ।

अस्या उपेयत्ववत् उपायत्वविभुत्वादि मुक्तकण्ठं विस्तरेण संहितासु दर्शयन्तीषु सर्वत्र दशा-यथाकरणरूपधाष्टर्यात् बिभ्यतः प्रमाणशरणाः लक्ष्म्यां निकर्षकलनरूपमपचारं विहाय उपदिष्टमुत्कर्षमेवाद्रियमाणाः दिव्यदम्पतिसानुग्रहकटाक्षसंपत्त्या समृध्यन्ति । लक्ष्मीनारायणयोः सर्वांशे साम्यप्रतिपादकानां लक्ष्मीतन्त्रादिवचनानां विमर्शोऽन्यत्र द्रष्टव्यः ।

नित्यविभूतेर्ज्ञानानन्दरूपता

इयं च मुख्यमुक्तिस्थानभूता नित्यविभूतिः शुद्धसत्वमयी । अत एव प्रकृतिविलक्षणा ज्ञानानन्दस्वरूपत्वादपि तद्विलक्षणेति पञ्चरात्राद्यनुसारी सिद्धान्तः । रहस्याम्नाये 'क्रियात्मिका भगवतो व्यक्तिः'[348] इति प्रश्नपूर्वकं 'यदात्मको भगवस्तदात्मिका'[349] इत्युक्ततया

---

347. ल.त. 4.51-4
348. न्यायसिद्धाञ्जने नित्यविभूतिपरिच्छेदात् उद्धृतम् ।
349. Ibid.

परमात्मास्वरूपस्येव तद्दिव्यमङ्गलविग्रहस्यापि ज्ञानानन्दस्वरूपत्वमवगम्यते। तद्वत् षाड्गुण्यात्मकत्वस्याप्यवगमेऽपि ज्ञानशक्त्यादिगुणानां चेतननिष्ठानामचेतने दुर्वचत्वात् षाड्गुण्यात्मकत्वं विग्रहे परमात्मगतषाड्गुण्यप्रकाशकत्वरूपमिष्यते। ज्ञानानन्दस्वरूपता तु अविरोधाद्यथावदेव। एवं च तुल्यनयात् तस्यैकदेशस्येव सर्वस्या अपि नित्यविभूतेस्तथात्वं युक्तम्। स्पष्टं च वचनमस्ति 'स्वसत्ताभासकं सत्त्वं गुणसत्त्वादिलक्षणम्'[350] इति। ज्ञानानन्दमया लोकाः[351] इति च। अत्र स्वसत्ताभासकमितीदं ज्ञानस्वरूपमित्येतद्विवरणम्। यथा ज्ञानस्य ज्ञानत्वं स्वसत्तामात्रेण प्रकाशमानत्वात् आत्मनां ज्ञानस्वरूपत्वं स्वयंप्रकाशत्वात् तथैव परमपदस्यापीति। नन्वेवं शास्त्रनिरपेक्षमस्मान् प्रति किं न प्रकाशत इति चेत् एकात्मनिष्ठं ज्ञानमन्यस्मै कस्मान्न प्रकाशते? एकैकोऽप्यात्मा स्वं स्वं प्रतीव कुतो नान्यस्मै प्रकाशते? तथा परमपदमपि तत्रत्यान् प्रत्येव स्वयं प्रकाशते, नान्येषामित्यस्तु। ननु तेषां धर्मभूतज्ञानविकासस्य यथावत् स्थिरं जातत्वात् तत एव परमपदनित्यप्रकाशे संभवति किमर्थं तस्य ज्ञानस्वरूपत्वोक्तिरिति चेत्, न हि प्रयोजनमुद्दिश्य प्रमाणप्रवृत्तिः, प्रयोजनस्य सत्त्वेऽसत्त्वेऽपि तत्त्वमात्रदर्शित्वात् प्रमाणस्य। अतस्तेन ज्ञानस्वरूपत्वे कथ्यमाने कथं तदपह्नोतुमीश्महे। अत्रेदं वक्तव्यम् ज्ञानशब्दः सविषयकं सकर्तृकं च कंचिदर्थं जानातीत्यादिपदगम्यमाह। तथाभूत एवार्थस्तस्य मुख्यः। आत्मसु ज्ञानशब्दप्रयोग औपचारिकः तद्वत् स्वयंप्रकाशमानत्वादिति आत्मसिद्धितत्त्वटीकादिषु व्यक्तम्। एवं च परमपदेऽपि सकर्तृकसविषयकज्ञानक्रियारूपत्वस्य दुर्वचतया औपचारिकमेव तद्वाच्यम्। तच्च यथा धर्मभूतज्ञानं स्वाश्रयमात्रं प्रति स्वयं प्रकाशते, तद्वत् एकैकोऽप्यात्मा स्वं स्वं प्रति स्वयं प्रकाशत इति आत्मनां ज्ञानता, तथा परमपदं तस्मिन् स्थितसंबन्धान् पुंसः प्रति सर्वदा भासते इत्ययमर्थः स्वसत्ताभासकमिति च पदेन विवक्ष्यते। प्रकृत्यादीनां स्वसंबद्धान् प्रति सर्वथा प्रकाशमानता नास्तीति जडत्वमेव। तदिदं परमपदस्य सर्वदा प्रकाशमानत्वं विकसितधर्मभूतज्ञानायत्तं वा स्वरूपायत्तं वेति विचारे उभयरूपं वा स्यादेकरूपं वा। सर्वथा सर्वदा तान् प्रति प्रकाशमानत्वरूप औपचारिको ज्ञानशब्दार्थो न क्षतः। परं तु मुक्तान् प्रति कालप्रकृतिप्राकृतिकानामपि सर्वदा प्रकाशमानतया तेष्वपि ज्ञानानन्दमयत्वं

350. पौ. 24.42
351. तत्त्वमुक्ताकलापे नायकसरे [62] श्लोकव्याख्यातः उद्धृतम्।

कस्मान्नोच्यत इति प्रत्यवस्थीयेतेति तद्वैलक्षण्याय स्वयंप्रकाशत्वस्वभावोऽप्यप्राकृते इष्यते। अथ स्वदर्शि सर्वपुरुषं प्रति सर्वदा प्रकाशमानत्वरूपौपचारिकार्थमादाय तत्र वैलक्षण्यवर्णने कथंचित् यत्येत। एवं तर्हि एकत्रौपचारिकार्थसंभवरूपो दोषोऽवश्यं जागर्तीति। एवं भासमानस्य परमपदस्यानुकूलतयैव सर्वदा भानादानन्दरूपताऽपि, तथा च परमपदे कोऽपीदं सम्यगजानानो वा प्रतिकूलताग्राही वा न वर्तत इति ज्ञानानन्दमयत्वं निर्विवादम्। श्रीकृष्णेन वरुणगृहात् पितरं नन्दगोपमानीतवता गोपान् संकुचितज्ञानान् वैकुण्टदर्शनकाङ्क्षिणः प्रति स लोको दर्शित इति श्रीभागवते। तत्रेदं परमपदस्वयंप्रकाशत्वमुपयुज्यते। एवं परमपदं प्रविष्टान् गुणाष्टकाविर्भावप्रागवस्थाशालिनः प्रति व्यूहलोकेषु क्रममुक्तये तदधीनानन्द-परमसाम्याय च तेषां प्रयत्न इत्यादिकमपि यथार्हमूह्यताम्। अतः

> “ज्ञानं नाम गुणं प्राहुः प्रथमं तत्त्वचिन्तकाः ॥
> स्वरूपं ब्रह्मणस्तच्च गुणश्च परिगीयते।”[352]
> “ज्ञानानन्दमयो ह्यात्मा शेषो हि परमात्मनः”[353]

इति सर्वात्मविषय इव ‘ज्ञानानन्दमया लोकाः’ इत्यादौ नित्यविभूतिविषयेऽप्यर्थैक्यमुचित-मिति प्राचामाशयः। नैतावता नित्यविभूतेः प्रत्यक्त्वप्रसङ्गः। स्वस्मै प्रकाशमानत्वाभावात्। प्रकाशफलित्वरूपं व्यवहर्तृत्वं हि चेतनस्यैव। नित्यविभूतेश्च ज्ञानत्वेऽपि न ज्ञान-गुणकत्वमित्यलम्।

कालतत्त्वम्

एवं शुद्धसृष्टिनिरूपणप्रसङ्गेन परमपदस्थितिर्वर्णिता। उपनिषत्सु कारणवाक्येष्वनन्तेषु अशुद्धप्राकृतसृष्टिरेव विस्मृता। अजायमानो बहुधा विजायते।[354] तस्य धीराः परिजानन्ति योनिम्”[355] इत्येवमवताररूपशुद्धसृष्टेरीषत्प्रस्तावेऽपि न तत्र वैशद्यं ततो

---

352. पौ. 2.56,cd 7ab
353. तत्त्वमुक्ताकलापे नायकासरे नित्यभूतिपरिक्षायां श्लोकव्याख्यातः उद्धृतम्।
354. आ. 3.1216
355. Ibid.

लभ्यम् । अतः पाञ्चरात्रेऽत्रेव तद्वैशद्यमिति तदत्र समक्षेपि । प्राकृतमहद् दि-सृष्टिक्रमस्तु यथावेदान्तमेव प्राय इति चतुर्दशभुवनतद्गतविशेषादिकमपि तथैवेति अलं तत्र यावदुक्तम् । परमात्मनि स्वाधीनत्रिधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदत्वरूपविशेषं वर्णयति सिद्धान्ते बद्धमुक्तनित्यभेदेन जीवत्रैविध्यवत् अचेतनद्रव्यत्रैविध्यमेव स्वरसमित्या-शयानाः पूर्वोक्तप्रकृतिनित्यविभूत्यतिरिक्ततया कालमप्येकं पृथग्गणयन्ति । कालस्य प्रकृतिकार्यत्ववादः एकदेशिमत इति न तम् आद्रियन्ते । प्राकृतत्वेऽपि तदुत्पत्तेः प्राक् स नासीदिति 'अग्र असीदेकमेव'[356] इत्यादिवाक्यार्थवर्णनमशक्यम् । नित्यविभूतौ कालाधीन-परिणामास्वीकारेऽपि भूतभविष्यद्वर्तमानकालव्यवहारस्यानिवार्यतया कालस्य प्राकृतत्वे तत्र तदयोगश्च । अत एव परमसंहितायाम्,

> 'कालश्च तैजसादेव जातस्तु यदि (कृतः?) लक्षणः ।
> कालात् दिशश्च संभूताः पूर्वाद्याः क्रमशः स्थिताः' ॥[357]

इति वचनमन्यथा नेयम् । तैजसशब्दवाच्यस्य राजसाहंकारस्य कालः कार्यं चेत्, महदाद्युत्पत्तिः कालाधीना न भवेत् । अतो रजोगुणस्य क्रियाविषये मुख्यत्वात् अहंकार एव । राजसादिविभागारम्भात् क्रियाबाहुल्यप्रारम्भस्तत्प्रभृति । तार्किकोक्तरीत्या च क्रियाहेतुत्वमेव कालहेतुत्वमित्याशयः । विभूतिद्वयव्यापी कालः पृथक्द्रव्यमिति सिद्धान्तः । 'अनादिर्भगवान् कालो नान्तोऽस्य द्विज विद्यते'[358] इति विष्णुपुराण इव पञ्चरात्रेऽपि लक्ष्मीतन्त्रे कथ्यते-अचित् त्रैगुण्यमित्युक्तं कीदृक् कालोऽपरः स्मृतः ।[359] इति शक्रेण पृष्टा हि श्रीराह-'अचिदंशोऽपरः कालः त्रैगुण्यमपरं स्मृतम्'[360] इति ।

एवं चिदचिदीश्वररूपतत्त्वस्थितिः श्रीमतो नारायणस्यैवेश्वरत्वं चिदचिद्विशिष्टस्य तस्यैव जगत् प्रति अभिन्ननिमित्तोपादानत्वं च पञ्चरात्राभिमतं प्रत्यपादि ।

---

356. छा. 6.21
357. प. 2.49
358. वि.पु 1.2.26ab
359. ल.त. 5.24cd
360. Ibid. 5.25ab

परमहितम्

अथ हितम् । पाद्मादौ ज्ञानपादे तत्त्वज्ञानमुत्पादितवति योगपादो द्वितीयः क्रमः । तत्र चित्तस्य विषये वैयाकुलीराहित्येन बन्धनं योग इति सामान्येन लक्षणमुक्त्वा ज्ञानयोगकर्मयोगभेदेन द्वेधा विभज्य श्रेयसि ध्येयेऽर्थे चित्तबन्धनं प्रथमं विहितेषु कर्मसु चित्तबन्धनं कर्मयोग इति व्युत्पाद्य-

यस्योक्तलक्षणे योगे द्विविधेऽवस्थितं मनः ।
स याति परमं श्रेयो मोक्षलक्षणमञ्जसा ।।[361]

इत्युभयसाध्यो मोक्ष इत्युक्तम् । एवं द्विविधस्यावश्यकत्वकथनात् मुख्यामुख्यरूपेणान्यतर-साध्यत्वं मोक्षस्य नेष्टमिति सिद्धम् । अत्राविशेषात् समप्रधान्यमिति केचित् । अर्चासमाराधनप्राधान्यात् पञ्चरात्रस्य वैखानसस्य च क्रियांशप्राधान्यं केचित् रोचयन्ते । औपनिषदसिद्धान्तविरोधे मानाभावात् कर्माङ्गकयोगसाध्यो मोक्ष इति विशिष्टाद्वैतिनः । उपरि यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयो विशदं वेदिताः । देहान्तर्गता-वयवानां विवेचनं प्राणायामो नाडीशुद्धिरित्यादिकं योगशास्त्रतोऽधिकमत्र वेद्यते ।

अहं ब्रह्मास्मीत्येतदर्थः

यत्तु अन्ते समाधौ,

अहमेव परं ब्रह्म तदिति ध्यानमास्थितः ।
स्थाणुभूतो दृढः शश्वत् विषयान् नावबुद्ध्यते ।।[362]

इति यत् जीवब्रह्मैक्यानुसंधानमुक्तम्, तदिदं श्रीभाष्यदर्शितरीत्या शरीरात्मभावेनैवोपपाद्यम् । जीवब्रह्मभेदे सति ऐक्यस्याऽरोपपक्षे मोक्षासंभवात् । अतत्त्वज्ञानं हि तत् । न केवलमत्र, इज्याघट्टेऽपि पाञ्चरात्रे देवो भूत्वा देवं यजेतेत्युच्यते । भूतशुद्धिरूपसंस्कारे प्रवृत्तो

---

361. पा. यो. 1.6
362. Ibid 5.18

देहादिकं विलाप्य जीवं भगवत्पादारविन्दे संयोज्य सात्त्विकदेहमुत्पाद्य, तत्र प्रवेश्य भगवत्पादारविन्दनिष्यन्दिना दिव्यतीर्थेन स्नापयित्वा भगवद्दास्यलक्षिततया देहं भावयन् देवो भूत्वा देवं यजतीत्युक्तौ तत्र पूर्वोत्तरांशद्वयविरुद्धं देवैक्यं घटताम्। न हि तावता स देवो भवति। भूतशुद्धेः प्रागिव पश्चादप्यविशेषात् कोऽयमिदानीं देहभावः। न चैक्यापन्नस्य भेदगर्भ आराध्याराधकभावः। अतो देवाराधनार्हत्वापादकशुद्धदेहवत्त्वादिरूपदेहभावो विवक्षणीयः। यद्वा देवो भूत्वा देवान्तर्यामिको भूत्वेत्यर्थः। देवाधीनस्वरूपस्थितिप्रवृत्तिको भूत्वेति यावत्। स्वशेषभूतेन मया स्वस्मै स्वप्रीतये स्वयमेवकारयतीति सात्त्विकत्यागरूपानुसंधानयुक्तो भूत्वेत युक्त भवति। अतस्तद्रीत्या अहं ब्रह्मास्मीत्यनुसंधानं ब्रह्मसूत्रनिर्धारितापृथक्सिद्धिरूपविभागविषयकमेव युक्तम्। 'अविभागेन दृष्टत्वात्'[363] इति च ब्रह्मसूत्रम्। अन्यादृशानुसंधानं च श्रुत्यैव निषिद्धम्। 'योऽन्यां देवतामुपास्ते अन्योसावन्योऽहमिति, न स वेद'[364] इति क्षणमपि स्वात्मानं स्वतन्त्रं ग्रहीतुमनिच्छतां तत्त्वनिष्ठानां पृथगनुसंधानमसद्यमेव भवेत्। ध्यानातिरिक्तकालेऽपि प्राहुः 'न देहं न प्राणान्'[365] इत्यादि।

विशिष्टग्रहणप्रवृत्त्यौचित्यम्

अत्रेदमाकूतम्। यथा वस्तु वर्तते तथा तद्दर्शकत्वं प्रमाणानां स्वभावः। आधाराधेययोर्द्वयोर्ग्रहणे आधाराधेयभावेन सह ग्रहणमेव संपूर्णग्रहणम्। यत्तु मानमाधेयमात्रमाधारमात्रं वा गृह्णाति, नोभयम्, तत्रैकस्यैव ग्रहणं भवति, यथा घ्राणेन गन्धः, रसनया रसः, तत्र तयोर्द्वयग्रहणसामर्थ्यात्। यथा चक्षुषा रूपविशिष्टवस्तुग्राहिणाऽपि न गन्धादेर्ग्रहणम्, तत्र तस्यायोग्यत्वात्। उभयग्राहकं प्रमाणं तु सहाधाराधेयभवेनोभयमेव गृह्णाति। यथा चक्षुषा विप्रः शुक्लो वक्तीति विप्रत्वशुक्लत्व वक्तृत्वरूपजातिगुणक्रियाविशिष्टमेव द्रव्यम्। एवं प्रत्यक्षानुभूतविशिष्टपदार्थवाचको प्रादिशब्दोऽपि जात्यादिविशिष्टधर्मिवाचीति शब्दप्रमाणमपि विशिष्टग्राहि। जातिव्यक्त्योर्गुणगुणिनोः क्रियाक्रियावतोरिव

363. ब्र.सू. 4.4.4
364. बृ. 1.4.10
365. यामुनमुनिभिः विरचिते स्तोत्ररत्ने sl. 57

शरीरात्मनोरत्याधेयाधारभावोऽस्ति । अथापि तदुभयं प्रत्यक्षेण न गृह्यते, आत्मनोऽप्रत्यक्षत्वात् । ऐन्द्रियकप्रत्यक्षयोगेऽपि योगप्रत्यक्षं मुक्तिकालिकप्रत्यक्षं चोभयग्रहणसामर्थ्यात् विशिष्टमेव गृह्णीयात् । उभयग्रहणयोग्यतायां सत्यामेकमात्रग्रहणमसंभावितम् । तदेवं जीवात्मपरमात्मनोर्मुक्तिकालभाविप्रत्यक्षं विशिष्टरूपेणोभयग्राहकं लिप्सुर्मुमुक्षुः वैदिकशब्दानां विशिष्टरूपेणैव वस्तुबोधकत्वात् तथैव बुद्ध्वा तथैव योगेन ग्रहीतुमभ्यस्यातीति अहं ब्रह्मास्मीति विशिष्टग्रहणमेव तेनेप्यत इति । योगबलात् सर्वग्राहिणश्च सर्वविशिष्टमेव परमात्मानमेवं गृह्णीयुः पश्चाच्च तथैव पश्येयुरिति ।

कर्मणोऽङ्गित्वायोगः

द्वितीयः कर्मयोगश्च नात्र पादे न्यरूपि । नूनं चर्यापादे यद्वक्ष्यमाणं तदेव तदिति ज्ञास्यत इति । एवं च यावदायुषं भगवन्तमाराधयन् मुच्यत इति चर्यापादतो ज्ञानेऽपि न केवलचर्यया किं तु समाधिसमुच्चितयेति अवश्यमङ्गीकर्तव्यम् । तत्र समप्रधानभावोऽपि कैश्चित् वेदान्तिभिरिष्टः । अथापि ज्ञानात् मोक्षस्यैव भूयो वाक्यसिद्धत्वात् 'नान्यः पन्था अयनाय विद्यते'[366] इति उपायान्तरनिषेधाच्च ज्ञानात् पार्थक्येन वा ज्ञानसमसमुच्चयेन वा कस्यचिदुपायत्वं न युक्तम् । यद्यपि श्वेताश्वतरे 'नान्यः पन्थाः' इति वाक्यं 'तमेव विदित्वाऽतिमृत्युमेति'[368] इति वाक्यपूर्वकं विदितात् महापुरुषादेव मृत्युतरणम्, नान्यस्मादिति महापुरुषातिरिक्तसिद्धोपायनिषेधपरमिति स्यात् । अथापि विदित्वेति वेदनस्याप्युक्तेः वेदनविषयत्वविशिष्टतदधीनो मोक्षः नान्याधीन इति वदत् भगवदतिरिक्तं साध्योपायं च प्रतिषेधतीति युक्तम् । अत एव 'तमेवं विद्वानमृत इह भवति, नान्यः पन्थाः'[369] इति पुरुषसूक्तैकरस्यम् । अतो न समसमुच्चयः । अत एव वेदनस्याङ्गत्वं कर्म प्रति इत्यपि न भवति । अङ्गित्वे च कर्मण इष्यमाणे कस्य कर्मण इति विवेचनीयम् । नित्यनैमित्तिक-

---

366. श्रा. 3.12.27
367. Ibid.
368. श्वे. 3.8
369. श्रा. 3.12.17

यज्ञदानतप आदेरिति चेत्-तस्य वेदनाङ्गतया 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन'[370] इत्यादिवचनैर्विधानमिति तद्विरोधः । किं च कस्यचिदङ्गत्वे वक्तव्ये कतरस्याङ्गत्वमिति विचारे यदि वेदनमङ्गं स्यात् तर्हि तस्य प्रधानभूतं कर्म प्रति कथमुपकारकतेति विचार्यम् । न च कर्मयोगे घटकस्य ज्ञानांशस्य यथा तत्रोपयोगः तथेति शङ्क्यम् । तस्य हि ज्ञानस्य ध्यानरूपत्वाभावात् देहात्मविवेकादिरूपतया वैराग्यसात्त्विकत्यागादिहेतुतयोपयोगः, न ह्यत्र ध्यानात्मकज्ञानस्योपयोगः संभवतीति । अथाद्दष्टविधयोपयोग इति सिद्धं गौरवम् । कर्मणामङ्गत्वे भास्करादिपक्षत्यागेन न संनिपत्योपकारकतयाऽङ्गत्वम्, किं तु भक्तिनिष्पादनरूपद्वारैवाङ्गत्वमिति सूपपन्नता । अत एवोच्यते, 'तपसा कल्मषं हन्ति विद्ययाऽमृतमश्नुते'[371] इति। अथालयप्रतिष्ठापनाचार्याराधनादिकैङ्कर्याख्यं कर्मवाङ्गि भवतु इति चेन्न, तत्रापि ध्यानस्याङ्गित्वं संभवत् किमित्युपेक्ष्यम् । गीतं हि (12) "अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव"[373] इति भक्तियोगानुष्ठानाशक्तस्य आलम्बनसंशीलनरूपोऽभ्यासः कार्यम्, तदशक्तस्यार्चाविषयकविविधभोगप्रदानादिरूपकर्मानुष्ठानमिति । यज्ञादानरूपकर्मादिवत् अर्चाराधनमपि भगवत्प्रीतये क्रियमाणं पापाप्नोदनद्वारा चित्तशुद्धये योगानिष्पत्तये च भवति । निष्पन्नध्यानस्यात्यर्थप्रियभगवदनुभवपरीवाहरूपतया संकीर्तननमस्कारादिवत् भजनरूपाभ्यन्तर्गतमपि भवति । तदुक्तं गीताभाष्ये "मन्मना भव मद्भक्तो मद्याजी"[374] इत्यत्र । तत्र प्रायः समाराधनस्याभ्यासाद्यापादकत्वमेवानुभविकमिति ध्यानस्य दृष्टद्वारा कर्माङ्गत्वाभावात् कर्मगततया ध्यानाङ्गत्वस्योपपादितत्वात्, अङ्गमाराधनम्, अङ्गी ध्यानयोगः इत्येव ज्यायः । एवं च वेदान्तैकरस्यं पाञ्चरात्रस्य ।

योगप्राधान्ये पञ्चरात्रम्

योगस्य प्राधान्यं मनसि निधायैव पाञ्चकालिकधर्मानुष्ठानोपदेशे योगस्य शिरस्तया

---

370. बृ. 4.4.22
371. मूलं
372. ईशा. 11
373. भगी. 12.10
374. Ibid. 9.34

निर्देशः। चरमदशायां वागादिष्विन्द्रियेषु उपशान्तेषु मनोमात्रे व्याप्रियमाणं यं भावं स्मरति, तमेति पुरुष इति गीयते,

'यं यं वाऽपि स्मरन् भावं त्यजत्यन्ते कलेवरम्।
तं तमेवैति कौन्तेय! सदा तद्भावभावितः' ॥[375]

इति। अतोऽन्तिमत्वं प्रत्ययस्यैव, न तु बाह्यव्यापारस्येति तदनुरोधित्वात् फलस्य प्रत्ययस्यैव प्राधान्यं, कर्मणाम् अङ्गत्वं च युक्तम्। अत एव

अथ वृत्तिमिमां शश्वत् कुर्वाणो विगतव्ययः।
विसृज्य देहं प्राप्नोति तद्विष्णोः परमं परम् ॥[376]

इति वचनात् वृत्तेश्चर्यायाः विष्णुपदप्राप्तिहेतुत्वमिति न मन्तव्यम्। तस्यापि, "मामनुस्मर-युध्य च" इत्युक्तन्यायेन भगवद्ध्यानगर्भवृत्तिपरतत्वात् अन्ते भगवद्विषयप्रत्ययसंभवाभिप्रायकत्वात्।

अशक्तमपि च स्मर्तुमन्ते पूर्वकृतं स्मरत्।
स्वयमेव परं धाम स्वयं नयति माधवः ॥[378]

इति माधवः स्वयमेव स्मरन् स्वयमेव नयतीत्युक्तमिति चेत् तदेतत् योगासमर्थप्रपन्नविषयम्। तत्रापि "मदीययैव दययाऽतिप्रबुद्धो मामेवावलोकयन्[379]" इति भगवत्कृपाबलादप्रयत्नसाध्यो भगवद्विषयकोऽन्तिमप्रत्ययो भवत्येवेति यं यं वापीति गीतानुरोधी सिद्धान्तः। योगाशक्तास्तु प्रपत्तिनिष्ठाः पञ्चकालपरायणाः पञ्चमे योगानुष्ठानसमये क्षेत्रज्ञं ब्रह्मणि यथाशक्ति न्यस्यन्तीत्यन्यदेतत्। तावता मुख्ययोगस्योत्तमाधिकारिक्रियमाणस्य प्राधान्यं न हीयते। वैखानसाः यावदायुषं भगवाद्आराधनचर्ययैव भगवत्प्राप्तिं मन्यन्ते। तत्ध्यानयोगाशक्तानाम् अनुकल्प—

---

375. भ.गी. 8.6
376. भा.सं. 4.78
377. भ.गी. 8.7
378. भा.सं. 4.80
379. शरणागतिगद्यम्

विधयेति स्यान्नाम । अत एव मरीचिना (विमाना 4-1) "सर्ववैदिकाचारास्तपोयज्ञाश्च विष्णुरजाविधेर्भेदः" इति वैखानससूत्रं प्रमाणीकृत्य विष्ण्वाराधनत्वेन सर्वानुष्ठानं प्रपञ्च्य (प. 89) अष्टाङ्गयोगमुपदिश्य (प. 100), अथ चान्त्यकाले सर्वद्वाराणि संयम्येत्यादिना योगेन प्राणत्यागः प्रतिपादितः ।

"एवं सदा ध्यातुमशक्तत्वात् प्रतिमादिषु पञ्चमूर्तिनामभेदैः समावाह्य (गृहे देवायतने वा) अभ्यर्चयेत्"[380] इत्युक्तम् । पाञ्चरात्रे तु योगशास्त्रविषये प्रपत्तिरूपस्योपायस्य प्रपञ्चितत्वात् इतरनिरपेक्षया प्रपत्त्यैव मोक्ष इति यावदायुषं भगवदाराधनं मध्यमवृत्तिपरिपालनेन कैङ्कर्यभूय भगवत्तोषणमात्रमिति न समाराधनस्य साक्षान्मोक्षोपायत्वप्रसक्तिः । उक्तं च लक्ष्मीतन्त्रे "उपायापायसंत्यागी मध्यमां वृत्तिमास्थितः" इति । वैखानसानामपि पञ्चसंस्काररूप-दीक्षाग्रहणे विवादे सत्यपि श्रुतिस्मृतीतिहासपुराणादिप्रसिद्धायां प्रपत्तौ विवादविरहात् योगानधिकारिभिः यावदायुषं निर्विघ्ननिरवद्यपुष्कलभगवदाराधनानुष्ठानासामर्थ्यं चिन्तयद्भिः प्रपत्तिरेवादर्तव्या भवतीति समाराधनप्रधानकर्मानुष्ठानं फलात्मकं कैङ्कर्यरूपमेव भवितुमर्हति । अन्यथा–

भक्त्या परमया वाऽपि प्रपत्त्या वा महामते ।
प्राप्योऽहं नान्यथा प्राप्यो मम कैङ्कर्यलिप्सुभिः ॥[382]

इति वचनविरोधश्च । अनेन भक्त्यतिरिक्तमोक्षोपायस्य प्रपत्त्यतिरिक्तमोक्षोपायस्य च निषेधात् । वैखानसविजयेऽपि तैः प्रपत्तेः स्वीकृतत्वपक्षोऽस्माभिरुपन्यासि ।

प्रपत्तेरुपायत्वम्

का नाम प्रपत्तिः? तदङ्गानि कति? कतिविधा सा? किमसकृत् कर्तव्या? उत सकृत्? सा किं मुख्योपायः? आहो अनुकल्पः? किं भक्तिवत् संचितमात्रस्य निवर्तिका उत प्रारब्ध-

---

380. वि.क. 100 p. 520
381. ल. त. 17.58cd
382. रहस्यत्रयसारे चरमश्लोकाधिकारे विष्णुतत्त्वतः उद्धृतम् ।

स्यापि? किं मोक्षार्थमेव? अथ वाऽन्यार्थमपि? किं त्रैवर्णिकमात्रस्याधिकारः? किं वा सर्वस्य? किं स्वयंकृतैव फलं दिशेत्? परेण कृतापि वा? केऽस्या मन्त्राः ? किमुख्योपायाधिकार्यपि प्रपत्तावधिक्रियते? आहो न? अपेक्षितकाल एव फललम्भकत्वे उत्तराघनिवृत्तिः कथम् ? वर्णाश्रमधर्माणाम् अनुष्ठानमपेक्षितं न वेत्यादिरत्र विचारः पाञ्चरात्रग्रन्थेषु लक्ष्मीतन्त्रे अहिर्बुध्न्य-भारद्वाजादिसंहितासु अतीव विस्तरेण प्रत्यपादीति विशदमेव विशिष्टाद्वैतसंप्रदाय-ग्रन्थेषु ।

पाद्मवचनार्थः

पाद्मे क्रियापादोपक्रमे-

अज्ञानिनः च भक्तानां गतिं चापीच्छतां नृणाम् ॥

येनोपायेन निर्वाणफलं स्वर्गादि चेतरत् ।

भवत्युपायं तमृजुमुपदेष्टुं त्वमर्हसि ॥[383]

इति प्रश्नदर्शनात् समाधानोक्तमर्चनं मोक्षादिसाधनमेवेत्यवगम्यत इति चेन् - किमिदं वरुण-स्नानाशक्तस्य मन्त्रस्नानादिवत् साक्षात् फलदायकम् उत 'अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव[384] अथैतदप्यशक्तोऽसि[385].... सर्वकर्मफलत्यागं ततः कुरु:'[386] इत्यादाविव मुख्योपायानु-ष्ठापनमुखेनैव फलहेतुरिति विवादे, द्वितीयः पक्ष एव गृह्यते, "नान्यः पन्थाः"[387] इत्याद्यविरोधाय । अतः इतरेषां कर्मणामिवार्चनाव्यापारस्यापि ध्यानशेषत्वमेव, जन्मान्तरे ध्यानप्रापकत्वं च यावदायुषं कृतस्याप्रपन्नविषये भवति ।

383. पा.क्रि. 1.2cd, 3ab
384. भ.गी. 12.10ab
385. Ibid. 12.11a
386. Ibid. 12.11cd
387. श्वे 3.12.17

सकलनिष्कलभेदः

अस्य च ध्यानस्य निष्कलसकलभेदेन द्वैविध्यं, सकले निर्गुणसगुणभेदेन द्वैधं च मरिचिविमानार्चनाकल्पे वैखानसे वर्ण्यते । नैतावता वस्तु निष्कलं निर्गुणमिति सिद्ध्यति, ध्यानस्यैव तथात्वोक्तेः । श्रीविष्णुपुराणे (6-7) प्रथमतो मूर्तरूपध्यानं विधाय तत्र तद्दिव्यमङ्गलविग्रहसर्वावयवविभूषणायुधादीनां विषयत्वमुपवर्ण्य तद्विषयकधारणां स्थितिगमनादिसमयेऽप्यनुवर्तमानां संपाद्यामुपदिश्य, ततः क्रमेण आयुधरहितं भूषणरहितं ध्येयमिति, अवयविमात्रं ध्येयमिति परमात्मस्वरूपविषयकसमाध्यर्थसोपानरूपेण ध्यानभेदा उक्ता इत्येतावता वस्तुनो वैविध्य न भवति यथा, तथा प्रकृतेऽपि । विशदं च तत्रैव ग्रन्थे, परमात्मस्वरूपविषयकत्वात् सकलत्वम्, देवीभूषणायुधपरिजनादिविशिष्टध्याने सगुणत्वम्, अन्यदा निर्गुणत्वम्, तस्मात् । सत्त्वरजस्तमोरूपप्राकृतगुणरहितं तदधीनरागद्वेषादिजीवासाधारणहेयगुणरहितम् अत एवाखिलहेयप्रत्यनीकम् अनन्तनित्यनिरवद्यनिरतिशयकल्याणगुणं तादृशाद्भुतदिव्यमंगलविग्रहविशिष्टमेव सर्वदा परमात्मस्वरूपं परवासुदेवाख्यमुपास्यमुपेयमुपचरणीयं चेति स्थितो ज्ञानयोगाख्यपादद्वयार्थः ।

क्रियाचर्यासंग्रहः

एतावता तत्त्वहितपुरुषार्थेषु वेदान्तपाञ्चरात्रयोरैकमत्यं प्रादर्शि । अथ पाञ्चरात्रप्रधानार्थः प्रतिमाप्रतिष्ठानतत्समाराधनरूपः क्रियापादचर्यापादप्रमेयः संगृह्यते । अस्यार्थस्यात्र विशेषरूपेण प्रतिपादनेऽपि नास्यानौपनिषदत्वम्, परव्यूहविभवार्चाहार्दरूपाणामुपनिषत्स्वपि व्यञ्जनात् ।

रूपपञ्चकस्यौपनिषदत्वम्

अम्भस्य पारे भुवनस्य मध्ये ।
नाकस्य पृष्ठे महतो महीयान् ।

शुक्रेण ज्योतींषि समनुप्रविष्टः
प्रजापतिश्चरति गर्भे अन्तः ॥[388]

इति मन्त्रो हि पूर्वार्धे क्रमेण व्यूहविभवपररूपाणि प्रतिपादयति। 'यमन्तः समुद्रे कवयो वयन्ति'[389] इति चोपर्याह। अनिरुद्ध एव समुद्रस्थितः। न केवलं क्षीरसागरे, सृष्टि-प्राग्भाविनि एकोदके च व्यूह एव नाभ्यां ब्रह्माणं च जनयति। विभवानां रामकृष्णादीनां भुवनमध्यविहरणं विस्पष्टम्। नाकस्य पृष्ठे परो वासुदेवः। 'यत्तत् कवयो वेदयन्ते'[390] 'सदा पश्यन्ति सूरयः:'[391] "परात्परं पुरुषमुपैति दिव्यम्" "अपराजिता पूः"[393] "यत्र देवाना-मधिदेव आस्ते"[394] "आदित्यवर्णं तमसः परस्तात्"[395] 'ब्रह्मविदाप्नोति परम्'[396] 'तत्पुरुपोऽमा-नवः स एनान् ब्रह्म गमयति'[397] इति नानोपनिषन्निरूपितमेव तत् परं रूपम्। अथोत्तरार्धे, शुक्रेण दिव्यमङ्गलविग्रहेण, ज्योतींषि-सुवर्णरजतताम्ररूपलोहप्रतिमाः समनुप्रविष्ट इति अर्चारूपकथनम्। 'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्'[398] इति गीतोक्तरीत्या, बिम्बाकृत्यात्मना बिम्बे समागत्यावतिष्ठते'[399] इत्याह पाञ्चरात्रम्। यादृशाङ्गप्रत्यङ्गादि-परिकल्पनेन प्रतिमां निर्माय यथाविधि प्रतिष्ठां कुरुते, तादृशयङ्गप्रत्यङ्गविशिष्टतया आत्मनो रूपं तदा विधाय तत्र प्रविश्य नीरक्षीरवदपृथग्भूय विराजते भगवान्। अथन्तिमपादेन शरीरान्तश्चरति प्रजापतिरिति अन्तर्यामिरूपकथनम्। इदं च सर्वोपनिषत्प्रसिद्धम्।

---

388. महाना 1.1
389. Ibid. 1.3
390. ईक्षतिकर्माधिकरणे (ब्र.सू. 1.3.4) श्रीभाष्ये उद्धृतम्।
391. ऋ. 1.22.20
392. मु. 3.28
393. आकरो मृग्यः
394. आकरो मृग्यः
395. श्वा. 3.12.16
396. तै.उ. 2.1
397. छा. 5.10.2
398. भ.गी. 4.11ab
399. सा. 6.22

"यदा[400]पश्य: पश्यते रुक्मवर्णम्", "अमृतो हिरण्मय:"[401], स यश्चायं पुरुषे, 'यश्चासावादित्ये'[402] नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा[403]" तस्या: शिखाया मध्ये परमात्मा व्यवस्थित:"[404] इत्येवम् ।

व्यापिनोऽपि क्वचिद्विशेष:

वैखानसविजये अस्मदुक्तरीत्या शास्त्रतो जीवानां भगवदात्मकत्वं भगवद्धार्यत्वशेषत्वनियाम्यत्वरूपं भगवतो निरुपाधिकशेषित्वं च जानन्त: प्राज्ञा: तद्गतातिशयाधानमेव स्वकार्यम्, अन्यथा शेषत्वं रक्षितं न भवतीति निश्चित्य अनन्यार्हशेषत्वाध्यवसायदार्ढ्येन 'सुहृदं सर्वभूतानाम्'[405] इत्युक्तरीत्या परमसुहृदं मित्रं मित्रवत् संप्रीणयितुमिच्छन्ति । तत्र 'आनुकूल्यमिति प्रोक्तं सर्वभूतानुकूलता'[406] इत्युक्त्या सर्वप्राण्यनुकूलत्वाभावे भगवदनुकूलत्वं प्रतिष्ठितं न भवतीति विवेकेन सर्वान्तर्यामिणं सर्वत्रैवाराधयितुं यद्यपि प्रवर्तेत, अथापि सर्वत्राराधनं सर्वानुकूल्यकरणं चैकैकस्याशक्यम् । अर्जुनश्च 'केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया'[407] इति विशेषव्यक्ती: जिज्ञासते । भगवानपि 'अहमात्मा गुडाकेश सर्वभूताशयस्थित:'[408] विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्'[409] इति सर्वत्र स्थितिं वदन्नेव 'हन्त ते कथयिष्यामि विभूतीरात्मन: शुभा:[410]' इति कांश्चिदेव निर्दिशति, तत्रापि प्राधान्यत इति

---

400. मु 3.13
401. तै. 1.6
402. Ibid 2.8
403. महाना 11.12
404. Ibid. 11.13
405. आकरो मृग्य:
406. ल.त. 17.66ab
407. भ.गी. 10.17cd
408. Ibid. 10.20ab
409. Ibid. 10.42cd
410. Ibid 10.19ab

सर्वकथनाशक्यतामाह । एवं स्थिते यत्र यत्र भगवन्तमाराधनीयं प्रमाणानि दर्शयन्ति तदतिरिक्तस्थले अनुकूल्यहानेर्योगेऽपि आराधनीयता नावकाशं लभते ।

अर्च्यस्थानानि

तत्र श्रीभागवते अर्चनस्थानानि,

अर्चा यां स्थण्डिलेऽग्नौ वा सूर्येवाऽ सुहृदि द्विजे ।
द्रव्येण भक्तियुक्तोऽर्चेत् स्वगुरु माममायया ॥[411]

इति। अत्र प्राधान्यादर्चायाः प्रथमं निर्देशः । अर्चा चाष्टधा विभक्ता-

शैली दारुमयी लौहो लेप्या लेख्या च सैकती ।
मनोमयी मणिमयी प्रतिमाऽष्टविधा स्मृता[412] ॥

इति । मरीचिना, अग्नावर्चनममूर्तार्चनम्, अन्यत्र मूर्तार्चनमिति विभागः कृतः । अर्चाविषये ऋग्वेदश्च प्रमाणीकृतः- प्रवः पान्तमन्धसो धियायते महे शूराय विष्णवे चार्चत । या सानुनि पर्वतानामदाभ्यामहस्तंस्थतुरर्वतेव साऽधुना[413] इति । शौनकोऽपि विष्णुधर्मे श्रुतिमिमामुदाजहार । एतदर्थविचारो वैखानसविजये द्रष्टव्यः । श्रीविष्णुतिलके-

प्रतिष्ठारहिते स्थाने धर्मद्यावाह्य पूजयेत् ।
कुम्भेऽग्नौ स्थण्डिले कूर्चे यत्र कुत्रापि चाऽन्यतः ॥

आवाह्य पूजनं कुर्यात् उद्वासस्तु क्रियावधौ ।
सालग्रामशिलायां नाऽऽवाहोद्वासनमुच्यते ॥

योगपीठं प्रकल्प्यैव देवतावाहनम् चरेत् ।
अस्ति चेत् जङ्गमं बिम्बं नास्ति चेत् ध्रुवबिम्बकम् ॥

---

411. भा. 11.27.9
412. Ibid. 11.27.12
413. ऋ. 1.155.1
414. वि.ति. 3.33ab, 337-340

हृदम्बुजात् देवदेवमावाऽह्यार्चनमिष्यते ।
पुनरुद्वासनं चैव कारयेन्मानसे ततः ॥

इति सर्वत्रावाहनं व्यधायि । सालग्रामे तन्निषेधः,

शालग्रामशिलायां तु नित्यं संनिहितो हरिः[415]

इति नित्यसांनिध्यातिशयात् । शाङ्करभाष्ये च हृदयसालग्रामयोस्तौल्यं दर्शितम्, ईश्वरस्तत्र हृदयपुण्डरीके निचाय्यः द्रष्टव्य उपदिश्यते यथा शालग्रामे हरिः, तत्रास्य बुद्धिविज्ञानं ग्राहकम् । सर्वगतोऽपीश्वरस्तत्रोपास्यमानः प्रसीदति[416] इति ।

प्रतिष्ठातत्त्वम्

पाद्मे च-

'व्यापिनो देवदेवस्य प्रतिष्ठा कीदृशी मता'[417]

इत्याशङ्क्य

'सर्वस्य भूतजातस्य ह्यन्तरात्मा स्थितोऽपि सन् ।
मन्त्रवीर्याच्च माहात्म्यात् स्थापकस्य गुरोऽस्तथा ॥
प्रतिमायां प्रकर्षेण संनिधत्ते हरिः स्वयम् ।'[418]

इति समाहितम् । प्रकर्षेण संनिधापनं प्रतिष्ठापनम् ।

प्रकर्षश्च दिव्यमङ्गलविग्रहसंबन्धात् । अङ्गप्रत्यङ्गप्रतिसद्भावात् । कूर्चस्थण्डिलालेख्याद्यपेक्षया बिम्ब एव हरेः प्रकृष्टः प्रवेशः । परव्यूहविभवाद्याकारा हि अङ्गपौष्कल्यवन्त इति तथैव तत्संनिधानमत्रैव । अभिषेचनालंकरणनानाविधभूमिकानुरूपपरिष्करणादिकमत्रैव लब्धास्पदमिति इयमेव विशिष्यते ।

---

415. आकरो मृग्यः
416. ब्र.सू. 1.2.7 शां.भा
417. पा.क्रि. 26.1
418. Ibid. 26.2, 3ab

आपीठान्मौलिपर्यन्तं पश्यतः पुरुषोत्तमम् ।
पातकान्याशु नश्यन्ति किं पुनस्तूपपातकम्[419] ।

इत्युक्तरीत्या पूर्णावयवचाक्षुषदर्शनं न सालग्रामादौ । अत एवोक्तं समूर्तार्चने-

समूर्ता त्रिविधा ज्ञेया बिम्बकूर्चजलेष्वथ ।

....

उत्तमा बेरपूजा स्यात् मध्यमं कूर्चपूजनम् ।
अधमं जलपूजेति प्राह पूर्वं पितामहः[420] । इति ॥

अर्चाप्रकृतिद्रव्याणि

अत्र प्रकृतिद्रव्याणि तावत्

रत्नं लोहं शिला मृच्च दारुस्फटिक एव च ।
षड्द्रव्याणि प्रकृतयो यन्माया: प्रतिमाः स्मृताः ॥[421]

इत्युक्तानि ।

सुवर्णं रजतं ताम्रं त्रिविधं लोहमिष्यते ।[422]

इत्युक्तत्वात् लोहान्तरं न ग्राह्यम् । शिला चतुर्विधा शुभ्रा, पाटला, पीता, कृष्णा चेति । विप्रादिवर्णक्रमेणैतद्वर्णक्रमः । उत्तरोत्तरस्य सर्वस्य पूर्वपूर्ववर्णग्राह्यत्वमपीष्टम् । उत्तमशिला-लक्षणमुक्त्वा गर्भवतीनां शिलानामग्राह्यत्वं च प्रपञ्चितं, गर्भवत्त्वचिह्नानि प्रदर्श्य गर्भवर्णभेदेन तत्र जन्तुभेदस्थित्याद्यावश्यकत्वप्रदर्शनेन । शिलासु स्त्रीपुंनपुंसकभेदान् प्रदर्श्य तत्तदुपयोग-प्रकारश्च प्रतिबोधितः । शिलाग्रहणस्थानग्रहणनियमादि च । तथा दारुण्यपि ग्राह्यवर्ज्य-

---

419. शा.स्मृ. 2.16
420. स. 43.29ab, 30
421. पा.क्रि. 26.1
422. Ibid. 26.4cd

विभागः, तदर्थवृक्षग्रहणेतिकर्तव्यतेत्यादिकमुक्तमस्ति ।

बिम्बावान्तरविभागः

बिम्बं च स्थितं, आसीनं, शयानं, यानारूढं चेति चतुर्विधम् । शयानं भोगशयन-योगशयन--संहारशयनसृष्टिशयनभेदेन चतुर्विधम् । यानारूढं च वैनतेयस्कन्धोपर्यासीनमष्टभुजादिरूपम् । त्रिविक्रमविश्वरूपिणोः संस्थानभेदोऽपि वर्णितो विष्णुतिलके । एकमूर्तिमारभ्य पञ्चमूर्तिपर्यन्तप्रतिष्ठाप्रकारः उक्तः पाद्मे क्रि. 18. श्लोकमारभ्य । ततः प्राक् - 'एकमूर्तिर्वासुदेवो यद्वा नारायणः परः'[423] इत्यारभ्य एकादि-द्वादशमूर्तिपर्यन्तगणनां कृत्वा 'चतस्रो विंशतिश्चैव मूर्तयः प्रागुदीरिताः'[424] इति निगमितम् । मरीचिना तु (वि.क. 3) पञ्चवर्णकमूर्तिप्रतिष्ठानमात्रमुक्तम् । नवमूर्तिस्थापने तासु मूर्तिषु कस्याः कुत्र स्थापनमिति दिङ्नियमे नानाप्रकारता पौष्करे (अ. ३३) दर्शिता । अथ बेराणां स्थ पनीयानां सङ्ख्याप्येवं प्रदर्श्यते श्रीविष्णुतिलके-(6 438)-

> कर्मार्चा चोत्सवार्चा च बल्यर्चा च तथैव च ।
> स्नानार्चा तीर्थयात्रार्चा शयनार्चेति षट्क्रमात् ।।[425]

इति । कर्मार्चास्नपनार्चयोभावे मूलबेर एव तत्र कर्तव्यानामाचरणमित्यप्युक्तम् । वैखानसेऽपि कौतुकस्नपनबेरयोरपेक्षया ध्रुवबल्युत्सवबेराणां प्राधान्यं दर्शितम् । श्रीप्रभृतिदेवीनां चक्राद्यायुधानम् अनन्तगरुडविष्वक्सेनसुदर्शनादिमूर्तीनां स्थापनमपि सर्वत्र निरूप्यते । ईदृशप्रतिमानिर्माणस्य मूर्तितदङ्गप्रत्यङ्गसर्वांशतद्वर्णभूषणायुधादिज्ञानसापेक्षत्वात् तद्व्याजेन सर्वमूर्तिसंबन्धिसर्वांशवैशद्यं पञ्चरात्रग्रन्थेभ्यो भवतीति महानयं विशेष उपासकापेक्षितः । लोहमयमृण्मयबिम्बनिर्माणप्रकारोपन्यासश्च महत्शिल्पनैपुण्यं गमयति । न केवलं बिम्बानाम्, तत्स्थापनालयविनानाधिमण्डपनृत्तमण्डपास्थानमण्डपयागशालाकुण्डपाकस्थानप्रकारगोपुरध्वजस्त-म्भादीनां विषये वक्तव्याः सर्वेऽप्यंशाः साङ्गोपाङ्गं शिक्ष्यन्ते ।

---

423. पा. क्रि. 18.56cd
424. Ibid. 15.65cd
425. वि.ति. 6.438

स्थानभूतग्रामादिभेदः

आलयभूपरीक्षणं तदर्थग्रामादिनिर्माणप्रकारः, तत्र तत्र प्रारम्भे नवमणिधान्यादिसाध्यो गर्भन्यासः, ग्रामादिषु वर्णानुलोमप्रतिलोमजातिस्थानानि च सर्वविधसंपत्त्यर्थदृष्टादृष्टकर्मसंपाद्यतया संदर्श्यन्ते। ग्रामादिभेदो वैखानसे इतोऽधिकं निर्दिश्यते, यथा-'अथ ग्रामादिवास्तुभेदः ग्रामाग्रहारनगरपत्तनखर्वटकुटिकसेनामुखराजधानीशिबिरा इति भेदा भवन्ति। विप्राणां सभृत्यानां निवासो ग्रामः, विप्रमुख्यानामग्रहारः। अनेकजनसंबन्धमनेकशिल्पिकक्रयकविक्रयाधिष्ठितं पत्तनम्। उभयसंमिश्रं खर्वटम्। सपरिवारकैकग्रामणीकं कुटिकम्। सर्वजातिसमाकीर्णं नृपवेश्मसमायुक्तं सेनामुखम्। चतुरङ्गसमाकीर्णा नृपतद्भृत्यजुष्टा राजधानी। नृपसेनाचमूनाथनिवेशनं शिबिरम्'[426] इति। अथ दण्डककरीदण्डकादिभेदेन ग्रामाग्रहारविन्यासभेदान् प्रदर्श्य तत्क्षेमकरतया यथायथं विष्णुरुद्रादिनानादेवतास्थापनार्थस्थानानि च निर्दिश्य तत्रैव विमानार्चनाकल्पे यदुक्तम्, 'अभ्यन्तरे तान्त्रिकेण विधिनार्चयेत्, न वैदिकेन'[427] इति तदप्यवधेयम्। तेन वैखानासतिरिक्तोऽर्चनमार्गोऽपि तदिष्ट इति। पाद्मे (क्रि. 2) ग्रामाग्रहरयोरैक्यमुक्त्वा दण्डकादिभेदेनाष्टधा ग्रामविभागः कृतः।

मूर्त्यष्टकम्

मूर्तिप्रसङ्गे विष्णोरेवाष्टौ विलक्षणमूर्तयो विभिन्नफलोद्देशेन प्रतिष्ठाप्या उक्ताः। पाद्मे (क्रि. 16) हस्तसंनिवेशायुधभूषणादौ भेदः, विभिन्नमहापुरुषार्चितत्वमिति च भेदः। क्रमेण ब्राह्मी, प्राजापत्या, वैष्णवी, दैवी, आर्षी, मानुषी, आसुरी, पैशाची इति। आसां क्रमेण भृग्वादिना, सनत्कुमारादिना, नारदादिना, चतुर्मुखादिना सनन्दनादिना मनुष्यैः सामान्यतः असुराधिपत्यादिना, पिशाचादिवशीकारिणा आराधितत्वमुक्त्वा फलभेदश्च क्रमेण दर्शितः। ब्रह्मभूयलाभः, प्रजावृद्ध्यादि, शीघ्रमोक्षलाभः, देवत्वलाभः,

426. वि.क. 3.
427. Ibid.

महर्षित्वादिप्राप्तिः, यशऐश्वर्यलाभः, असुराद्याधिपत्यम्, पिशाचादिवशीकरणं चेति। एवं पाञ्चरात्रोक्तरीत्या असुराधिपत्यपिशाचवशीकरणादिकामा-धिकार्यनुग्रहार्थमासुरपैशाच-मूर्तिग्रहणवत् जटाशिखापरशुसुदर्शनाद्यघटितघटनेनान्यदेवताभक्तजनवशीकारकामवशंवदेन श्रीवेङ्कटेशेन विविधभूमिकापरिग्रहप्रख्यातेन श्रीनिवासेनाद्भुतरूपसंदर्शनेन महदाह्वयदिव्यसूरि-मनःप्रीणनमपि स्थाने इति विभाव्यते। अत्र (63) महदाह्वयदिव्यसूरिसूक्त्यर्थश्चास्मदीय-प्रबन्धरक्षायां विशदः। मानुषीमूर्तिश्चेयं विशिष्य रुक्मिणीबलभद्रप्रद्युम्नानिरुद्धसाम्बचतुर्मुख-वैनतेयासहिता कृष्णमूर्तिरित्युक्तमित्यत्र कर्षणादिप्रतिष्ठान्तक्रियाकलापप्रतिपादके क्रियापादे आचार्यादिकर्तृकहलकरणमन्दिरभूकर्षणे हलवृषभादिजातिवर्णव्यवस्था-निमित्तपरीक्षणकृष्टभूलब्ध-द्रव्यविवेचन होमकुम्भस्थापनादिकमुक्तम्। विघ्ननिवारणपूर्वकं बालगृहनिर्माणं च।

विमानादिवैविध्यम्

आलयश्च शिलामयेष्टकामयदारुमयभेदेन त्रेधा। मृण्मयस्त्वधम इति, तत्र मिश्रिता-मिश्रतभेदश्च। कीदृशं धाम निर्मेयमिति पटादौ विलिख्य निरूप्य द्वितलादिद्वादशतलान्त-भेदेन निर्माणमुक्त्वा अधस्तादुपानाख्यावयवमारभ्य स्थूप्यन्ते उपर्युपरि भागानां नामभेदाश्चा-ष्टादश दर्शिताः। पारमेश्वरे च दशमे अध आरभ्य विमानाग्रपर्यन्तेषु अवयवेषु भगवन्मूर्ति-तदतिरिक्तनानादेवतान्यासः पाद्मादधिकतया प्रपञ्चितः। पाद्मे (क्रि. 8) विमानप्रासाद-शब्दयोः पर्यायतः प्रयोगेण विमानानामनन्तत्वेऽपि कतिपये भेदाः प्रदर्श्यन्त इत्यारभ्य वैजयन्तकादयः शुद्धस्वस्तिकपर्यन्ताः उपपञ्चाशाः भेदाः प्युत्पादिताः। नवमे चाध्याये ग्रन्था-न्तरेष्विसामान्यतो विमानस्य त्रैविध्यं नागर-द्राविड-वेसरभेदेन वृत्तत्वसाश्रत्वाद्यवयवसंनिवेश-विशेषपुरस्कारेणोक्तम्। श्रीपाञ्चरात्ररक्षायां चैषां त्रयाणां विमानानामुत्तममध्यमाधमत्वाभि-प्रायेण सत्त्वरजस्तमवारोपेण व्यवहारः क्वचित् स्थितो दर्शितः। अथ मूर्धेष्टकाविधानस्थूपि-काकीलकलशादिनिर्माणतद्विक्षेपादौ सदाचार्यस्य सावधानत्वं प्रत्यबोधि। नानाविधमण्टप-स्थापनवत् ध्वजस्तम्भस्थापनमप्येवमुक्तम्-

ध्वजस्तम्भः

द्वितीये वा तृतीये वा चतुर्थे वा खगाधिपम् ।
मन्दिराभिमुखं कुर्यात् पृष्ठतस्तस्य कल्पयेत् ॥

बलिपीठं तदुभयोरन्तः स्तम्भं ध्वजाह्वयम् ।
स्तम्भः स्यात् गोपुरायामो विमानायाम एव वा ।।

आस्थानमण्डपायामः अग्रे पट्टित्रयान्वितः ।
ध्वजयष्टिसमायुक्तः पट्टिघण्टारवाञ्चितः ।।

वेदिकोपरि तं स्तम्भं स्थापयेन्मन्दिराननम् ।[428]

इति । एवं प्रकारकल्पनं प्राकारे चतसृष्वपि दिक्षु वा अग्रपृष्ठभागमात्रे अग्रमात्रे वा द्वितलादिगोपुरनिर्माणम्, अग्रे गोपुरस्योच्छ्रितत्वं, सौवर्णराजतादिकवाटयुग्मं, सर्वत्र नानादेवतान्यासः, सिंहगरुडान्यतरमूर्तीनां कोणेषु न्यासः, दिग्भेदेन द्वारपालस्थापनं, कूपकल्पनं प्राकाराणां च सर्वेषां बहिष्ठस्या दीर्घिकाविधानं, शास्त्रश्रवणवेदाध्ययनशालिजनाधिष्ठेयमठादिस्थापनं, पुष्पवाटीतुलस्याद्युद्यानवर्धनं, तत्र तत्र परिवारदेवतानामवस्थापनम्, आदित्यादीनष्टादशगणान् नाम्ना निर्दिश्य तेषां स्थापनप्रकार इत्येवं बह्वर्थप्रपञ्चः । आलयनिर्माणार्चाराधनविषये इव मठस्थापनश्रीवैष्णवजनवासस्थानविधानेऽपि पाञ्चरात्रग्रन्थस्याभ्यादरे संलक्ष्यमाणे सर्वमिदं भूमण्डलं भगवन्मयमेव कर्तुमतीव भगवान् उद्युक्त इति विशदम् । साम्प्रतमपि स एव भगवान् श्रीवेङ्कटादिषु स्थानेषु अनायासेन धनमपरिमितमर्जयति, अल्पं वा स्वाभिमतसत्कार्ये लोक उपयुञ्जीतेति । नास्तिक्यपरीते चास्मिन् काले सर्वमन्यथैव व्ययीक्रियते । सात्त्विकशिक्षारुचयश्च सर्वथा दुर्लभा इति अहो बत कष्टम् । एवंभूतस्थानकल्पनवत् खल्लिकास्थान (पाकस्थान)स्याग्नेये परिकल्पनं, तत्रापेक्षितसर्वोपकरणसंविधानम्, पाकालये लक्ष्मीप्रतिष्ठापनम्, होमस्थानम्, अन्नादिपचनस्थानम्, अपूपपचनस्थानम्, फलार्थं मरीच्यादिद्रव्यार्थं च स्थानम्, तण्डुलक्षालनकूपः, धूमनिर्गममार्गविधानम्, वस्त्रभूषणताम्बूलादिलक्षणस्थानं, छत्रचामरादिपालनस्थानमित्यादि निखिलं सर्वं तत्र तत्र पाञ्चरात्रे प्रतिपाद्यते ।

428. वि.ति. 6. 480–3ab

भगवन्निवेदनार्हवस्तुपरिगणनम्, समर्पणावसरः, पौर्वापर्यमित्यादि यथा तथा चिञ्चान्न-गुडान्नक्षीरान्नादिनानाविधान्नभेदानां शाकानां द्रवणम् अपूपप्रभेदानां च तत्र तत्र संमेलनीयद्रव्येयत्तावचनेन पचनसंस्करणप्रक्रियाभेदाः यावन्तः पाञ्चरात्रेषु व्युदपादिषत, तावन्तः तदर्थे पाकशास्त्रेऽपि न निरूप्येरन्नित्यहो पाञ्चरात्राणां सार्वभौमतेत्यलम् ।

आलयानुरूप्येण तत्तत्प्रतिमाङ्गप्रत्यङ्गमानादिप्रतिबोधनेन सुवर्णमृत्तिकादिप्रकृतिद्रव्यतो बिम्बनिर्माणप्रकारप्रपञ्चनेन तत्प्रतिष्ठाप्रकारः प्राधान्येन सर्वत्र प्रतिपाद्यते ।

गृहार्चा

गृहार्चाविषये च गृहस्य वायव्यां नैर्ऋत्यां वा मन्दिरम्, हस्तद्वयायामं मूलबिम्बम्, तत्त्रिभागः औत्सवबिम्बम्, सालग्राममात्रं वा सालग्रामशिला यत्र पूज्यते ततः क्रोशद्वय-पर्यन्तस्य पुण्यक्षेत्रत्वात् ।

भिन्ना वा स्फुटिता वापि चक्रयुक्ता शिला यदि ।
पूजनीया प्रयत्नेन भुक्तिमुक्तिफलप्रदा ॥
नावाहनं न प्रतिष्ठा न शान्तिर्नैव निष्कृतिः ।
दुग्धेन स्नापयेत् बिम्बं स्पर्शाद्यैर्दूषिता यदि ॥[429]

परमसंहितायाम् (18)-

प्रासादो भवनं चेति द्विविधं स्थानमुच्यते ।
प्रासादे स्थापितः सर्वान् अनुगृह्णाति पूजकान् ॥
स्थापितो भवने तेषु जोषयत्यामनः कुलम् ।[430]

इति ।

---

429. Ibid. 6.500, 1
430. प. 18.17, 8ab

प्रतिष्ठाक्रमः

अङ्कुरार्पणम्, नवधान्यपालिकासु विष्णोरावाहनम्, प्रतिबन्धः, जलाधिवासः, तदनर्हचित्रादिप्रतिमायां छायाविधिः, लोहजानां पीठसंयोजनात् परं जलाधिवासः, नेत्रोन्मीलनम्, चक्राब्जमण्डलकल्पना: शयनाधिवासः, मण्डलाराधनम्, महाकुम्भस्थापनम्, अष्टबन्धनम्, प्राणप्रतिष्ठा, न्यासभेदा इत्येवं भगवत्प्रतिष्ठायां क्रमः।

आवाहनं चैवं वर्ण्यते-

मुहूर्ते शोभने प्राप्ते प्राणानायम्य चिन्तयेत्।
वासुदेवमजं शान्तमुज्ज्वलं तं निरञ्जनम्॥

....

सहस्ररविवह्नीन्दुतेजोमण्डलमध्यगम्।
एवं ध्यात्वा सदाविष्णुं महाविष्णौ नियोजयेत्।
महाविष्णुं ततो विष्णौ विष्णुं हृदयपङ्कजे।
ततः पुरुषमन्त्रेण रचयेदञ्जलिं हृदि।
अञ्जलौ संस्मरेत् पद्मं तत्र भद्रासनं स्मरेत्।
तत्र ध्यायेत् हृदब्जस्थं विष्णुं विश्वात्मविद्यया।
ब्रह्मरन्ध्रपथा बिम्बे प्रविष्टं चिन्तयेत् ततः।
सर्वमन्त्रेण तद्बिम्बे सर्वत्र व्याप्य संस्थितम्।
ध्यात्वा महाकुम्भगतां बालकुम्भगतामपि।
बालोपकुम्भशक्तीश्च देशिकोऽथ यथाक्रमम्।
तत्तत्कुम्भस्थितैः कूर्चैः प्रोक्षयेत् मूलविद्यया।[431]

ब्रह्मरन्ध्रपिधानम्, सांमुख्ययाचनम्, सांनिध्यप्रार्थनम्, स्वगतनिवेदनमिति। संग्रहेण तु परमसंहितायाम् (18) जलाधिवासनम् नेत्रोन्मीलनम्, स्नपनमलंकरणम्,

---

431. Ibid.

शयनाधिवासः, मन्त्रन्यासः, आवाहनम्, सांनिध्यप्रार्थनम्, नैवेद्यसमर्पणम्, होमः इत्युक्तम् ।

प्रतिष्ठायाः मन्त्रभेदप्रयुक्तं साप्तविध्यम्

पारमेश्वरे कथ्यते–

"इति मन्त्रविभेगेन सप्तधा परिकीर्तिता"[432]

इति । तत्र भोगप्रदत्व मोक्षप्रदत्व-भोगमोक्षप्रदत्वरूपभेदं यथायथमुपवर्ण्य

"कालक्रमादकामानां सर्वः परफलप्रदाः"[433]

इति चोक्तम् । पाद्मे (13) स्थान-आस्थान-शयन-यान-कर्मार्चना-पीठभेदेन स्थापना-आस्थापना-अनुस्थापना-प्रस्थापना-प्रतिष्ठारूपनामभेदेन प्रतिष्ठापाञ्चविध्यं प्रादर्शि ।

'शिलाबिम्बं दारुबिम्बं स्वगृहे नार्चयेद्बुधः'[434]

इति दारुमयस्यापि निषेधेऽपि फलकामनाभेदेन दारुभेदक्लृप्तप्रतिमापूजनं (32) पश्चात् प्रपञ्चितम् । गृहार्चाप्रतिष्ठापनपद्धतिश्च पृथक् तत्रैव प्रादर्शि ।

दीक्षादिमतामेवाधिकारः

एवं क्रियाचर्यापादोक्तक्रियानुष्ठानं च पञ्चरात्रोक्तं दीक्षारहितेनानुष्ठातुं न शक्येत । नानामण्डलसत्त्वेऽपि चक्राब्जमण्डलतदाराधनपुरःसरणेन दीक्षाग्रहणं वर्ण्यते । अन्यथा आलयेषु नार्चनाधिकार इति । उक्तं च पौष्करे–

प्राक् प्राप्तदीक्षैर्विधिवत् त्रयीधर्मस्थितैर्द्विजैः ।
नित्याराधनसक्तैस्तु भक्तैर्भागवतैर्विभो ॥

....

मन्त्रमण्डलकुण्डास्त्रमुद्रादीनां कृतश्रमैः ॥

---

432. पार. 15.14ab
433. Ibid. 15.14ab
434. पा.क्रि. 32.3ab

षडध्वव्याप्तिनिष्ठैस्तु .... ।

....

.... तैः प्रतिष्ठापने कृते ।[435]

मन्त्राणां मण्डलानां कुण्डानां मुद्राणां निरूपणप्रणाली अत्यद्भुता पाञ्चरात्रग्रन्थेष्वेव द्रष्टुं शक्यते । षडध्वानश्च लक्ष्मीतन्त्रादौ (22) दर्श्यन्ते-परापश्यन्तीति क्रमेण वर्णाविर्भावो वर्णाध्वा, षाड्गुण्यं कलाध्वा, वासुदेवादिव्यूहप्रपञ्चः तत्त्वाध्वा, मन्त्र एव मन्त्राध्वा, जाग्रदादिपदाधिष्ठातृभावः पदाध्वा, प्रपञ्चान्तर्यामिभावः भुवनाध्वेति । एवं षडध्वनिरूपणं शैवेऽपि । अत्र पौष्करे त्रयीधर्मस्थितैरिति पदमवधानमर्हति । त्रय्यध्यायिनामेव हि दीक्षाधिकार इहोच्यते । चक्राब्जमण्डलपंनित्रेशप्रभेदनिरूपणं पौष्करेऽष्टमे ॥

चक्राब्जमण्डलदीक्षायां पञ्चसंस्काराः

चक्राब्जमण्डलदीक्षया दीक्ष्यमाणः तद्गुरुणा तदा पञ्चभिः संस्कारैः संस्क्रियते इत्ययमंशः श्रीप्रश्नसंहितायामेव लक्ष्यते नान्यत्र । तत्र हि वेदवित् श्रोत्रियः, वेदपञ्चरात्रोभयवित् पूर्णः, वेदवेदाङ्गपञ्चरात्राध्यापकः दीक्षितो गुरुः, दीक्षितकुलजो दीक्षितः, वेदत्रयपञ्चरात्रार्थाभिज्ञो भट्टारकः, तथाभूतः असहायं कर्षणादिप्रतिष्ठार्चनादिसर्वानुष्ठानपटुर्भट्टाचार्य इत्येवमारभ्य चक्राब्जमण्डलदीक्षाप्रयोगं विस्तरेणोपवर्णयति (109) । एषु भट्टाचार्यबिरुदस्यैवोत्कृष्टत्वात् कालक्रमेण सर्वेऽप्यर्चकाः भाट्टचार्यपदेन व्यपदिश्यन्, सर्वेऽपि संन्यासिनः परमहंसपदेनैव । अन्यत्र पञ्चसंस्कारघटनं नूनं प्रागेव पञ्चभिः संस्कारैः संस्कृतानामपि आलयेष्वाराधनाधिकारसंपत्तये चक्राब्जमण्डलदीक्षा भवति । तत्र पुनस्तत्करणमनपेक्षितमिति स्यात् । तत्प्रकरणे च पञ्चसंस्कारविषय एवं श्लोकः-

---

435. पौ. 38.42, 3cd, 4ab, 5d

"तापः पुण्ड्ः तथा नाम मन्त्रो यागश्च पञ्चमः ।।
तेषु तापविधानं तु शृणुष्व कमलासने ।।"[436]

इति पञ्च च संस्काराः यथा कर्तव्याः तथा विस्तरेण वर्णिताः । भारद्वजसंहितायां तु आलयार्चामनधिकृत्य गृहार्चनपरसर्ववैष्णवसमुदाचरपरायां परिशिष्टे (2) तापादीनां पञ्चानां संस्काराणां पृथक् पृथक् भिन्नकाले यथाविधि होममनुष्ठाय कर्तव्यता विशदमदर्शि । प्रशंसिताश्चेमे पञ्च संस्काराः–

"तापस्तपांसि तीर्थानि पुण्ड्रं नाम नमस्क्रिया ।
अम्नायाः सकला मन्त्राः क्रतवः पूजनं हरेः ।।"[436]

इति । संस्कृतैर्यथा वर्तितव्यम्, तत्र लोपे शान्तयश्च श्राविताः ।
एकदैव एकविधहोमानुष्ठानपूर्वकं पञ्चानामपि संस्काराणां कर्तुमर्हत्वमपि कथितम् । पुण्ड्रार्थ-मृद्ग्रहणवामहस्तनिक्षेपभृतिमन्त्रप्रयोगादिकं ब्रह्मरात्रादौ अद्यतनानुष्ठानरीत्या सुविशदम् । पुण्ड्रसंस्कारे च सङ्ख्याविकल्पो दर्शितः–

'त्रयोदश द्वादश वा चतुरो वैकमेव वा ।
नमोन्तैर्नामभिर्ध्यात्वा स्थापयेत् तत्र तत्र च ।।'[438]

इति । चतुरूर्ध्वपुण्ड्रपक्षे व्यूहन्यासो विवक्षितः । नामसंस्कारे,
करिष्यन् वैष्णवं नाम वैष्णवाश्रयमेव वा ।[438a]
भगवद्भागवतान्यतरनामकरणमनुमतम् । (?)
सहैकदिवसे वा द्वे त्रीणि चत्वारि पञ्च वा ।'[439]

---

436. श्री.प्र. 16.109cd, 10ab
437. भा.सं. 2.58
438. मूलं मृग्यम्
438. a भा.सं. 2.28ab
439. मूलं मृग्यम्

इति । एवं पृथक् पृथक् अनुष्ठानपक्षस्यापि सद्भावादेव विकलभागवतत्वमेकैकसंस्कारहीनानां वर्ण्यमानं सुघटितम् ।

'ऊनो हीनः परित्रतो नष्टो दग्धश्च ते स्मृताः' [440]
यथाक्रमं तापपुण्ड्रनाममन्त्रहीनानामेवं नाम ।

प्रपत्तिपञ्चसंस्कारसंबन्धः

[सार्थमुपदिष्टे पञ्चसंस्कारकाल एव न्यासमन्त्रे यथायथं पश्चात् परमपुरुषं पद्माजानिं शरणं प्रपद्यत इति संस्कारपञ्चकस्य प्रपत्तिपूर्वाङ्गत्वात् कृतदीक्षः प्रपत्तिमनभ्युपगन्तुं नार्हन्ति । मुख्योपायाधिकारे प्रपत्तेरननुष्ठेयत्वात् दीक्षिता भक्तियोगेऽपि प्रवर्तेरन् इत्येतत् न विवादास्पदम् । अशक्तास्तु अङ्गप्रपत्त्यर्थतां मन्त्रस्य त्यक्त्वा स्वतन्त्रप्रपत्त्यर्थतामेव स्वीकुर्वते । एवं च वैखानसास्तापसंस्कारमनिच्छन्तोऽपि मन्त्रसंस्कारं प्रपत्त्यपेक्षितं लभेरन् । विशेषवचनबलात् तेषां विकलभागवतस्वरूपदोषो नास्तीति वक्तव्यम् । "केचिच्चतुर्णां पूर्वेषां क्रमं नेच्छन्ति कर्मणाम्" [441] इति पापपुण्ड्रनाममन्त्रसंस्काराणां पाठक्रमेणैवानुष्ठेयत्वमिति न यथायथं विपरिवर्तोऽपीत्युक्त्या तापे तापाभावेऽपि मन्त्रसंस्कारोऽवगम्यते । अथापि यागस्य पञ्चमस्य तच्चतुष्टयानन्तरभावित्वमेवेति चेत्, तदिदं पाञ्चरात्रियागविषये, न तु वैखानसेऽपि । अथ तद्वदेव ज्ञानयोगयोरशक्ताः यावदायुषमनुष्ठितार्चनमार्गेणैव मोक्षं सिसाधयिषन्तः तदङ्गतया प्रपत्तिं स्वीकुर्वन्तु इति चेत् यदि अर्चनस्याऽऽन्तमनुष्ठितस्य योगासंवलितस्य साक्षान्मोक्षोपायत्वे बलवत् प्रमाणम्, न वयं निषेद्धुं प्रभवामः । परं तु,

भक्त्या परमया वाऽपि प्रपत्त्या वा महामते ।
प्राप्योऽहं नान्यथा प्राप्यो मम कैङ्कर्यलिप्सुभिः ॥ [442]

---

440. भा.सं. 3.98cd
441. आकरो मृग्यः
442. रहस्यत्रयसारे चरमश्लोकाधिकारे विगुतस्वः उद्धृतम् ।

इति वचनविरोधात् तृतीय उपायो न युज्यते। इदं वचनं भक्तिप्रपत्तिविधायकवचनबलादेव मोक्षसिद्धौ किमर्थं प्रवृत्तमिति विचार्यम्। न हि अनेनानेन कर्मणाऽनुष्ठितेन स्वर्गो भवतीति यथा शास्त्रेण बोध्यते, तथा अन्यथा तन्न भवतीतित्यपि बोधनीयम्, प्रकारा(नु)क्त्यैव तदभावसिद्धेः। अतः 'नान्यः पन्था अयनाय विद्यते'[443], 'नान्यथा प्राप्यः'[444] इत्यादिकं वाक्यं शास्त्रेषु तत्र तत्र मोक्षोपायतया निर्दिष्टानां काशीमरणक्षेत्रवासपुरुषोत्तमत्वज्ञाननामोच्चारण-मन्त्रोच्चारणग्रन्थपारायणभगवदाराधनानीनां भक्तिप्रपत्त्यन्यतरपुरस्कारेणैव मोक्षहेतुता, न साक्षादिति तत्तद्वाक्यस्य व्यवहितापायपरत्वप्रतिपादनार्थमित्यवधेयम्। अत एव प्रपन्नमधिकृत्य वक्तव्यं सर्वं विस्तरेण वर्ण्यते। एकायनास्त्रैविद्याश्चाधिकारिणो दीक्षायां भगवदर्चने चेति विस्पष्टघुष्टमेवेदमेतदादि पञ्चरात्रग्रन्थेषु।

पञ्चकालप्रक्रिया

तत्र पञ्चसंस्कारदीक्षेव पञ्चकालप्रक्रियापि व्युत्पाद्यते पञ्चात्मकभगवद्रूपाराधनप्रधाने पञ्चरात्रे। धर्मशास्त्ररीत्या आह्निकमनुतिष्ठतामनुष्ठानप्रक्रिया विशीर्णा। "व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन"[445] इति गीतोक्तैकबुद्धिगर्भा न भवति। तस्य तस्य कर्मणो दृष्टमदृष्टं वा यत् फलमिष्टम्, तत्तदर्थं तदिति भावनैव। सुतरां तु लौकिककर्मसु न वैदिकता संपाद्यते। पञ्चरात्रे तु सर्वं कर्म भगवदाराधनरूपं करोति पञ्चकालप्रक्रियोपदेशेन। शास्त्रार्थज्ञानेन तथाऽनुष्ठानप्रक्रियोपदेशाभावे तथाविधानुसंधानानुवृत्तिर्न खलु विदुषामपि भवितुमर्हति।

> "आत्मा राज्यं धनं चैव कलत्रं वाहनानि च।
> एतत्भगवते सर्वमिति तत्प्रेक्षितं सदा ॥"[446]

---

443. आ. 3.12.17
444. आकरो मृग्यः
445. भ.गी.2.41ab
446. आकरो मृग्यः

इति जनकस्य राज्ञोनुष्ठानं वर्ण्यते। तथा भावनं पाञ्चरात्ररीत्या प्राङ्कृतशिक्षणाधीनमिति वक्तुमुचितम्। तदत्र अहोरात्रस्य पञ्चधा विभागः अभिगमनोपादानेज्यास्वाध्याययोगभेदेन। यथायथं सर्वस्यापि कर्मण एतद्विभागान्तर्भावपूर्वमनुष्ठानं कार्यम्। एतदनुष्ठानं च शृङ्खलाबद्धम्। सर्वस्यानुष्ठानस्य संकल्पसात्त्विकपूर्वकत्वात्, अभिगमनाख्येन कर्मणा भगवन्तं वासुदेवमर्चयिष्यामीति, भगवानेवाभिगमनाख्यं कर्म कारयतीति संकल्प्य अहोरात्रविभागान्तर्गतप्रथमविभागरूपे तत्र काले कर्तव्यानि कृत्वा, भगवानेवाभिगमनाख्यं कर्म कारितवानिति समाप्य, तदेव। उपादानाख्येन कर्मणाऽर्चयिष्यामिति संकल्प्य सात्त्विकत्यागमपि कृत्वा उपादानकार्यमनुतिष्ठेत्। एवमेकसमापनान्यारम्भयोरविच्छेदेन कारणादस्याः पद्धतेः शृङ्खलाबद्धता।

अभिगमनादिपञ्चकम्

कुत्र विभागे केषां घटनमित्येतच्चैवं विशदमदर्शि पारमेश्वरे,

> ब्राह्मान्मुहूर्तादारभ्य प्रागंशं विप्र! वासरे।
> जपध्यानार्चनस्तोत्रैः कर्मवाक्चित्तसंयुतैः॥
> अभिगच्छेत् जगद्योनिं तच्चाभिगमनं स्मृतम्।[447]

इति स्नानसन्ध्योपासनजपहोमदेवार्चनादिकमभिगमनकालकर्तव्यम्। ततोऽभिगमनसात्त्विकत्यागं विधाय उपादानं संकल्प्य, भगवदाराधनोपकरणार्जनं कुर्यात्। तदाह-

> ततः पुष्पफलादीनामुत्थायार्जनमाचरेत्।
> भगवद्यागनिष्पत्तिकारणं प्रहरं परम्।
> तदुपादानसंज्ञं वै कर्मकालपदाश्रितम्॥"[448]

---

447. पार. 9.173,4ab
448. Ibid. 9.174cd, 5

इति । अत्र बाह्योपकरणार्जनवत् आन्तरोपकरणशमदमाद्यर्थवेदान्तादिग्रन्थाध्ययनाध्यापनपारायणादिकं नैवेद्यपचनसंभरणादिकमपि निविशते । तथा 'यत्करोषि यदश्नासि'[449] इति लौकिककार्याणामप्याराधनशेषत्वात् उपादानकाले स्वाध्यायकाले च सर्वलौकिककार्याण्यपि घटनीयानि । उपादानसात्त्विकत्यागं विधाय इज्यां संकल्प्य माध्याह्निकस्नानजपभगवदाराधन-वैश्वदेवभागवताराधनश्राद्धतर्पणभोजनादिकं कुर्यात् । भोजनस्याप्यनुयागत्वेनेज्यान्तर्भावो वक्ष्यते । तावति इज्यापूर्तिः । तदाह–

> 'ततोऽष्टाङ्गेन योगेन पूजयेत् परमेश्वरम् ।
> साधकः प्रहरं विप्र ! इज्याकालस्तु स स्मृतः ॥'[450]

इति । अत्र यागेनेति वक्तव्ये योगेनेति पाठोऽशुद्धः । अष्टाङ्गत्वविशेषणप्रसिद्ध्या योगेनेति कृतम् ।

योगस्येव यागस्याप्यष्टाङ्गत्वम्

योगस्याष्टाङ्गानि यमनियमासनप्राणायाम-प्रत्याहारधारणध्यानसमाधिरूपाणि प्रसिद्धानि । प्रकृतस्य यागस्याष्टाङ्गत्वमत्रैव प्रश्नपूर्वकमुपक्षिप्यते,

> अन्तःकरणयागादि यावदात्मनिवेदनम् ॥
> तदाद्यमङ्गं यागस्य नाम्नाऽभिगमनं महत् ।
> पूजनं चार्घ्यपुष्पाद्यैर्भोगैर्यदखिलं मुने ॥
> बाह्योपचारैस्तद्विद्धि भोगसंज्ञं तु नारद ! ।
> मध्वाज्याक्तेन दध्ना च पूजा च पशुना च या ॥
> तत्तृतीयं हि यागाङ्गं तुर्यमन्नेन पूजनम् ।
> निवेदितस्य यद्दानं पूर्वोक्तविधिना मुने ! ॥

---

449. भ.गी. 9.27a
450. पार. 9.176

संप्रदानं तु तन्नाम यागाङ्गं पञ्चमं स्मृतम् ।
वह्निसंतर्पणं षष्ठं पितृयागस्तु सप्तमः ॥
प्राणाग्निहवनं नाम्ना त्वनुयागस्तदष्टमम् ।[451]

इति । तथा च इज्याकालकर्तव्याराधने अष्टौ भागाः अभिगमनभोगमधुपर्कार्पणनैवेद्यार्पण-संप्रदानवह्निसंतर्पणपितृयागानुयागरूपाः । तत्र हृद्यागं विधायाऽऽत्मनिवेदनपर्यन्तः प्रथमः ततो बाह्याराधनमारभ्य मन्त्रासनस्नानासनालङ्कारासनकर्तव्यपूर्वक्रियानुष्ठानं स्तोत्रार्चनपर्यन्तम् स द्वितीयो भोगाख्यः । मधुपर्कदानं तृतीयो भागः । संप्रदानं नाम अतिथिभागवत-विष्वक्सेनादिपरिवारस्वपरिजनाद्यर्थो निवेदितविभागः । वह्निसंतर्पणमग्नौ होमः । पितृयागः श्राद्धादिः । अनुयागश्च स्वयं प्राणाहुतिपूर्वकभोजनमन्तर्याम्याराधनात्मकम् । इदमष्टाङ्गयजनमुपवासादिहेतुना स्वयं भोजनस्य परिहार्यत्वे सप्ताङ्गमवतिष्ठते इति रक्षाग्रन्थे श्रीदेशिकदर्शितमनुसंधेयम् । तदेवमष्टाङ्गो याग इज्याकाले ।

षडासनप्रक्रिया

अन्योऽपि कश्चिद्विशेषः षडासनप्रक्रियया समाराधनमिति । धर्मशास्त्रकारा अपि सन्ध्योपासनादिवत् देवाराधनमपि स्वग्रन्थेषु निबध्नन्ति । तथापि तत्प्रक्रियां न विशदं दर्शयन्ति । क्वचित्तु पुरुषसूक्तस्य भगवदाराधने उपयोगव्युत्पादनव्याजेन षोडशोपचारात्मक-माराधनमुच्यते । तावता आवाहनस्नापनालंकरणार्चननैवेद्यार्पणमात्रलाभेऽपि पाञ्चरात्रोक्तरीत्या मन्त्रासन-स्नानासन-भोज्यासन-पुनर्मन्त्रासन-पर्यङ्कासनरूपासनषट्ककल्पनया एकैकासनेऽपि कर्तव्यकलापप्रदर्शनेन औपचारिकसांस्पर्शिकाभ्यवहारिकसांदृष्टिकरूपोपचारार्पणनिरूपणेन वैशद्यं लम्भयति पञ्चरात्रमेव । धर्मशास्त्रोक्तरीत्यनुष्ठानतो धर्मिलोपपरिहारेऽपि आस्थापूर्वसमाराधन-प्रवृत्तानां प्रक्रियावैशद्याभावे मनस्तृप्तिरपि न भवेत् । ततः स्वाध्यायकालः ।

451. Ibid. 9. 180-5ab

स्वाध्यायकालेयत्ता

'श्रवणं चिन्तनं व्याख्या ततः पाठसमन्वितः ।
स्वाध्यायसंज्ञं तं विद्धि कालांशं मुनिसत्तम ॥[452]'

इत्युक्तः । एतदनन्तरम्—

दिनावसेन संप्राप्ते पूजां कृत्वा समभ्यसेत् ।
योगं निशावसाने च विश्रान्तरन्तरीकृतम् ॥[453]

इति निद्राव्यवहितौ पूर्वोत्तरकालिकौ ध्यानरूपौ योगावुक्तौ । तत्र सायंसन्ध्योपासन-भगवत्सेवनभोजनादेः किं स्वाध्यायेऽन्तर्भावः उत योगे इति विमर्शे, रात्रौ भोजनानन्तरमपि कथाप्रवचनचिन्तनाद्यनुवृत्त्या स्वाध्यायान्तर्भाव एवेष्टः । एवं पञ्चकालिकप्रक्रियां विधायोच्यते, 'पञ्चकालविभागं तु द्वयोरप्याधिकारिणोः'[454] इति अतः केवलपाञ्चरात्रिकाणां त्रैविद्यानां च सर्वमिदं साधारणं दीक्षापूर्वकपाञ्चकालिकधर्मानुष्ठानम् । तथैव भारतेऽप्यवगतमित्युपक्रम एव न्यवेदि । पञ्चधा कालविभागमात्रेण श्रौतस्मार्तधर्मत्यागस्य न प्रसक्तिः । पारमेश्वरे (9) द्वादशकालार्चनादिक्रमः स्थलभेदेनानेकरूपः प्रदर्शितः इत्येतावता तन्त्रपञ्चकालिकविभागस्य यथा न हानिः तथैव दक्षादिकृताष्टविधादिविभागे प्रातःसङ्गवादिविभागे सत्यपि न धर्मलोपः । पञ्चकालप्रक्रियायां यत्कालकर्तव्यकर्मकलापस्य कदाचिदाधिक्यम्, तदनुसारेणा-न्यकालकार्यसंग्रहणेनाभिमतकार्यार्थं कालाधिक्यसंपादनमपीष्टमिति देवपितृयागादिविस्तार-समये तदुचितमन्यत् संकोचनीयम् । तदेव प्रपन्नस्यावन्ध्यः कालः ।

प्रपन्नस्य नित्यकर्मावश्यकता

भक्तियोगमनुतिष्ठत इव प्रपन्नस्य नित्यकर्मानुष्ठानमिदं न प्रपत्यङ्गतया । कर्मणां हि

---

452. Ibid. 9.177
453. Ibid. 9.178
454. Ibid. 9.187ab

'धर्मेण पापमनुदति'[455] इत्यादिवचनबलात् पापपानोदकत्वात् पापमूलकरजस्तमोहानौ सत्त्ववृद्ध्या भक्त्युत्पत्तिहेतुत्वम् । न चैवं प्रपत्तिरित परमुन्यादनीयास्ति । न च महाविश्वासानुवृत्तेः-रान्तमपेक्षितत्वात् महाविश्वासानुवृत्तिप्रतिबन्धकपापापनोदकतया कर्मोपयोग इति शंक्यम् । मध्ये मन्दविश्वासेऽपि अन्ते महाविश्वासे प्रपत्तेः कार्यकरत्वेन विश्वासानुवृत्तेरनपेक्षितत्वात् । नित्यकर्मत्यागिनामपि केषांचित् महाविश्वासानुवृत्तिदर्शनाच्च । विविदिषन्ति यज्ञेन दानेन'[456] इति भक्त्यङ्गतयेव प्रपत्त्यङ्गतया विधानाभावाच्च । "प्रपत्तेः क्वचिदप्येवं परापेक्षा न विद्यते"[457] इति वचनाच्च । भगवत एव भक्तिस्थानापन्नतया प्रपत्तेस्तत्स्थानापत्त्यभावे स्थानात्ति-प्रमाणकातिदेशेन कर्मरूपाङ्गप्राप्तेर्दुर्वचत्वाच्च । अत एवोक्तं लक्ष्मीतन्त्रे-

अविप्लवाय धर्माणां पालनाय कुलस्य च ॥
प्रियाय मम विष्णोश्च देवदेवस्य शार्ङ्गिणः ॥
मनीषी वैदिकाचारं मनसाऽपि न लङ्घयेत् ।।[457]

इति । अकरणे प्रत्यवायात् तस्य चोत्तराघतया विविधदुःखहेतुत्वात् दिव्यदम्पत्यप्रीतिहेतुत्वाच्च नित्यकर्माकरणं त्याज्यम् । दिव्यदम्पत्योश्चेतनविषये स्थिताम् अकृत्यकरणकृत्याकरणमूलाम-प्रीतिं प्रपत्तिर्निवारयति प्रीतिमेवापादयतीति तन्मूलोऽस्य मोक्ष इति ।

आलयाराधनस्याज्ञानुज्ञारूपत्वम्

तत्राज्ञानुज्ञारूपेण कैङ्कर्यस्य विभक्तत्वात् आलये भगवदाराधनस्यात्यन्तभोग्यत्वाच्च महाकैङ्कर्यचिकीर्षया तत्र केचित प्रवर्तन्ते । अनुज्ञाकैङ्कर्ये प्रवृत्तानां तत्र यथाशक्ति तस्यानु-ष्ठेयतया त्यागे प्रत्यावायाच्च साङ्गोपाङ्गं तदनुष्ठेयं भवतीति तदन्तर्गततया नानाविधदेवतान्त-राराधनमपि नान्तरीयमविशङ्कमनुष्ठेयम् । अप्रपन्ना अपि लब्धपञ्चसंस्काराः निष्काम-

455. तै. 2.
456. बृ. 4.4.22
457. रहस्यत्रयसारे साध्योपायशोधनाधिकारे सनत्कुमारसंहितातः उद्धृतम् ।
4.8. ल.त. 17.94cd, 6cd, 7ab

कर्मानुष्ठान एवाधिकारिण इति देवतान्तर.सङ्गस्तुल्य: । कादाचित्कफलान्तरसङ्गदेवतान्तर-सङ्गादिकं प्रकृतिस्वभावादापतितं विवेकेन पश्चात् तदा तदा परिहार्यमिति च तुल्यम् । कुटुम्बिना देहधारणाद्यर्थतया तादृशानुज्ञ.कैङ्कर्यस्वीकारेऽपि न देवलकत्वदोषगन्ध इति श्रीमद्यामुनमुनिभिरागमप्रामाण्ये प्रत्पादि । प्रतिक्षणभगवद्दिव्यमङ्गलविग्रहानुभवपोषकत.या वृत्त्यन्तरवैलक्षण्यात् न केवलन्दोषत्वम्, अनुग्रहहेतुत्वमपि ।

'आपीडान्मौलिपर्यन्तं पश्यत: पुरुषोत्तमम् ।
पातकान्याशु नश्यन्ति किं पुनस्तूपपा .कम्'[459]

इत्यानिष्टनिवृत्तिरिष्टप्राप्तिश्च ।

अस्य सर्वग्र न्थस्योपसंहार:

तदेवं भारतभागवतादिकण्ठोक्त्या पञ्चरात्रप्रामाण्यस्य प्रतिष्ठितत्वात् आगमसिद्धान्ता, नुवर्तिकतिपयसंहितामात्र एव अस्मत्संबन्धिप्रतिनियतमन्त्रविशेषोक्ते: श्रीमद्रहस्यत्रयसारोक्तत्वात्-पारमेश्वरे

'परित्यज्य परं धर्मं मिश्रधर्ममुपेयुषाम् ।
भूयस्तत्पदकाङ्क्षाणां श्रद्धाभक्ती उपेयुषाम् ॥
अनुग्रहार्थं वर्णानां योग तापादनाय च ।
तथा जनानां सर्वेषाम् अभीष्टफलसिद्धये ॥
सात्त्वतादीनि शास्त्राणि भोगमोक्षप्रदानि च ।
उपदिश्य तु शास्त्राणि दिव्यानि तदनन्तरम् ॥'[460]

इत्युक्तरीत्या पौष्करादीनां व्यामिश्रयाज्यनुग्राहर्थत्वावसायाच्च चतुर्धा विभक्तपञ्चरात्रप्रति-नियताधिकारिभूतागमादिसिद्धान्त्यसाधारणधर्मविशेषापेक्षया मिश्रयाजित्रयीरतपुरुषग्राह्यप्रपत्ति-

---

459. शा.स्मृ. .16
460. पा.र. 1.87-9

पञ्चसंस्कारपञ्चकालप्रक्रियागृहदेवालयप्रतिष्ठापूजनादिविषयकस्य भागस्यैवाधिक्यात् कर्षणादिप्रतिष्ठान्तकर्मसु नित्याराधननानाविधोत्सवप्रायश्चित्तादिपद्धतिषु च सर्वं तदुच्चावच-सर्वदेवतावाहनायजनादेः पदे पदे उपलम्भात् ब्राह्मणक्षत्रियाद्यधिकारिकण्ठोक्तेश्च, पञ्चरात्रस्य सर्वस्मादादर्तव्यत्वाच्च अद्यतनश्रीवैष्णवादृतसंप्रदायक्रियायाः विष्णुतिलकभारद्वाजसंहितादिषु कार्त्स्न्येनोपलम्भाच्च ग्रामनगरसर्वप्रजायोगक्षेमसंपत्त्यर्थसर्वालयधर्मस्थापकत्वाच्च पञ्चरात्रस्य श्रैष्ठ्यं सर्वसंप्रतिपत्तव्यम् ।

ग्रन्थनिगमनम्

कोटिलक्षाधिकग्रन्थसङ्ख्यया भगवन्मुखात् ।
वाचो विनिःसृताः प्रांच्यः पञ्चरात्रसमाह्वयाः ॥

शक्तिज्ञानादिकह्रासं प्रेक्ष्य संग्रहमापिताः ।
तास्वप्यद्य यथालाभं प्राकाश्यं प्रापिता बुधैः ॥

संहितादिस्वरूपेण लक्ष्यन्ते सूक्तयोऽद्भुताः ।
तासामर्थं यथावन् के वेदितुं प्रभविष्णवः ॥

श्वेतद्वीपस्थितैकान्तिसदृशैः शुद्धयाजिभिः ।
प्राज्ञैरागमसिद्धान्तनिष्ठैरद्य सुदर्लभैः ॥

आदृताः संहिताः कामं सन्तु काश्चित् ततः पराः ।
मिश्रयाज्युपयुक्ता याः श्रीपत्यर्चनतत्पराः ॥

लक्ष्मीपौष्करशाण्डिल्यनारदादिप्रवर्तिताः ।
तत्संघातात्मकं सर्वभोगमोक्षफलप्रदम् ॥

चिदचित्तत्वभेदानात्मुक्तौ श्रीविष्णुतत्त्वयोः ।
वैभवोक्तौ परव्यूहाद्यशेषांशविशोधने ॥

देवीनां नित्यसूरीणां गुरूणां मोक्षमेयुषाम् ।
शुद्धानां परिवाराणामन्येषां च प्रपञ्चने ॥

देवान्तराणां रूपादेर्लोकानामपि वर्णने ।
भूतभौतिकवस्तूनां गुणदोषविवेचने ॥

ग्रामपत्तननिर्माणविधौ शिल्पकलासु च ।
कुम्भकूर्चस्थण्डिलाग्निप्रतिमापूजनक्रमे ॥

मृद्दारुलोहमूर्तीनां निर्माणे बेरकल्पने ।
विमानशालाप्राकारध्वजगोपुरनिर्मितौ ॥

वैदिकावैदिकाशेषमन्त्रतद्वाच्यशोधने ।
साङ्गोपाङ्गप्रतिष्ठाध्वभगवद्रूपलम्भने ॥

अन्नशाकापूपमुख्यपाकरीतिप्रदर्शने ।
विप्रक्षत्रियवैश्यानां वेदादेः पारदृश्वनाम् ॥

स्त्रीशूद्रादेरपि स्वानुरूपपूजाध्वदर्शने ।
कुण्डमुद्रामण्डलादिविविधाद्भुतकल्पने ॥

दीक्षाप्रपत्तिप्रभृतिहितसर्वस्ववर्णने ।
पारमैकान्त्यरक्षायां योगासङ्गानां प्रदर्शने ॥

भक्त्या यथा प्रपत्त्याऽपि मोक्षैश्वर्यप्रबोधने ।
नित्यब्रह्मपवित्रादिनानोत्सवसमीरणे ॥

वर्णाश्रमव्यवस्थाने सद्मशुद्धेश्च पालने ।
सर्वलोकानुग्रहार्थसेवापद्धतिशिक्षणे ॥

अमार्गाद्विनिवृत्तेश्च विधाने व्यापृतं भृशम् ।
परमर्षिमतं पञ्चरात्रं पारम्यमश्नुते ॥

सूर्यैकसेव्यचरणात् परवासुदेवात्
श्रेयानयं निखिलसूरिसुरर्षिसङ्घैः ।

आवाहितैरपि नरैः सुखदृश्यभूमा
श्रीमान् स्वयं विलसतीह वृषाचलादौ ॥

अभिनवदेशिक इत्थं वात्स्यः श्रीवीरराघवः सुकृती ।
प्राज्ञपुङ्गवप्रीणनधीः प्राणैषीत् पञ्चरात्रपारम्यम् ॥

॥ इति श्री पञ्चरात्रपारम्यं संपूर्णम् ॥

॥ ॐ नमो भगवते वासुदेवाय ॥

श्रीपञ्चरात्रपारम्यम्

CORRIGENDA

Page	Line	Read	For
v	14	°माथर्वणं	°मथर्वणं
x	25	°दयोऽष्ट	°दयोष्टा
xi	4	विशिष्ट	बिशिष्ट
xii	1	वचनमव°	बचनव°
2	12	श्रुति	श्रति
2	20	नास्तिक्य	नास्तित्व
6	3	युक्तिवि°	युक्तिनवि°
6	21	बल्व°	बल्ब°
7	3	ज्ञानादौ	ज्ञामादौ
7	4	°द्वूचह	°द्वचह
7	9	ईश्वरा	ईश्ववरा
7	12	दूषणं	षणं
7	18	धर्मोक्तेः[10] इत्यादिभिः	धर्मोक्तेः इत्यादिभि[10]'
7	24	Ibid	ब्र.सू.
8	2	°मयुक्त	°ममुक्त
8	8	पटा°	पट°
8	14	श्रुति	श्रुनि
9	2	°ष्वप्य	°ष्वत्य
9	4	चित्री	चित्रा
9	19	°तिताः	°नितः
9	24	Ibid	Ibib
9	25	Ibid	प्रश्न
10	11	तत्तद्गुण	तद्गुण
10	13	फलप्रापण	कालप्रमाण

Page	Line	Read	For
10	19	तर्पयामः।	तर्पयामः
10	25	8, 9	8 9
11	4	दूषण	दषण
11	7	ह्युक्त°	इत्युक्त°
11	9	शाङ्क°	शङ्क°
11	15	भगवन्	भगवान्
12	1	निष्क्रष्टुं	निष्कष्टुं
12	2	बाहृचता तस्य स्यात्	बाहृचता स्यात्
12	18	°मत्यन्त	°मन्यन्त
12	21	कात्स्न्र्येन	कात्स्र्येन
13	4	देशिक°	देशिका°
13	20	एव	ऐव
14	1	चचार।	चचार
14	3	संरक्षिकां	संरक्षिलां
14	4	शालि चेदि	शालिचेदि
14	6	पितृणां	पिनृणां
14	7	श्येन	श्चेन
14	9	प्रतिगृह्य	प्रतिग्रह्य
14	10	°गृहीता	°ग्रहीता
14	16	भगव°	भगग°
14	18	°यणोभूतः	°यणो भूतः
14	20	°द्भुक्ता	°द्भुक्त
14	21	°याग	°यगा
15	4	इति	ति
15	8	अथ च सदस्यैः	अ च सदस्यः
15	8	ब्रह्मणः	ब्राह्मणः
15	12	नात्र	नत्र

Page	Line	Read	For
15	12	°द्रंष्टुं	°द्रष्टुं
15	15	पार्श्व°	पश्व°
15	16	आद°	अदा°
15	18	धर्म°	धम°
16	5	°द्रुक्ताः	°द्रुक्तः
16	7	°तुभिः	°तुभिः
16	14	स्वाय°	वाय°
16	23	Add 12 before 335	
17	4	बालि°	वलि°
17	10	जन्मनि पश्चात्	पश्चात् जन्मनि
17	13	°वैश्यैः	°बैश्यैः
17	26	श्रीभा.	श्र भा.
18	5	तस्त्र°	तस्प्रा°
18	13	संबन्धस्या°	संबन्धत्या°
19	6	वैखा°	वैस्वा
19	6	इति	इ
19	7	अधुना	अधना
19	7	पारम्प°	पाम्प°
19	9	उवा°	उाद°
19	11	तथा चै	तथाचै
19	16	याज्ञवल्क्यो	याज्ञवल्पयो
20	1	°नेति	°नेनि
20	8	कर्मणां	कर्मीणां
20	12	साधा°	स धा°
20	15	वेदत°	वेदा°
21	7	षट्°	षट्°
21	8	°रात्रोक्तां	°रारात्रोक्तां

Page	Line	Read	For
21	11	शङ्ख	शङ्क
21	13	°लमिति	°लभिति
21	16	पार °	पर °
22	13	याञ्छा	याच्छा
22	17	°पतमपि	°पतमिति
22	19	सांख्य	सांङ्क्षय
22	22	मी.	भी.
23	4	पाशु °	पाश °
23	6	°नाच्च	°नाश्च
23	8	प्रामाण्यम्	प्रामाप्यम्
23	12	Add मुने after वा	
23	16	कथनात्	कर्तृत्वात्
23	22	न्या. प. P	पा. प.
24	5	प्रवृ °	प्रर्व °
24	15	कथयितुमशक्यत्वात्	कथयितुं शक्यत्पात्
24	17	मिति । एवं	मिति एवं ।
24	22	67. श्वे.	67 66 श्व.
24	23	द्र.ष.भ. P. 203	आकरो मृग्यः
25	4	शास्त्र	शास्त्रं
25	9	°करण	°करन
26	14	स्मृतः[76]	स्मृतः
26	17	तत्र तत्र	तत्र
27	5	°भभि	°मभ
27	11	वैश्यास्तथा	वैश्याथा
27	17	°रात्रे	°रात्रो
28	6	°ग्रह	°ग्राह
30	10	सकाशा	साकाशा

Page	Line	Read	For
30	13	°र्भाव	°भंव
31	8	°गणन	°गण
32	21	ब्रूहि	बूहि
33	23	म.	भं.
34	10	अषान्तरतपा	अपान्तरतरतपा
34	15	सांख्या°	साख्या°
35	2	वेदवेद्य	वेद्य
35	2	°पेक्षिततत्वात्	°पेक्षित्वात्
35	4	साङ्ख्य	साङ्यख्य
35	7	दृश्यते	दृष्यते
35	14	°णस्यां	°णास्यां
35	15	°धनमप्य	°धनप्य
35	15	°लिप्सया	°लित्सया
35	19	प्रकर्षेण	प्रकर्षण
35	23	शां. भा.	शां. आ.
36	11	लोके	लौके
36	11	अथ	अथ-
36	15	सद्ब्रह्म	सद्बह्म
37	11	°रुपापादि	°रुपपादि
37	15	विवस्वते	विवरस्वते
38	6	तस्य,	त य,
38	11	?	!
38	16	दर्शनात्	द्रशंनानात्
38	18	114	11
39	9	ह्येताः	ह्यताः
39	14	इत्यादि	इन्युादि
39	18	भारते	भारते;

Page	Line	Read	For
40	7	समर्थित °	समर्थि
40	8	° राज	° रात्र
40	10	इमे यामुनमुनयः	इमेयामुन मुनयः
40	11	स्थितमा °	स्थित मा °
40	17	Add शब्द after नारायण	
40	19	भगवता	भगमता
40	22	° न्योपयो	° न्योपघो
41	1	Add ऋग्यजुःसामरूपेषु after शाखाभूतेषु	
41	3	सर्वा °	समा °
42	4	क्रिय °	किय °
42	6	° प्यदर्शि	° प्यदशि
42	8	गृह्णाति	गृह्णति
42	24	Add Ibid before 14	
43	1	° शेना	° शेन
43	2	निमन्त्रित °	निमन्त्रि °
43	3	° द्देशेन	° द्देशेना
43	21	Add 3 after बृ.	
44	5	कात्स्न्येंन	कात्स्नेंन
44	7	शब्दार्थः	शब्दा :
44	21	63 ab	63
45	2	° त्तराणां	° त्तारणां
45	7	° न्निर्देशः	° न्निदशः
45	8	° राख्यं	° ररूपं
45	9	पद्यो °	पाद्यो °
45	9	146	145
45	17	एत °	एता °

Page	Line	Read	For
45	18	सर्वं	सर्व
45	19	°च्छास्त्रत्वं	°छास्त्रत्वं
45	21	आकरो	अकारो
46	8	°गमानां	°गमानं
46	15	पार°	पर°
46	16	°मन्तो	°मन्ते
47	2	संस्थितिः	संस्थितिः'
47	11	चैव	चैन
47	18	°णागतत्वात्	°णागत्वात्
47	21	न्या. द.	न्याद.
48	4	चतू°	चतु°
48	9	पुरुषो	पुरुषौ
48	20	Add पञ्च रात्रयः before पञ्च	
49	6	साङ्गेषु	साङ्गे
49	13	ग्रहणं	ग्राहणं
50	18	पञ्चधा वि°	पञ्चधावि°
50	21	21.	21
50	22	1.38 cd	1 38 cd
51	1	पञ्चधा वि°	पञ्चधावि°
51	16	विस्तृतस्य	विस्तृतस्ये
51	22	°मेवेति	°मेमेति
52	7	हेतुत्वं	हे त्वं
52	13	विहतम°	विहतमे°
53	12	°देष्टृत्वेन	°देष्टृरुत्वेन
53	13	°देष्टृत्वेन	°देष्टृत्वे
53	17	30 cd —	30 cd =
55	15	जाग्रद्व्यूहादि	जाग्रदव्यूहादि

Page	Line	Read	For
56	5	पार °	पर °
56	22	कर्तृक °	कतृक °
57	16	हस्ति	हरित
57	22	cd	dc
58	18	रूपत्वादिना	रूपत्वदीनां
59	8	यत्	तत्
59	20	° याजिन	° यजिन
60	8	° मानामपि	° मानपि
60	15	जाग्रत्	जाग्रात्
60	16	र्धा वि °	र्धावि °
60	17	चातुर्व्यूह	चतुव्यूहय
60	20	परमे व्यो	परमेव्यो
61	8	स्थानम् ।	° स्थेम् ।
61	9	राहित्यं	रहित्यं
62	8	द्वितादीन्	द्वितादिन्
62	14	बैव °	वैर °
62	20	323.	223
63	7	विस्तृ °	विस्मृ °
63	8	पुष्कर	पुकर
63	10	निष्ठ °	निष्ठा °
65	5	Add प्रामाण्यवर्णनेन before परिहृतम्	
65	23	तामसानि	तापसानि
66	4	सात्त्विक	सत्विक
66	6	Add तु after पाद्मे	
66	10	भागानां प्र °	भागानांप्र °
66	10	° शङ्का युज्यते	शङ्कायुज्यते

Page	Line	Read	For
66	19	तन्त्रान्तरयोः	तन्त्रा॰ रयोः
66	20	त्वेन अ	° त्वेनअ
66	23	82	92
67	11	निकृष्टै	निकृष्ट
67	12	Add तान्त्रिक after वैदिक before श्रौत	
67	12	चातुर्विध्ये	चातुर् ये
67	15	वैदिकं	वैदिक
67	22	° गणिते	° गणि
68	1	धर्मप्रवण	धर्मयुगधर्मप्रवण
69	1	° विद्यासु जी	° विद्यासुजी
69	3	मोक्षो °	मोश्रो °
69	3	Add कर्मानुष्ठानेऽप्यवतरति । after रीतिः	
69	14	° तान्तर	° तान्त
69	22	वि. ध. १६३.१०३.१६	अ. न.
70	2	दृश्यते ।	दृश्यते
70	2	° दाराधन	° धाराधन
71	19	8 ab	ab
72	2	भिन्नेषु	भिन्तेषु
72	2	Add आगमादिसिद्धान्तेषु before निषेकादि	
72	2	निष्ठ	निष्ठा
72	3	पूर्वोक्त	पूर्वक्त
72	7	साधारण्य	साधा ण
72	8	निर्णेयम् ।	निर्णेयम्
72	16	विभवार्चाहार्दं	विभषार्चाहर्दं

Page	Line	Read	For
72	21	Add व्यूहशब्दप्रयोगेऽपि before संकर्षणादिष्वेव	
73	22	76	76 abc
74	10	विषयतया	विषयता
74	15	° विदो	° वेदो
74	23	1.1.4	1.14
75	1	Add विभज्यते । क्रिया च कर्मानुष्ठानं प्रकृते अर्चाराधन-रूपमेव after द्वेधा	
76	24	1.96	196
77	13	Add पदं after सांख्यमिति	
78	15	काले	काये
78	23	6.2.1	6 1.2
79	4	स्पर्शा	स श
79	21	2 20	2.26
81	12	सर्जने	सजने
81	17	जगद्रूपा	जगद्रपा
81	17	° त्मिका	° त्मिक्रा
81	23	31	13
82	15	एत °	एक °
82	16	यादव °	याद °
82	21	शक्त्या	शक्क्त्या
82	24	42	72
83	5	Delete 277 before इति	
83	7	Add 277 after ° मुच्यते	
83	12	° नाकल्पे	° नकल्पे
83	19	° प्रदेशाः	° प्रदेशः

Page	Line	Read	For
83	19	Add त्रिमासे जठरकटिदेशा: before चतुर्थे	
83	21	ऊर्ध्वं	अर्ध्वं
83	22	° कोशवि	° कोशशवि
84	3	प्रकाशो °	प्रशो °
84	18	प. भ.	प.
86	5	Add भवति[291] इत्यादि श्रुत्युक्त-रीत्या विविधाप्राकृतविग्रह-परिग्रहेण after कामचारो	
86	18	Add सिकताजलस्य after आधारजलस्य	
87	1	संश्लेषे	संश्ले
87	2	नित्यनि °	नित्यति °
87	2	° नन्दानां	° नन्दानषे
87	5	त्रैविध्य	बैविध्य
87	20	° यैंकरत	° येकरत
88	1	° यन्ति च[296]	° यन्ति च
88	6	° दमुच्यते	° द मुच्यते
88	8	प्रथमे	प्रथेम
88	15	अनन्तर	अनन्त
88	25	पा. ज्ञा. 8.20b	पा. शा. 8.20
89	2	304	804
89	9	Delete 94	
90	3	चातुर्वि °	चातुवि °
90	13	श्रूयते	श्रयते
90	21	4.4.4	4 3.4

Page	Line	Read	For
91	5	Add नानाविधानि स्थानानि विरजांसि बहूनि च । after तथैव च ।। before तेषां	
91	19	पूर्वं	पूव
92	8	ततः	तत
92	10	प्रागेव	प्र गेव
92	13	° तन्त्वे	° तन्त्व
92	16	° र्गततया	र्गतया
92	18	हिरण्मय	हिरण्य
93	5	ब्रह्म नि °	ब्रह्मनि °
93	14	° त्मकान्	° त्यकान्
94	23	1.6 38	4.2.21
95	3	एव ।	एव
95	16	330	230
96	5	Delete वा	
96	6	चाभिधाय	चभिधाय
96	23	Add 334. Ibid 12.54 cd, 5ab	
97	11	वर्ण	वण
97	17	° कृतिः	° कृति
98	13	विभववत्	विभवतत्
99	8	श्रुतप्रका °	श्रुता का °
99	14	यत्संग्रह	यत्ङ्ग्रह
99	15	° मीप्सु	° मीत्सु
99	21	2.6.44	2.2.44
100	19	किमात्मिका	क्रियात्मिका
100	20	भगवांस्त °	भगवस्त °
100	21	ल. त.	त. ल.

Page	Line	Read	For
100	22	उद्धृतम्	उद्दृतम्
101	2	दुर्वच °	दु च °
101	19	स्थिर °	स्थित °
101	20	Add ज्ञानमयमिति before च	
102	3	° चारिकार्था	° चारिकार्थ
102	5	Delete न	
102	8	°काविर्भाव	°कविर्भाव
102	22	Add 62 after परीक्षायां	
102	23	तै. आ.	आ.
103	3	त्रिविध °	त्रिध °
103	14	Add क्रियामात्रं कालोपाधिः। अतः after च	
103	20	निमित्तोपादानत्वं	निमित्तापादनत्वं
103	21	6.2.1	6·21
105	2	Add लक्षण before लक्षित	
105	3	द्वय	द्गय
105	3	Add कथं before घटताम्	
105	17	ग्रहणा °	ग्रहण °
105	18	°भावेनो	°भवेनो
105	19	शुक्लत्ववक्तृत्व	शुक्लत्व वक्तृत्व
105	20	विप्रादि	प्रादि
106	1	° नोऽप्याधे	°नोरत्याधे
106	2	° क्षायोगेऽपि	°क्षयोगेऽपि
106	2	योगज	योग
106	2	साम °	साभ °
106	5	°स्यतीति	°स्यातीति
106	14	पन्थाः '367	पन्थाः'

Page	Line	Read	For
106	17	Add सिद्धोपायं वेदनातिरिक्तं before साध्योपायं	
107	8	°ङ्गत्वमिति	°ङ्गतमिति
107	9	Add अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते'[372] before इति ।	
107	9	कर्मैवाङ्गि	कर्मवाङ्गि
107	22	Add मृग्यम् after मूलं	
107	24	भ. गी.	भगी
108	8	पदम्	परम्
108	9	मन्तव्यम्	मन्नव्यम्
108	9	°स्मर	°स्मर-
108	10	°परत्वात्	°परतत्वात्
108	10	भगव°	भगत°
108	12	स्मरन्	स्मरत्
109	9	Add 381 before इति	
109	12	प्रपत्ति	प्रदत्ति
109	23	°त्रय	°त्य
110	9	अज्ञानिनां	अज्ञानिनः
110	12	वारुण°	वरुण°
110	19	भ. गी.	म. गी.
111	8	Add निष्कलत्वम्, विष्णुशब्द-ज्ञाप्यविग्रहविशिष्टत्वात् after विषयकत्वात्	
111	9	निर्गुणमित्येवम् ।	निर्गुणत्वम्,
111	10	तस्मात्	तस्मात् ।
111	15	°रैकरस्यं	°रैकस्यं

Page	Line	Read	For
112	5	Add ब्रह्माण्डं after नाभ्यां	
112	7	Add 392 after दिव्यम्	
112	13	तादृशाङ्ग	तादृशयङ्ग
112	20	3.2.8	3.28
113	5	भगवद्धार्य	भगवद्घार्य
114	5	वाप्सु	वाऽ सु
114	12	413	412
114	14	Add·········after पूजयेत्	
114	18	° वाहनं	° वाहनम्
114	23	3.333 ab, 337 cd-340	3.33 ab, 337-840
115	21	भा.	भी
116	11	यन्मयाः	यन्मायाः
117	14	° योरभावे	° योभावे
117	16	° युधानाम्	° युधानम्
117	20	प्राकार	प्रकार
117	23	18.	15
118	3	ग्रामादिषु	ग्रामादि
118	4	निर्दिश्यते	निर्दिश्यये
118	7	विक्रयका °	विक्रया °
118	7	Add सर्वदेवतासंयुक्तं नगरम्। द्वीपान्तरगतद्रव्यक्रयकविक्रया-धिष्ठितं before पत्तनम्।	
118	18	प्राजापत्या	प्रजापत्या
118	18	पैशाची	पशाची
118	20	आसुरा °	असुरा °

Page	Line	Read	For
119	2	कामाधि°	कामा-धि°
119	3	घटित°	घाटत°
119	5	श्वास्मदीय	श्वास्मंदीय
119	7	वैनतेय°	वैनतेया°
119	7	°मत्र	°मित्यत्र
119	8	व्यवस्थानि°	व्यव्यस्था-नि°
119	9	विवेचनहोम	विवेचन होम
119	9	बालगृह°	बालगृ°
119	17	व्युत्पादिताः	प्युत्पादिताः
119	18	°न्तरेष्विव	°न्तरेष्वि
119	20	तमस्त्वा°	तमवा°
120	12	बहिष्ठतया	बहिष्ठाया
120	22	रक्षण	लक्षण
120	23	निरवशेषं	निखशेषं
121	2	द्रवाणाम्	द्रवणम्
121	9	वा ।	वा
121	12	पूजनीया	पजनीया
122	2	प्रतिसरबन्धः	प्रतिबन्धः
122	13	हृदि	हदि
122	18	कुम्भगतां	कुम्भागतां
123	5	विभेदेन	विभेगेन
123	7	सर्वाः	सर्वः
123	22	13 cd	14 ab
124	16	भट्टाचार्य	भाट्टचार्य

Page	Line	Read	For
124	16	व्यपदिश्यन्ते	व्यपदिश्यन
125	4	समुदाचार	ससुदाचर
125	8	आम्नायाः	अम्नायाः
125	8	437	436
125	11	निक्षेपप्रभृति	निक्षेपभृति
126	3	परिस्त्रस्तो	परिन्नतो
126	6	सार्थं	[सार्थं
126	12	ताप °	पाप °
126	19	लिप्सुभिः	लित्सुभिः
126	20	भा. सं. 2.3.98 cd	भा. सं. 3.98 cd
126	22	विष्णुतत्त्वतः	विष्णुतत्त्वः
127	1	विधाय	वधाय
127	6	° राधनादीनां	° राधनानीनां
127	12	व्यवसाया	व्यसाया
128	7	तदेव उपा °	तदेव । उपा °
128	14	° भिगमनं	° मिगमनं
128	16	तदाह-	तदाट-
129	5	तर्पण	तर्यण
130	17	Add अलंकारासन after स्नानासन	
130	20	वैशद्या °	वैशाद्या °
130	21	180 cd	180
131	10	° रप्यधि	° रप्याधि
131	17	प्रपन्न	प्रदन्न

Page	Line	Read	For
131	21	453	बु 53
132	1	पापमपनुदति	पापमनुदति
132	7	स्थानापत्ति	स्थाना ति
132	11	458	457
132	12	दाम्पत्य	दम्पत्य
133	1	देवतान्तरा°	देवतान्तर
133	9	ग्राह्यत्वो°	ग्रह्योत्वो°
133	15	योग्यता	यो यता
133	16	अभीष्ट°	अभाष्ट°
133	19	°नुग्रहार्थं	°नुग्राहर्थं
133	21	शा. स्मृ. 2.16	शा. स्मृ. 16
134	4	प्रक्रियायाः	°क्रियायाः
134	14	शुद्ध	सुद्ध
135	14	योगाङ्गानां	योगासङ्गानां
135	18	सर्वलोक°	सर्वालोक

———